माध्वलघुपद्यकाव्यानाम् ऐतिहासिकालङ्कारिकसैद्धान्तिकदृष्ट्या समीक्षात्मकमध्ययनम्

विद्यावारिधि इत्युपाध्यर्थं (ph.D) समर्पितः शोधप्रबन्धः

मार्गदर्शकः

प्रो. वि, गिरीशचन्द्रः

निर्देशकः (भाषा निकायः)

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गलूरु

अनुसन्धात्री

वेदा. वि. पुरोहित

विद्यावारिधिछात्रा

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गलूरु

सहमार्गदर्शकः

डा. कृष्णाचार्य उपाध्यायः

निर्देशकः

विद्याधीशस्नातकोत्तरसंस्कृतशोधकेन्द्रः

बेङ्गलूरु

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गलूरु

२०१९

प्रतिज्ञापत्रम्

कर्नाटकसंस्कृत-विश्वविद्यालयस्य अनुसन्धात्र्या वेदा . वि. पुरोहित -नाम्न्या मया नैकविध-परिश्रमेण , तथा प्रो. वि. गिरीशचन्द्र महाभागस्य, एवं डा. पं। उपाध्याय कृष्णाचार्यवर्यस्य च मार्गदर्शने रचितोऽयं "माध्वलघुपद्यकाव्यानाम् ऐतिहासिकालङ्कारिक-सैद्धान्तिकदृष्ट्या समीक्षात्मकमध्ययनम् " इति शोधप्रबन्धः ।

विद्यावारिधि इत्युपाधये समर्प्यमाणोऽयं शोधप्रबन्धः इतःपूर्वं अन्यस्मै विश्वविद्यालयाय कस्मैचिदपि उपाधये न समर्पित इति प्रतिजाने ।

दिनाङ्क :

स्थानम्- बेङ्गलूरु **इति**

वेदा. वि. पुरोहित

अनुसन्धात्री

प्रमाणपत्रम्

कर्नाटकसंस्कृतविश्वविद्यालयस्य अनुसन्धात्र्या वेदा. वि. पुरोहित -नाम्न्या परिश्रमेण, मम मार्गदर्शने रचितोऽयं "माध्वलघुपद्यकाव्यानाम् ऐतिहासिकालङ्कारिक-सैद्धान्तिकदृष्ट्या समीक्षात्मकमध्ययनम्" नामकः शोधप्रबन्धः विश्वविद्यालयस्य विद्यावारिधि इत्युपाधये

समर्पितः।

मया इदं प्रमाणीक्रियते यत् शोधप्रबन्धोऽयं विश्वविद्यालयस्य अनुसन्धानशास्त्र-नियमाननुसृत्य रचितः । समर्पणयोग्यः इति अग्रे परीक्षार्थं संप्रेष्यते ।

दिनाङ्कः-

स्थानम्- बेङ्गलूरु **इति**

प्रो. वि. गिरीशचन्द्रः

मार्गदर्शकः

<u>प्रमाणपत्रम्</u>

कर्नाटकसंस्कृतविश्वविद्यालयस्य अनुसन्धात्र्या वेदा. वि. पुरोहित -नाम्न्या परिश्रमेण, मम मार्गदर्शने रचितोऽयं "माध्वलघुपद्यकाव्यानाम् ऐतिहासिकालङ्कारिक-सैद्धान्तिकदृष्ट्या समीक्षात्मकमध्ययनम्" नामकः शोधप्रबन्धः विश्वविद्यालयस्य विद्यावारिधि इत्युपाधये समर्पितः ।

मया इदं प्रमाणीक्रियते यत् शोधप्रबन्धोऽयं विश्वविद्यालयस्य अनुसन्धानशास्त्र-नियमाननुसृत्य रचितः । समर्पणयोग्यः इति अग्रे परीक्षार्थं संप्रेष्यते ।

दिनाङ्कः-

स्थानम्- बेङ्गलूरु **इति**

डा. पं। उपाध्यायकृष्णाचार्यः

सहमार्गदर्शकः

कृतज्ञतासमर्पणम्

- सदैव अस्मान् धर्ममार्गे प्रेरयित्वा अनुग्रहीतवतां उत्तरादिमठाधीशानां १००८ श्रीसत्यप्रमोदतीर्थकरकमलसञ्जातानां १००८ श्रीसत्यात्मतीर्थश्रीपादानां पादसरसिजयोः अनन्तानन्तप्रणामान् समर्पये ।
- सदा अस्मान् अनुगृह्णतां कूडलीश्रीआर्याक्षोभ्यतीर्थमठाधीशानां १०८श्रीरघुविजयतीर्थाणां पादपद्मयोः भूयो भूयो नमाम्यहम् ।
- न केवलं जन्मदानेन अपि तु विद्या,संस्कारादिभिः मां सदा परिपालितवद्भ्यः मम गुरुवर्येभ्यः पितृपादेभ्यः कीर्तिशेषेभ्यः । वे. शा.सं.पुरोहितवरदाचार्येभ्यो नमो नमः। तथा मम मातुः श्रीमति. पुरोहित इन्दिरायाः पादयोः प्रणामान् समर्पये ।
- शोधप्रबन्धरचनाकार्ये मम मार्गदर्शनं दत्त्वा मां प्रोत्साहितवद्भ्यः प्रो. वि .गिरीशचन्द्रमहोदयेभ्यः कृतज्ञतापूर्वकप्रणामान् समर्पये ।
- शोधप्रबन्धरचनाकार्ये शोधविषयसम्बन्धितशङ्कापरिहारं कृत्वा शोधकार्ये नितरां उपकृतवद्भ्यः विद्याधीशसंस्कृतशोधकेन्द्रस्य निदेशकेभ्यः डा. श्रीउपाध्यायकृष्णाचार्यवर्येभ्यः सादरं प्रणमामि।
- विश्वविद्यालयस्य कुलपतिभ्यः श्री वि. गिरीशचन्द्रमहोदयेभ्यः धन्यवादान् समर्पये ।
- विश्वविद्यालयस्य कुलसचिवमहोदयेभ्यः धन्यवादान् समर्पये ।
- शोधविषयक ऐतिहासिकाध्ययनार्थं मम मार्गदर्शनं कृतवद्भ्यः श्री व्यासनकेरेप्रभञ्जनाचार्येभ्यः सादरं प्रणमामि ।

- षाण्मासिकज्ञानसत्रे अस्माकं अनुसन्धानसम्बन्धित-नैकविषय-बोधनेन अस्मान् प्रेरितवद्भ्यः कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलपतिभ्यः श्री श्रीनिवासवरखेडीमहोदयेभ्यः कृतज्ञतापूर्वकप्रणामान् समर्पये । तथा प्रो. श्री वीरनारायणपाण्डुरङ्गीमहोदयेभ्यश्च कृतज्ञतापूर्वकप्रणामान् समर्पये । एवं विश्वविद्यालयस्य शिक्षकेभ्यः धन्यवादान् समर्पये ।
- प्रधानानुषङ्गिक-सामग्रि-सङ्ग्रहणे मम सहाय्यं कृतवद्भ्यः श्री पुरोहित--भीमसेनाचार्येभ्यः, श्री चन्नगिरिमधुसूदनाचार्येभ्यः तथा मन्त्रालयविद्यापीठस्थ-श्रीवादीन्द्राचार्येभ्यः कार्तज्ञं समर्पये ।
- तान्त्रिकविषये मम साहाय्यं कृतवद्भ्यः श्री एम्. सि. नागराजमहोदयेभ्यः कार्तज्ञं समर्पये ।
- मम सर्वकार्येषु मया सह स्थित्वा, सदा मम प्रोत्साहं कुर्वद्भ्यः मम पतिमहोदयेभ्यः श्रीकिरणवर्येभ्यः कृतज्ञतापूर्वकं सादरं प्रणमामि ।
- मम शोधकार्ये प्रत्यक्षं वा परोक्षरूपेण वा सहकृतवद्भ्यः सर्वेभ्यः धन्यवादान् समर्पये ।

विषयानुक्रमणिका

माध्वलघुपद्यकाव्यानाम् ऐतिहासिकालङ्कारिकसैद्धान्तिकदृष्ट्या समीक्षात्मकमध्ययनम्

१. माध्वलघुपद्यकाव्यानाम् ऐतिहासिकालङ्कारिकसैद्धान्तिकदृष्ट्या समीक्षात्मकमध्ययनम्

१.१ उपक्रमः

अगाधे संस्कृतसारस्वतार्णवे सारासारविवेकसुरासुरैः, प्रतिभापवनाशनेन लक्षणशास्त्रकूर्माश्रितस्य कविमन्दराद्रेर्मथनादुद्भूता रसगुणालङ्कारादिभिर्युता मधुरा सुरसा काव्यसुधा । एवं सृष्टा काव्यसुधा व्याख्यातृभिः परिवेषिता यदा सहृदयसूरिभिरास्वादिता तदैव सार्थकीभूता । अस्यामेव दिशि कृतप्रयत्नोऽयं "माध्वलघुपद्यकाव्यानाम् ऐतिहासिकालङ्कारिकसैद्धान्तिकदृष्ट्या समीक्षात्मकमध्ययनम् " नामकः शोधप्रबन्धः ।

वस्तुतः काव्यमेकस्याध्ययनं कथं वा शोधकार्यं भवेत् ? यः कोऽपि ग्रन्थालयं गत्वा वा पुस्तकं क्रीत्वा स्वेच्छानुसारं काव्यं पठित्वा काव्यानन्दं प्राप्नोति । तदर्थं शोधकार्यस्य अवश्यकता एव नास्तीति शङ्का केषाञ्चन मनस्सु उत्पद्येत । काव्यस्य प्रयोजनं केवलहृदयाह्लादकत्वमिति चेन्न प्राचीनार्वाचीनालङ्कारिकैरङ्गीकृतत्वात् । यथाह मम्मटः "

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ॥[1]

कवेः आशयमनुसृत्य काव्यरचनायाः उद्देश्यं काव्यप्रयोजनानि च भिद्यन्ते । यथा कानिचन काव्यानि ऐतिहासिकप्रज्ञया रचितानि स्युः कानिचन तत्कालीन सामाजिक-आर्थिक-अभिवृद्धिद्योतकानि स्युः । कानिचन भगवति भक्तिमुत्पादयितुं रचितानि स्युः

[1] काव्यप्रकाश- १.२

तथा कानिचन महापुरुषाणां जीवनकथाश्रवणेन अन्येऽपि स्फूर्तिं प्राप्नुवन्त्विति धिया रचितानि स्युः । एवमेव काव्यस्य उद्देश्यं यथा भिद्यते तथा तस्य प्रयोजनानि अपि भिद्यन्ते । अतः काव्यपठनानन्तरं योऽयमानन्दः प्राप्यते तेन न अलम् । सूक्ष्मेक्षिकया काव्यस्याध्ययनं करणीयम् । तदा कवेः आशयः काव्यस्य परमोद्देश्यञ्च स्फुटं दृश्यते । तदा तत्काव्यस्य उदयः सार्थक्यं भजते । कवेः प्रयत्नश्च सफलतां प्राप्नोति ।

भामहादयः काव्यविभागं एवं प्राहुः

शब्दर्थौ सहितौ काव्यं गद्यं पद्यं च तद्विधा ।
संस्कृतं प्राकृतं चान्यदपभ्रंश इति त्रिधा ॥[2]
व्रत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च ।
कलाशास्त्राश्रयं चेति चतुर्धा भिद्यते पुनः ॥[3]

काव्येषु दृश्यकाव्यंश्रव्यकाव्यमिति विभागद्वयमस्ति । तत्र भाण-डिम-व्यायोग-नाटकेत्यादिदशरूपकानि दृश्यकाव्ये अन्तर्भवन्ति । अन्ये च श्रव्यकाव्यानि । तत्रापि गद्यपद्यचम्पूरिति विभागः दृश्यते । छन्दोबद्धानि पद्यकाव्यानि । गद्यकाव्यानां छन्दोराहित्यत्वं चम्पूकाव्यानि गद्यपद्यमिश्राणीति विदितो हि विषयः । अत्र पद्यकाव्येषु पुनः महाकाव्यं लघुकाव्यमिति उपविभागाः दृश्यन्ते ।

दण्डीविश्वनाथादयः महाकाव्यलक्षणानि प्राहुः । तदुक्तं काव्यादर्शे सर्गबन्धो महाकाव्यम्...... ।

तत्र सर्गानां सङ्ख्या नायकस्य गुणाः प्रकृतिसूर्यचन्द्रोदयादिवर्णनं युद्धवर्णनं विवाहादिमहोत्सवानां वर्णनं खलनिन्दनं सज्जनगुणकथनमित्यादिमहाकाव्यलक्षणानि उक्तानि ।

---

2 काव्यालङ्कारः - प्रथमपरिच्छेदः- १६

3 काव्यालङ्कारः - प्रथमपरिच्छेदः- १७

लघुकाव्यानां प्रत्येकं लक्षणानीति लक्षणग्रन्थेषु कुत्रापि नोल्लिखितम् । किन्तु सप्तसर्गयुतानि वा सप्तश्लोकयुतानि वा काव्यानि लघुकाव्यानीति प्राज्ञैरङ्गीकृतम् । अत्र काव्यस्य लघुत्वं नाम सर्गसङ्ख्यानां न्यूनत्वं वा काव्यस्य गात्रस्य लघुत्वं, न तु काव्यस्य गुणविषये ।

संस्कृतकाव्यसाहित्ये लघुकाव्यानि विपुलानि । किन्तु महाकाव्यस्याध्ययने या उत्सुकता

दृश्यते तादृशी उत्सुकता लघुकाव्याध्ययने न दृश्यते । किन्तु प्रकृतिवर्णनपराणि कानिचन लघुकाव्यानि सहृदयानां मनस्सु अद्यापि विलसन्ति ।

कर्णाटकराज्ये माध्वसम्प्रदायः प्रसिद्धः । माध्वसम्प्रदायस्य अनुयायिभिः कविपुङ्गवैः नैकानि लघुकाव्यानि च विरचितानि । संस्कृतवाङ्मये एतेषां योगदानं विशिष्टं वर्तते । माध्वैः विरचितानि महाकाव्यानि गद्यपद्यचम्पूकाव्यानि स्तोत्रकाव्यानि नाटकानि अगणितानि । अमीषु माध्वविरचितानां लघुपद्यकाव्यानां समीक्षात्मकमध्ययनमत्र क्रियते ।

लघुकाव्यविभागे उपविभागास्सन्ति । शास्त्रकाव्यानि, स्तोत्रकाव्यानि, कथाधारितकाव्यानि बहूनि दृश्यन्ते । सर्वेषां काव्यानामध्ययनं नातिसुलभम् । अत एव अस्मिन् शोधप्रबन्धे रामायणमहाभारतपुराणाधारितकाव्यानां ऐतिहासिकलघुकाव्यानां तथा यतिश्रेष्ठानां जीवनाधारितकाव्यानां तथा चम्पूकाव्यानां च अध्ययनं विहितम् ।

१.२ शोधप्रबन्धस्य ध्येयोद्देश्यानि

यथा बालकृष्णस्य मुखे बृहद्ब्रह्माण्डो दृष्टः यशोदया तथैव लघुकाव्ये नैके तात्विकैतिहासिकपारमार्थिकविषयाः गोपिताः । माध्वसिद्धान्तस्य प्रमुखप्रमेयाश्रितानां तत्वानां सुलभतया ज्ञानं माध्वलघु- पद्य- काव्याध्ययनेन प्राप्तुं शक्यते । अतः लघुकाव्यानामध्ययनं विहितम् ।

प्रबन्धस्यास्य शीर्षिकायाः औचित्यविमर्शः किञ्चित् क्रियतेऽत्र । काव्यानामध्ययनमित्युक्ते अन्यकाव्येषु अर्थात् कालिदासादिभिर्विरचितेषु काव्येषु अतिव्याप्तिः । अतः 'माध्व' इति देयः । तथाऽपि माध्वैः विरचितेषु सुमध्वविजयादिमहाकाव्येषु अतिव्याप्तिः अतः माध्वलघुकाव्यमिति दत्तम् । तत्र माध्वलघुगद्यकाव्येष्वतिव्याप्तिरित्यनेन माध्वलघुपद्यकाव्यानामिति । चम्पूकाव्यानि लक्ष्यान्तर्भूतान्येव । समग्रलघुकाव्यानामध्ययनमित्युक्ते स्तोत्रकाव्येषु शास्त्रकाव्येषु तथा अप्रकाशितकाव्येषु अव्याप्तिः । अतः माध्वलघुपद्यकाव्यानामध्ययनमिति । रामायणमहाभारतपुराणाधारितलघुकाव्यानि तथा ऐतिहासिकलघुकाव्यानि तथा यतिश्रेष्ठानां जीवनचरिताधारितलघुकाव्यानि एवं प्रकाशितानि अत्र अध्ययनार्थं स्वीकृतानि । एतेषां काव्यानामध्ययनं आलङ्कारिकदृष्ट्या ऐतिहासिकदृष्ट्या तथा सैद्धान्तिकदृष्ट्या अस्मिन् प्रबन्धे क्रियते ।

नैकानि काव्यनि प्रकाशितानि तानि पठितुं वा अध्येतुं दुर्लभानि । यथा मन्त्रालयस्थविद्यापीठे सुमतीन्द्रतीर्थविरचितानि लघुपद्यकाव्यानि प्रकाशितानि । अतिवृष्टेः बहवः ग्रन्थाः जलप्रवाहे नष्टाः । अध्येयानि च काव्यानि व्याख्यानं विना दुरधिगमानि । अतः माध्वैः विरचितानां उपलब्धलघुकाव्यानामध्ययनमस्य प्रबन्धस्य उद्देश्यम् । यतो हि उपलब्धस्य विषयस्य पुनर्मौल्यायनमपि अनुसन्धानमिति श्रीसत्यनारायणाचार्यः संस्कृतशोधप्रविधौ ।

माध्वलघुपद्यकाव्यानां वैशिष्ट्यमत्र दर्श्यते । ऐतिहासिकप्रामाण्यदृष्ट्याऽपि एतानि काव्यानि विशिष्टतां भजन्ते । रसगुणालङ्कारादिभिर्युक्तानि सिद्धान्तमपि सुलभतया बोधयन्तीति हेतोः एतेषां काव्यानामध्ययनं अवश्यं करणीयमिति मे धीः ।

१.३ अस्य शोधप्रबन्धस्य अनुबन्धचतुष्टयम्

विषयः - जिज्ञास्यो हि विषयः । अस्य प्रबन्धस्य विषयस्तु माध्वलघुपद्यकाव्यानि । पूर्वोक्तरीत्या माध्वलघुकाव्यानि नातिप्रसिद्धानि । कैश्चन विद्वद्भिः अधीतानि स्युः तथापि विशेषाध्ययनं करणीयमित्यनेन प्रबन्धस्यास्य जिज्ञास्यत्वं विषयत्वं च सिद्धम् ।

विषयस्यापूर्वता - केषाञ्चन महाकाव्यानामध्ययनं विहितम् । किन्तु लघुकाव्यविषये इदानींतनेन केनापि प्रबन्धः न रचितः । डा. कल्पनामहोदयायाः "द्वैतसाहित्ये विजय - महाकाव्येषु भक्तिरसविमर्शः " नामके शोधप्रबन्धे माध्वलघुकाव्यानां प्रसक्तिरस्ति । - पञ्चमाध्याये 'अणुमध्वविजयः',श्रीरघुदान्ततीर्थविरचितजयतीर्थविजयः, श्रीरङ्गनाथाचार्यविरचितसुव्रतीन्द्रविजयः , श्रीसत्यप्रमोदविजयः इत्यादित्रयोदशलघुकाव्यानां स्थूलपरिचयः वर्तते । अतस्तेषां काव्यानां विशेषाध्ययने अवकाशोऽस्त्येवेति विषयस्यापूर्वता सिद्धा ।

अधिकारिनिश्चयः - 'काव्यं यशसेऽर्थकृते.....कान्तासम्मिततयोपदेशयुजे' इति काव्य - प्रयोजनमाह मम्मटः । क्लिष्टविषयानां कान्तासम्मिततया उपदेशार्थं काव्यमुपयुज्यते । अतः माध्वतत्त्वानां माध्वपरम्परागतमहापुरुषाणामुपदेशान् काव्यमुखेन सुलभतया अवगन्तुं शक्यत्वात् ये माध्वसिद्धान्तजिज्ञासवः महापुरुषकथासक्ताः ते अस्य विषयस्य अधिकारिणः ।

प्रयोजनम् - माध्वसम्प्रदाये शोभायमानानां कवीनां तेषां लघुकाव्यानाञ्च परिचयः । कवेः देशकालादिविचाराः ज्ञायन्ते । काव्यस्य वैशिष्ट्यं तथा मुख्योद्देश्यमाधृत्य लघुकाव्यानां प्रभेदाः क्रियन्ते यथा ऐतिहासिककाव्यं , रामायणमहाभारत -पुराणाधारितकाव्यं ,यतिश्रेष्ठानां जीवनचरिताधारितकाव्यं, चम्पूकाव्यमिति । काव्यानामध्ययनम् ऐतिहासिकदृष्ट्या अलङ्कारिकदृष्ट्या तथा सैद्धान्तिकदृष्ट्या क्रियते । विविधदृष्ट्या काव्यानामध्ययनेन काव्यस्य वैशिष्ट्यज्ञानं तथा तत्त्वज्ञानयुक्तकाव्यानन्दस्य प्राप्तिर्भवति ।

१.४. आलङ्कारिकदृष्ट्या काव्यस्याध्ययनम्

काव्यं नाम कवेः कर्म । सरलान् विषयान् वा गहनान् विषयान् शब्दार्थालङ्कारादिभिः सुरसं कृत्वा सहृदयानां मनस्सु अलौकिकानन्दस्य अनुभावजननम् एव काव्यस्य प्रयोजनम् । अत्र काव्यस्य मुख्यरसः, गुणः , वर्णनं सदैव प्रामुख्यं भजन्ते । काव्यपठनेन यः आनन्दः अनुभूयते सः काव्यस्य गरिमां दर्शयति । अतः आलङ्कारिकदृष्ट्या काव्यस्य अध्ययनमपि अवश्यं करणीयम् । अत्र काव्यस्य प्रधानरसः, अप्रधानरसाः, ओजप्रासादादिगुणपूर्णत्वं, शब्दालङ्काराः, अर्थालङ्काराः, काव्यस्य शैली इत्यादिविषयानधिकृत्य चर्चा क्रियते । एवं सर्वेषां काव्यानां समीक्षात्मकमध्ययनङ्कृत्वा लघुकाव्यानां लक्षणानां विषये निर्णयः क्रियते ।

१.५. ऐतिहासिकदृष्ट्या काव्यस्य अध्ययनम्

काव्येषु ऐतिहासिकता वर्तते वा ? वस्तुतः इतिहासो नाम कः ? काव्येषु इतिहासः अवश्यकः किम् ? अथवा सर्वेषु काव्येषु इतिहासः वर्तते किम् ? इत्यादिप्रश्नाः अध्येतुः मनसि वा शोधकर्तुः मनसि उत्पद्येरन् । काव्यविभागे ऐतिहासिककाव्यमिति प्रत्येकविभागः वर्तत एव । हर्षचरितम्, मधुराविजयः, इत्यादिप्रसिद्धमहाकाव्यानि तत्र उल्लेखनीयानि । किन्तु अन्येषु काव्येषु इतिहासः कथमित्युक्ते काव्यं सहृदयहृदायमाह्लादयत्यपि तत्कालीन इतिहासमपि बोधयति । कालिदासस्य कृतिभिः इतिहासज्ञाः तस्य देशकालादिविषये किञ्चित् ज्ञातुं प्रायतन्त । भासस्य नाटकेषु विद्यमानाः साम्यांशाः एव तेषां एक -कर्तृकत्वनिर्णये प्रमुखपात्रं ऊढवन्तः । एवं अनेकेषां कवीनां देशकालादिविचाराणां चर्चा तेषां काव्यानि आधृत्य एव कृता । अतः काव्यानां ऐतिहासिक -महत्त्वं सर्वदा गणनीयम् । अस्मिन् विषये अध्येतुः ऐतिहासिकदृष्टिः आवश्यकी । यदि सूक्ष्मेक्षिकया अधीयते चेत् काव्येषु ऐतिहासिकांशाः अवश्यं प्राप्येरन् ।

१.६. सैद्धान्तिकदृष्ट्या काव्यस्याध्ययनम्

भारतीयदर्शनेषु प्रसिद्धं दर्शनं पूर्णप्रज्ञदर्शनम् । मध्वमतमिति प्रसिद्धे अस्मिन् सिद्धान्ते प्रतिपादितानां प्रमेयाणां चर्चा प्रबन्धेऽस्मिन् कृता । प्रायः माध्वकाव्येषु सिद्धान्तस्य चर्चा भवत्येव । लघुकाव्येष्वपि नैकानां सिद्धान्तानां चर्चा वर्तते । अतः तेषां विषयाणां प्रमाणपूर्वकप्रतिपादनमत्र कर्तुं प्रयते ।

१.७. "माध्व" शब्दस्य व्युत्पत्तिः

माध्वलघुपद्यकाव्यानीत्युक्ते किं माध्वैः विरचितानि काव्यानि वा माध्वानुद्दिश्य विरचितानि काव्यानि वा । माध्वाः नाम के इत्यादिप्रश्नाः केषाञ्चन मनस्सु स्युः । अतः अत्र माध्व शब्दस्य व्युत्पत्तिः दर्श्यते ।

मध्वस्य अयं माध्वः इति तद्धितान्तः । मध्वशब्दस्य व्युत्पत्तिः माध्वग्रन्थेषु यथा दर्शिता तथा अत्र दीयते ।

मधु साधनं वं तीर्थं यस्यासौ इति कविकर्णामृतकाराः ।

मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् इति तैत्तिरीयभाष्ये आचार्याः ।

मधुयुक्तं वं ज्ञानं यस्यासौ इति पाङ्गरी आचार्यः बळित्थासूक्तव्याख्याने ।

मध्वशब्दप्रयोगः बळित्थासूक्ते दृश्यते "मध्व आधवे गुहासन्तं....." इति ।

"प्रादाद्वै श्रुतिसिद्धां तां मध्व इत्यभिधां मुदा " इति वायुपुरणे ।

प्राप्तो मध्वाभिधां व्यासात् यः प्राणः पावनो गुरुः ।

मातरिश्वा स एवासौ मध्वाचार्यः पुनातु मां ॥

श्रीमदानन्दतीर्थाः यदा बदर्याश्रमे श्रीवेदव्याससन्निधौ "गीताभाष्यं" समार्पयत् तदा साक्षात् श्रीमन्नारायणः वेदव्यासरूपेण वेदगत प्रसिद्धां मध्वाभिदां अनुग्रहञ्चकार ।

१.८. श्रीमन्मध्वाचार्याणां देशकालकृतीनां विचारः

श्रीमदाचार्याणां देशविषये स्पष्टप्रमाणस्य लब्धत्त्वात् विवादो नास्ति ।

क्षेत्रं स पाजकपदं....... ॥[4]

इति श्रीमदाचार्याणां जनकः मध्यगेहभट्टः पाजकक्षेत्रे वसति स्म इति सुमध्वविजये महाकाव्ये प्रामाण्यं दृश्यते । कर्णाटकराज्ये दक्षिणकन्नडमण्डले रौप्यपीठसमीपस्थे पवित्रपाजकक्षेत्रे श्रीमदाचार्याणां जन्म अभूत् इति तु निर्विवादः विषयः ।

मध्वावतारकालविषये सन्दिग्धाः विवादाश्च सन्त्येव । दक्षिणकन्नडप्रदेशे लब्धेषु पत्रेषु ('कडत' इति कन्नडभाषायामुच्यते) क्रिस्तशके ११९९ तमे वर्षे श्रीमदाचार्याणां जन्म अभूदिति निर्णयो दृश्यते[5] । मठस्थवंशानुक्रमणिकानामाधारेण क्रिस्तशके १११८ ,(शलिवाहनशके १०४०) विलम्बिनामसंवत्सरस्य विजयदशम्यां मध्वजननमभूदित्यभिप्रायः दृश्यते[6] । अद्यापि विजयदशम्यां मध्वजयन्त्युत्सवः प्रचलति । अतः संवत्सरस्य विषये वा तिथेः विषये वा विवादो नास्ति । किन्तु शकवर्षस्य विषये बहवः पक्षभेदाः सन्ति । तथापि १११९ क्रिस्तशकः इति निर्णयः बहुभिः प्राज्ञैरङ्गीकृतत्त्वात् स एव पक्षः अत्रापि स्वीक्रियते ।

१.९. श्रीमदाचार्यैः विरचिताः ग्रन्थाः

श्रीमन्मध्वाचार्यैः ३७ सप्तत्रिंशत् ग्रन्थाः रचिताः । ते सर्वे सर्वमूलग्रन्थाः इत्येव प्रसिद्धाः । तेषां नामानि अत्र दत्तानि-

गीताप्रस्थानग्रन्थौ

[4] सुमध्वविजये, १ सर्गे, ११ श्लोकः

[5] श्रीमध्वाचार्यर जीवनचरित्रे मत्तु उपदेशवाणि- अध्याय ३

[6] श्रीमध्वाचार्यर जीवनचरित्रे मत्तु उपदेशवाणि- अध्याय ३

१.	श्रीमद्भगवद्गीताभाष्यम्	२०.	भागवततात्पर्यनिर्णयः ।
२.	श्रीमद्भगवद्गीतातात्पर्यनिर्णयः		
सूत्रप्रस्थानग्रन्थाः			
३.	श्रीमद्ब्रह्मसूत्रभाष्यम्	५.	अणुभाष्यम्
४.	अनुव्याख्यानम्	६.	न्यायविवरणम्
उपनिषत्प्रस्थानग्रन्थाः			
७.	ईशावास्योपनिषद्भाष्यम्	१२.	मुण्डकोपनिषद्भाष्यम्
८.	तलवकारोपनिषद्भाष्यम्	१३.	बृहदारण्यकोपनिषद्भाष्यम्
९.	काठकोपनिषद्भाष्यम्	१४.	छान्दोग्योपनिषद्भाष्यम्
१०.	ऐतरेयोपनिषद्भाष्यम्	१५.	षट्प्रश्नोपनिषद्भाष्यम्
११.	माण्डूक्योपनिषद्भाष्यम्	१६.	तैत्तिरीयोपनिषद्भाष्यम्
श्रुतिप्रस्थानग्रन्थः			
१७.	ऋग्भाष्यम्		
इतिहासप्रस्थानग्रन्थौ			
१८.	महाभारततात्पर्यनिर्णयः	१९.	यमकभारतम्
दशप्रकरणग्रन्थाः			
२१.	तत्त्वसङ्ख्यानम्	२५.	प्रपञ्चमिथ्यात्त्वानुमानखण्दनम्
२२.	तत्त्वोद्योतः	२६.	मायावादखण्डनम्
२३.	प्रमाणलक्षणम्	२७.	तत्त्वविवेकः
२४.	उपाधिखण्डनम्	२८.	कथालक्षणम्
२९.	विष्णुतत्त्वविनिर्णयः	३०.	कर्मनिर्णयः
आचारग्रन्थाः			
३१.	तन्त्रसारसङ्ग्रहः	३३.	यतिप्रणवकल्पः
३२.	जयन्तीनिर्णयः	३४.	सदाचारस्मृतिः

३५.	कृष्णामृतमहार्णवः		
स्तोत्रग्रन्थौ			
३६.	नखस्तुतिः	३७.	द्वादशस्तोत्रम्

बाल्य एव कन्दुकस्तुतिरित्याख्या स्तुतिः रचिता । किन्तु सर्वमूलग्रन्थेषु नान्तर्भवति ।

१.१०. माध्वसिद्धान्तस्य प्रमुखप्रमेयाः

माध्वसिद्धान्तस्य प्रमुखप्रमेयाणां ज्ञानं सङ्क्षिप्ततया श्रीव्यासतीर्थविरचितश्लोकेनानानेन भवति ।

श्रीमन्मध्वमते हरिः परतरः । सत्यं जगत् ।
तत्त्वतो भेदः । भिन्ना जीवगणाः हरेरनुचराः ।
नीचोच्चभावङ्गताः । मुक्तिर्नैजसुखानुभूतिः ।
अमला भक्तिश्च तत्साधनम् । ह्यक्षादित्रितयं प्रमाणम् ।
अखिलाम्नायैकवेद्यो हरिः ॥

श्लोकेऽस्मिन् सिद्धान्तस्य पूर्णपरिचयः सूत्ररूपेण वर्तते ।श्लोकमेनमनुसृत्यैव प्रमेयाणां विषये किञ्चित् जानीमः ।

भगवतः सर्वोत्तमत्वप्रतिपादकसिद्धान्तः वाचनिकः । अन्ये यथा पञ्चभेदादयः आनुषङ्गिकाः इति सुधायाम् । [7]

विष्णोः सर्वोत्तमत्त्वम्- हरिः परतरः

माध्वमते विष्णोः सर्वोत्तमत्त्वं प्रतिपादितम् । विष्णोः सर्वोत्तमत्वं कथमित्युक्ते स्वतन्त्रत्वादिति [8]। विष्णुः स्वतन्त्रः लक्ष्म्यादि सर्वे देवाः तथा मनुष्य- राक्षसादि जीवाश्च तदधीनाः । अतः हरिः सर्वोत्तमः इति ।

[7] न्यायसुधा ३ अ, ३ पा, १६३ सू

अनन्तगुणपूर्णत्वम् - केवलस्वातन्त्र्यादिगुणैः सर्वोत्तमत्त्वं कथं सिद्धमित्युक्ते अनन्तगुणपूर्णत्वमिति [9]। हरेः गुणाः अनन्ताः, एकैकश्च गुणः अनन्तः इति ज्ञेयः । हरिः सर्वस्य नियामकः । सृष्ट्याद्यष्टकर्तृत्त्वं विष्णोः[10] । स ज्ञानानन्दैकदेहः । अप्राकृतश्च ।

सत्यं जगत्

माध्वमते जगतः सत्यत्वं प्रतिपादितम् । जगन्मिथ्या इति मायावादिनः । तान् खण्डयित्वा जगत् सत्यमिति प्रतिपाद्यते । विश्वं सत्यं वशे विष्णोर्नित्यमेव प्रवाहतः..............त आसुराः स्वयं नष्टाः जगतः क्षयकारिणौ इति व्यासस्मृतौ । असत्यमप्रतिष्टं ते जगदाहुरनीश्वरं...........क्षयाय जगतो हिताः इत्यादि गीतासु । विश्वं सत्यं मघवाना...........सत्यासत्यस्य करणानि वोचम्, सत्यः सो अस्य महिमा......यज्ञेषु विप्रराज्ये, कविर्मनीषि परिभूः ....शास्वतीभ्यः समाभ्यः" इत्यादि श्रुतिभिश्च जगतः सत्यत्वं सिद्धम् ।

तत्त्वतः भेदः

जीवात् जीवः भिद्यते, जीवात् जडः, जडात् जडः, जडात् परमात्मा, जीवात् परमात्मा च भिद्यते । एते पञ्चभेदाः इति प्रसिद्धाः । जीवात्मनः परमात्मा भिन्नः उत्कृष्टश्च । जीवेष्वपि भेदः वर्तते । 'द्वासुपर्णा...' इत्यादि वेदवाक्यैः भेदः सिद्ध्यते । मोक्षेऽपि भेदः वर्तते । भिन्नाः जीवगणाः हरेरनुचराः, नीचोच्चभावङ्गताः

जीवेषु भेदः सर्वत्र सदा भवति । अस्मिन् संसारे यथा तथा एव मोक्षानन्तरमपि । जीवानां स्वरूपयोग्यताऽपि भिद्यते । तरतमभावः मोक्षेऽपि अस्ति । तत्रापि हरेः नियामकत्त्वं यथास्मिन् संसारे । तान्यहं वेद सर्वाणि ....अतोऽस्मि लोके वेदे च प्रथितः

---

[8] स्वतन्त्रो भगवान् विष्णुः- तत्त्वोद्योते, मङ्गलाचरणाश्लोकः

[9] नारायणं निखिलपूर्णगुणैकदेहं- अनुव्याख्याने, मङ्गलाचरणश्लोकः

[10]सृष्टिस्थित्यप्येहा...- भागवततात्पर्ये, मङ्गलश्लोकः

पुरुषोत्तमः , द्वाविमौ पुरुषौ लोके क्षराक्षरौ..., क्षराणि सर्वाणि भूतानि..., यो लोकत्रयमाविश्य बिभर्तव्यय ईश्वरः इति गीतासु जीवपरमात्मनोः भेदः उक्तः [11] ।

मुक्तिर्नैजसुखानुभूतिः

मध्वमते मुक्तेः स्वरूपम् - जीवाः अनादिकालतः अज्ञानाद्यावरणैः युक्ताः । एते आवर्काः जीवानां स्वरूपभूतानन्दानुभवस्य प्रतिबन्धकाः । यदा संसारे जीवाः प्रविष्टाः स्थूलदेहाद्युताः स्वेषां कर्मानुसारं पापपुण्यानां भुक्तिं कृत्वा निरन्तरसाधनादिभिः चरमदेहं प्राप्य ईश्वरप्रसादात् मुक्तिमाप्नुवन्ति ।

चतुर्विधः मोक्षः सायुज्यसारूप्यसालोक्यसामीप्यम् इति ।

सायुज्यमोक्षः - अत्युत्कृष्टः भगवतः देहे स्थित्वा आनन्दानुभूतिः ।

सारूप्यमोक्षः - भगवतः चतुर्भुजरूपवत् रूपस्य प्राप्तिः ।

सामीप्यं - हरेः समीपं स्थित्वा आनन्दानुभवः ।

सालोक्यं - श्वेतद्वीप वैकुण्ठानन्तासनलोकेषु विहारः ।

अमला भक्तिश्च तत्साधनम्

भक्तेः विशिष्टस्थानं वर्तते मोक्षमार्गे । ज्ञान- भक्ति-वैराग्यद्वारा ईश्वरप्रसादः ततः मोक्षम् । का भक्तिरित्युक्ते माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिरिति प्रोक्ता तया मुक्तिर्नचान्यथा इति वादिराजगुरुसार्वभौमाः

ह्यक्षादित्रितयं प्रमाणम्

मध्वमते प्रत्यक्षानुमानागमाः प्रमाणत्वेन स्वीक्रियन्ते । प्रत्यक्षं नाम निर्दोषार्थेन्द्रियसन्निकर्षः इति टिकाकृत्पादाः प्रमाणपद्धतौ ।

---

[11] भगवद्गीता - ५ अ

निर्दोषोपपत्तिरनुमानम् इति श्रीमदाचार्याः प्रमाणलक्षणे । निर्दोषः शब्दः आगमः इति प्रमाण लक्षणे ।

ऋगाद्याभारतञ्चैव पञ्चरात्रमथाखिलम् ।

मूलरामायणञ्चैव पुराणञ्चैतदात्मकम् ।

येचानुयायिनस्तेषां सर्वे ते च सदागमाः । इति ब्रह्माण्डपुराणे ।

१.११. सुमध्वविजयमहाकाव्यम्

माध्वसमुदाये श्रीमत्सुमध्वविजयमहाकाव्यस्य स्थानं अत्युन्नतम् । प्रायः सर्वैः माध्वैः नित्यपारायणार्थं वा अध्ययनार्थं अस्य काव्यस्य पठनं क्रियते । नारायणपण्डिताचार्येण विरचितमिदं महाकाव्यं माध्वकाव्येषु ऐदम्प्राथम्येन रचितम् । श्रीमन्मध्वाचार्याणां जीवनकथा तदीयानां दिग्विजयानां वर्णनं तथा तैः प्रतिपादितानां सिद्धान्तानां स्थूलविवरणम् च अत्र लभ्यते । अस्य काव्यस्य काथासारः संक्षिप्तरूपेण दीयते अत्र ।

प्रथमसर्गे श्रीनारायणं नत्वा मङ्गलाचरणं कुर्वन् कविः हनुमभीमावतारवर्णनं च करोति । मध्वावतारः मुख्यप्राणस्य तृतीयावतारः । अतः तत्पूर्वं कृतयोः द्वयोः अवतारयोः वर्णनम् अत्र कृतम् । तथा अज्ञाननिरासाय पूर्वं देवैः प्रार्थितः नारायणः स्वयं त्रियुगहूतिरिति कारणेन तथा चतुर्मुखब्रह्मणः अनवतारत्वात् मुख्यप्राणं आदिशति । प्रभोः आज्ञानुसारं भूमौ अवतरितुं निर्णीतमित्यादिकथाः अस्मिन् सर्गे वर्णिताः ।

द्वितीय सर्गे मध्यगेहदम्पत्योः अपूर्वतपः बालकवासुदेवस्य (श्रीमन्मध्वाचार्याणां) जननं, बाल्ये वासुदेवस्य अलौकिकशक्तेः प्रदर्शनं यथा भूतबाधापरिहारः, कुलित्थभक्षणं, ऋषभस्य पुच्छं गृहीत्वा अटनं, तिन्त्रिणीबीजव्याजेन पितुः ऋणपरिहारः इत्यादिकथाः वर्णिताः ।

तृतीयसर्गे बालकवासुदेवस्य बाललीलाः वर्णिताः । यथा ग्रामात् ग्राममटन् किञ्चिदपि भीतः नाभूत् । यदा पृष्टः नारायणः मया साकं आसिदिति मन्दहासेन वदन् पित्रोः सन्तोषकारी अभवत् । अक्षराभ्यासकाले भारतीपतेः अनितरसाधारणपटुत्वं घृतपल्ल्यां शिवभट्टस्य पराजयः लिकुचशब्दार्थकथनं तथा उपनयनमहोत्सवस्य मनोहरवर्णनं दृश्यते । गुरुकुले वासुदेवस्य सूक्ष्मग्राहित्वं गुरुपुत्रवासुदेवस्य शिरोवेदनापरिहाररूपेण जन्मान्तरस्मरणप्रदानं गुरुदक्षिणारूपेण ऐतरेयोपनिषदः रहस्यार्थबोधनमित्यादिकथाः वर्णिताः ।

चतुर्थसर्गे वर्णिताः कथाः एवं सन्ति । संन्यासस्वीकारात् पूर्वं लोकशिक्षणार्थं भगवन्तं नमस्कुर्वन् संन्यासस्वीकारार्थं आज्ञां स्वीकृतवान् । किन्तु पितरोः विरोधं दृष्ट्वा पुत्रान्तरम् अनुगृहीत्वा विरोधं परिहृत्य अनुमतिं च स्वीकृत्य संन्यासं स्वीचकार । आश्रमनाम पूर्णप्रज्ञ इति अभवत् । अनन्तसरोवरे गङ्गायाः आगमनं ततः प्रभृति मध्वसरोवर इति नाम अभवत् । वासुदेवपण्डितस्य पराभवः इष्टसिद्धिग्रन्थस्य मङ्गलश्लोके द्वात्रिंशत् दुर्लक्षणानां प्रदर्शनम्, स्वाध्याये तथा प्रवचने अतिरुचिः , श्रीमद्भागवतस्य शुद्धपाठबोधनमित्यादि काथाः वर्णिताः ।

पञ्चमसर्गे एते अंशाः वर्णिताः । पूर्णप्रज्ञस्य वेदान्तसाम्राज्याभिषेकं कृत्वा आनन्दतीर्थ इति नाम कृतम् । आनन्दरूपस्य परमात्मनः पात्रं अस्माकं मनः । तस्य स्वरूपानन्दसाधकं शास्त्रं येन स आनन्दाख्यस्य हरेरावासभूतत्त्वात् आनन्दकरशास्त्रकर्तृत्त्वाच्च आनन्दतीर्थ[12] इति कविः आनन्दतीर्थ इति नाम्नः सार्थक्यं प्रतिपादयति । प्रपञ्चमिथ्यात्वानुमानखण्डनं कृत्वा अनुमानतीर्थ इति प्रशस्तिं स्वीचकार । वादिसिंहबुद्धिसागरयोः पराभवः विष्णुमङ्गले बहुभोक्तृत्वमहिमाप्रदर्शनं दक्षिणदिग्विजयेत्यादि कथाः वर्णिताः । तथा कुदिपुस्तोरणपराभवः रामेश्वरश्रीरङ्गेत्यादिक्षेत्रसन्दर्शनं पयस्विनीतटं प्रति आगमनं च वर्णितम् ।

---

[12] सुमध्वविजयः- सर्ग ५, श्लोकः २

षष्टे सर्गे ऐतरेयोपनिषदः अर्थान्तराणां बोधनं विष्णुसहस्रनामस्तोत्रस्य शतार्थबोधनं च सुष्टु वर्णितम् । दानसूक्ते 'पृणीयात्' इति शब्दस्य मूलधातुः पृण्- दाने इति ऋग्वेदप्रमाणं दर्शयित्वा प्रत्यपादयत् । तथा अपालाशब्दस्य अतितरुणी इति अर्थं ऋग्वेदसूक्ते प्रयुक्तस्य अपाला शब्दस्य प्रामाण्यं दर्शयित्वा शब्दार्थं दर्शयामास । दक्षिणदिग्विजयं समाप्य गीताभाष्यं विरचय्य बदरीक्षेत्रं प्रति जगाम । वेदव्यासदर्शनं गीताभाष्यसमर्पणं तथा शिष्यान् प्रति सन्देशं दत्वा उत्तरबदरीगमनं । तमनुसृत्य गतवन्तं सत्यतीर्थाभिधं मुनिं स्वस्थानं प्रापयितवान् स मध्वमुनिः ।

सप्तमे सर्गे उत्तरबदरीसन्दर्शनं बदरीवृक्षस्य वर्णनं व्यासाश्रमस्य वर्णनं वेदव्यासवर्णनं व्यासमध्वसमागमः इत्यादिवर्णनं मनोहरं वर्तते ।

वेदव्यासात् मध्वाचार्यैः सकलशास्त्रश्रवणं

अष्टमे सर्गे श्रीवेदव्याससन्निधौ मध्वस्य गुरूपसत्तिः नारायणस्य वर्णनं परशुराम-हयग्रीव- राम-कृष्णादिरूपचिन्तनं च वर्णितम् । तथात्र रामकथा कृष्णकथा च श्लेषेन सुन्दररीत्या वर्णिता । अस्मिन् सर्गे दशावतारवर्णनं तथा भगवतः कपिलादिरूपाणां च चिन्तनं वर्तते । एवं ब्रह्मसूत्रभाष्यरचनार्थं आज्ञाप्रदानमित्यादिकथा वर्णिता ।

नवमे सर्गे श्रीमन्मध्वचार्यस्य अतिमानुषव्यापारः वर्णितः । शीघ्रं उत्तरबदरीतः निर्गमिष्यमाणं मध्वं सर्वे ब्राह्माणाः सोपस्करमन्नं निवेदयामासुः । वायोरवतारः एषः मध्वाचार्यः तत्सर्वं बुभुजे । प्रलयकाले सर्वं भुञ्जानस्यायं व्यापारः नाद्भुतमिति कविः अभिप्रैति । एवं ब्रह्मसूत्रभाष्यस्य वैशिष्ट्यं सत्यतीर्थेण भाष्यलेखनं तेन सम्पाद्यमानस्य पुण्यविशेषस्य आगाधता च अत्र मनोज्ञतया वर्णिताः । गोदावरीतटे विद्वत्सभायां मध्वस्य वैभवं मध्वसिद्धान्तेन आकर्षितेन शोभनभट्टेन मध्वमतवैशिष्ट्यमण्डनम् मध्वशास्त्रस्य महिमा अच्युतप्रेक्ष्यमुनये मध्वाचार्येण उपदेशः । रौप्यपीठे कृष्णस्य प्रतिमाप्रतिष्ठापनं, पुनः बदरीं प्रति गमनमित्यादि कथा सुष्टुरीत्या चित्रिता ।

दशमे सर्गे आर्यागीतीत्यादिवृत्तयुतकाव्यरूपेण मध्वमहिमा वर्णिता । ईश्वरदेवस्य परवशत्वं मुख्यप्राणावतारिणः मध्वस्य सर्वप्राणिनियामकत्वं च उक्तम् । गङ्गाप्रवाहं तीर्त्वा त्वरकराजसभायां तद्भाषया एव सम्भाषमाणः मध्वाचार्यः शिष्यानरक्षयत् । ततः बदरीक्षेत्रं प्राप्य वेदव्यासात् व्यासमुष्टिं प्राप्य महाभारततात्पर्यनिर्णयं रचयितुमाज्ञप्तः मध्वाचार्यः पुनः गङ्गातीरं प्राप्तवान् । सूर्ये अस्तङ्गते कथं गङ्गा तरितव्या इति मत्या खिन्नान् शिष्यान् त्यक्त्वा अनार्द्रवासाः गङ्गातरणं कृतवान् । तेन कार्येण आश्चर्यमनुभूतवद्भिः राजभिः आज्ञप्ताः नाविकाः शिष्यानपि तारयामासुः । ततः हस्तिनापुरे चातुर्मास्यसमये गङ्गादेवी स्त्रीरूपेण मध्वसेवाञ्चकार । काशीपत्तने स्वयं बलिनोमन्यमानान् शिष्यान् एकेन प्रहारेण पराजितान् कृत्वा तान् उद्धृतवान् । अमरेन्द्रपुरिनामकं पण्डितं वाक्यार्थे निरासञ्चकार । तथा वेदेषु हरेः सर्वोत्तमत्वं प्रतिपादितवान् । एवं मध्वशास्त्रः अष्टाङ्गप्रमाणसहितः अद्वितीयः मोक्षसाधकः इति सर्गेऽस्मिन् प्रतिपादितम् ।

एकादशसर्गे शेषसनाकादिभिः मध्वशास्त्रश्रवणं तथा मध्वशास्त्राध्ययनस्य फलं च वर्णितम् । मध्वशास्त्रश्रवणस्य मोक्षप्राप्तिरेव फलमिति हेतोः वैकुण्ठवर्णनं कृतम् । वैकुण्ठस्य वैशाल्यं भवनानां सौन्दर्यं हरिमन्दिरस्य अद्भुतदृश्यं तत्र लक्ष्मीनारायणयोः विहारः ब्रह्मादिदेवैः भगवतः अवलोकनं मुक्तानां सौख्यमित्यादिवर्णनं मनोहारिणि । स्वस्त्रीभिस्सह मुक्तानां विहारः तत्रत्यऋतूनां वर्णनं च विद्यते । भगवतः विष्णोः मुकुटकुन्तलादिवर्णनं अङ्गाङ्गवर्णनं आयुधवर्णनं गुणरूपवर्णनं मुक्तैः करिष्यमाणा हरिसेवा इत्यादि वर्णनमत्र दृश्यते ।

द्वादशे सर्गे मायावादस्य दुर्घटत्वं मायावादिमते जगत्सत्यत्वं व्यावहारिकमित्यादि मायावादप्रतिपादितानामंशानामुल्लेखो वर्तते । वाक्येनैकेन मायावादस्य खाण्डनञ्च उक्तम् । मध्वशिष्याणां महिमा ,मध्वशास्त्रः अभेद्य इति अद्वैतिषु जाता चिन्ता , तथापि पद्मतीर्थेत्यादि अद्वैतिनां आश्रयेण मध्वशास्त्रं नाशयाम इति अद्वैतिभिः कृता प्रतिज्ञा । वक्रमार्गेण मध्वशास्त्रनिरासप्रयत्नः , रजतपीठे पुण्डरीकपुरिमुखानां मध्वमतखण्डनप्रयत्नः , पुण्डरीकपुरेः दुस्थितिः , विद्वत्कौतुकोत्पादका मध्वव्याख्यानशैली

मध्वाचार्याणां सकललक्षणोपेतं वेदोच्चारणम् । पुण्डरीकपुरेः पराजयः । तद्दृष्ट्वा पद्मतीर्थादिभिः ग्रन्थापहरणम् । प्राग्र्यवाटे (कोडपाडि) ग्रामे मध्वाचार्याणां चातुर्मास्यव्रतम्, मध्वाचार्यैः पद्मतीर्थादिवादिपराजयः इत्यादिवृत्तान्तं वर्णितम् ।

त्रयोदशसर्गे पद्मतीर्थेन अपहृतानां ग्रन्थानां पुनःप्राप्तिः , अस्मिन् कार्ये जयसिंहराजस्य कैङ्कर्यं च वर्णितम् । प्राग्र्यवाटात् जयसिंहराजस्य राज्यं प्रति प्रयाणमपि वर्णितम् । मदनेश्वरप्रदेशे श्रीमदाचर्याणां स्वागतवैभवः तथा आचार्याणां सकलसल्लक्षणोपेतरूपस्य च वर्णनं वर्तते । तत्त्वप्रदीपकारस्य त्रिविक्रमपण्डिताचार्यस्य जननवृत्तान्तं तस्य बाल्यं , काव्यरचनाकौशलं , उषाहरणकाव्यस्य रचना मायावादस्य अध्ययनं , यौव्वने एव भानुपण्डितनामकस्य पराजयः इत्यादि इतिहासः उल्लिखितः । पित्रा सुब्रमणयपण्डितेन उपदिष्टः पण्डिताचार्यः ।भगवतः निर्गुणत्वस्याङ्गीकारे संशयितमनाः । त्रिविक्रमेण वाक्यार्थाय पूर्वसिद्धता । श्रीमदाचार्याणां त्रिविक्रमपण्डितेन सह समागमः इत्यादिकथाः निरूपिताः ।

चतुर्दशसर्गे शङ्करपण्डितेन आचार्याणामाज्ञानुसारं स्वीकृताः ग्रन्थाः । जयसिंहराजस्य सभायां त्रिविक्रमपण्डितस्य आगमनं श्रीमदाचार्याणां आह्निकवैभवः शिष्याणां गुरूपसत्तिः तथा आचार्याणां शिष्यवात्सल्यं च वर्णितम् । सूर्योदयवर्णनं तु हृदयङ्गमं । सभायां आचार्यैः शङ्कापरिहारं तथा वादिनिग्रहोऽपि कृतः । श्रीमदाचार्याणां स्नानपूजादिवैभवोऽपि मनोहरः । अस्मिन् सर्गे सूर्यास्तवर्णनं चन्द्रोदयवर्णनं गगनवर्णनं च वर्तते ।

पञ्चदशेसर्गे अमरालयनामके ग्रामे श्रीमदाचार्यैः कृतस्य भाष्यप्रवचनस्य वर्णनं दृश्यते । त्रिविक्रमपण्डितेन श्रुता नात्यत्वरा अस्खलिता मध्ववाणी । निरीश्वर-सेश्वरसाङ्ख्यानां निरासः, विश्वस्य ईश्वरकर्तृकत्वं, वेदानामुपजीव्यप्रामाण्यं, पाशुपत-वैशेषिकमतनिरासः, ईश्वरस्य सुखपूर्णत्वं, भेदस्य औपाधिकत्वनिरासः, ब्रह्मणः गुणपूर्णत्वं, गुणानां च अनन्तत्वं, शून्यवाद- मायावादमतानां निरासः, मायावादस्यावैदिकत्वं , दुश्शास्त्रेण दुःखप्राप्तिरिति , मोक्षस्वरूपविवेचनं, मुक्तेर्निरस्यतानिरासः, तथा

मुक्तानामप्राकृतत्त्वं, ईश्वरस्य च आनन्दमयत्त्वं विष्णोः मोक्षप्रदायकत्त्वमित्यादिसिद्धान्तानां प्रतिपादनमत्र दृश्यते । त्रिविक्रम श्रीमदाचार्ययोः वादवैभवः तत्र त्रिविक्रमपण्डितस्य शरणागतिः तत्त्वप्रदीपाख्यग्रन्थरचनार्थं आचार्यैः आज्ञप्तः त्रिविक्रमपण्डितः । श्रीमदाचार्यैः विरचितानां ग्रन्थानां वैशिष्ट्यं, मध्यगेहदम्पत्योः वैकुण्ठयात्रा, विष्णुतीर्थस्य संन्याससस्वीकारः, विष्णुतीर्थानां तथा पद्मनाभतीर्थानां तपोबलं महिमा च अत्र वर्णितः । तथा हृषीकेशाद्यष्टमठाधीशाणां च उल्लेखो लभ्यतेऽत्र । मध्वशिष्यपरम्परा च वर्णिता ।

षोडशसर्गे गोमतीतीरे वेदप्रामाण्यस्थापना भद्रानद्यां स्थापिता बृहत्शिला, सूर्योपरागवर्णनं च दृश्यते । मध्वकटाक्षेण समुद्रोऽपि तटाकायितः , गण्डवाटनामकस्य पराजयः ,श्रीमदाचार्यैः अणिमादिसिद्धिप्रदर्शनं, पारन्तीग्रामे द्वापरे पाण्डवप्रतिष्ठापितनारायणादिपञ्चलिङ्गानां पुनः पूजानुष्ठानं , वैद्यनाथक्षेत्रे कृष्णामृतमहार्णवस्य रचना, कर्मनिर्णयनामकग्रन्थरचना, मध्वमहिमा, मध्वावतारफलश्रुतिः, देवैः पुष्पवृष्टिः इत्यादिकथा निरूपिता ।

एवं षोडशसर्गेषु निबद्धस्य काव्यस्यास्य महाकाव्यलक्षणानां चर्चा अत्र क्रियते ।

१.१२. महाकाव्यलक्षणानि

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखम् ॥
इतिहासकथोद्भूतमितरद्वासदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम्॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडा मधुपानरतोत्सवैः ॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥
अलङ्कृतमसंक्षिप्तं रसभावं निरन्तरम् ।

सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैर्सुसन्धिभिः ॥

सर्वत्रभिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।

काव्यं कल्पान्तरस्थायी जायेत सदलङ्कृतिः ॥

इति काव्यादर्शकारः ।

एकवृत्तमयैः पद्यैरवनेऽन्यवृत्तकैः ।

नातिस्वल्पाः नातिदीर्घाः सर्गा अष्टाधिका इह ॥

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।

सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥

श्रृङ्गारवीरशान्तानामेकोऽङ्गीरस इष्यते ।

आङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ॥

क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ।

नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥

सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।

सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासरः ॥

प्रातर्मध्याह्नमृगयाशैलर्तुवनसागरः ।

संभोगविप्रलंभौ च मुनिस्वर्गपुराध्वराः ॥

रणप्रयाणोपनयनमन्त्रपुत्रोदयादयः ।

वर्णनीया यथायोग्यं सङ्गोपाङ्गा अमी इह ॥

इति विश्वनाथः साहित्यदर्पणे ।

महाकाव्यस्य प्रारम्भे मङ्गलाचरणश्लोकः अवश्यकः । अस्मिन् काव्ये श्रीप्राणनाथाय नमस्करोमीति मङ्गलश्लोके मुख्यप्राणस्य नाथं नारायणं नमस्करोति कविः । काव्यस्य मुख्यविषयस्तु श्रीमन्मध्वाचार्याणां जीवनचरितम् । श्रीमन्मध्वाचार्याः मुख्यप्राणस्य तृतीयावताराः । तथा श्रीमदाचार्याः विष्णुसर्वोत्तमत्त्वप्रतिपादकाः । अतः हरिवाय्वोः

वर्णनपरस्यास्य काव्यस्य मोक्षप्रदायकत्त्वं तु सिद्धमेव । धर्मार्थकामानां तु कैमुत्येनैव सिध्यते ।

यथा पूर्वमुक्तं वाय्वावतारी श्रीमन्मध्वाचार्यः अस्य काव्यस्य कथानायकः चतुरोदात्तगुणोपेतः । एकादशे सर्गे वैकुण्ठवर्णनसन्दर्भे नगर - शैल-ऋतु-उद्यान-जलक्रीडा-सुधापानादिवर्णनं दृश्यते । तथाशृङ्गारादिवर्णनं च वर्तते । सूर्योदयवर्णनं तु अत्यद्भुतम् -

तेजो विद्वच्चक्रचन्द्रस्य लीनं
विध्वस्ताऽलं वादिनक्षत्रलक्ष्मीः
विश्वव्याप्तं यत् तु तद्दीप्तिमूलम्
युष्मत्प्रेष्ठं तन्निरस्तं तमश्च ॥[13]

मध्वशिष्याः मध्वमाहात्म्यं गायन्तः मायावादिनः खण्डयन्तः मध्वदर्शनात् अज्ञाननाशोऽभूदिति सूर्योदयसादृश्यं ददति । कुत्सितविद्वद्वृन्दमेव चन्द्रः वादिसमूहः एव नक्षत्राणि । तेषां मूलं अज्ञानतमः । यदा मध्वसूर्यः उदितः तमः निरस्तः तदनुचारिणः कुविद्वांसोऽपि निरस्ताः इति भावः । एवं

पूर्वाशामापूर्य विश्वप्रकाशी । गोसन्दोहैः सप्तविद्याख्यवाहः
युष्माभिः किं नैक्षि देदीप्यतेऽसौ । देवः साक्षात् सर्ववित् सर्वदीपः ॥

इत्यत्र गोसन्दोहैः इति शब्दे श्लेषः दृश्यते । गो शब्दस्य रश्मिः इत्यर्थः वाक्यमित्यपि अर्थः । मध्वपक्षे वाक्यसमूहैः इति अर्थः सूर्यपक्षे रश्मिरिति अर्थः कर्तव्यः ।

पूर्व इतिशब्दस्यापि ब्रह्मा[14] पूर्वदिक् इति अर्थद्वयम् वर्तते ।

---

[13] सुमध्वविजयः - द्वादशसर्गः, ४९ श्लोकः

[14] पूर्वेषां ब्रह्मादीनामाशां च - भा. प्र

१.१३. लघुकाव्यानाम् इतिहासः

कालिदासस्य मेघदूतम्- काळिदासविरचिते मेघदूते विरहतप्तेन यक्षेन मेघमुखेन स्वप्रियां प्रति सन्देशप्रेषणं वर्णितम् । अत्र आरामगिरेः अलकापुरिपर्यन्तं समग्रभारतस्य प्राकृतिकसौन्दर्यस्य वर्णनं चेतोहारि वर्तते ।

ऋतुसंहारः- षट् सर्गेषु बद्धे काव्ये षड्तूनां वर्णनं वर्तते । ग्रीष्मर्तुमारभ्य वसन्तर्तुपर्यन्तं प्रकृतेः अकृत्रिमवर्णनमस्ति ।

एकादशे शतके नीतिवर्मणा विरचितं 'कीचकवधं ' सुप्रसिद्धलघुकाव्यम् । पञ्चसर्गात्मके काव्ये चत्वारः यमकालङ्कारयुताः । तृतीयसर्गः श्लेषपूर्णः ।

द्वादशे शतके विद्यामाधवेन 'पार्वतीरुक्मिणीयलघुकाव्यं' रचितम् । नवसर्गेषु पार्वत्याः तथा रुक्मिण्याः विवाहयोः विशदवर्णानमस्ति ।

चतुर्दशे शतके साकल्यमल्येन रचिते 'उदारराघवम्' नामके लघुकाव्ये रामायणस्य सारांशरूपकथा वर्तते । अस्मिन् शतके विरचितं वासुदेवस्य युधिष्ठिरविजयकाव्यं यमककाव्येषु उत्कृष्टं काव्यमिति प्रसिद्धम् । अस्य कवेः त्रिपुरदहनं, शौरीकथोदयमित्यादिलघुकाव्यानि प्रसिद्धानि ।

पञ्चदशे शतके वामनभट्टबाणविरचित नलाभ्युदयलघुकाव्ये अष्टौ सर्गास्सन्ति । भाषा सरला अलङ्कारयुता च वर्तते ।

तथा चिदम्बरसुमतेः राघवपाण्डवयादवीय लघुकाव्ये रामायण भारतभागवतकथाः एकत्र वर्णिताः ।

षोडशे शतके दैवज्ञसूर्येणविरचिते रामकृष्णविलोमकाव्ये श्लेषं विना उभयार्थसूचकाः अष्टात्रिंशत् श्लोकाः वर्तन्ते । प्रथमार्धे रामस्य द्वितीयार्धे कृष्णस्य च शंसनमस्ति ।

सप्तदशे शतके चक्रकविविरचितम् अष्टसु सर्गेषु निबद्धं जानकीपरिणयलघुकाव्यं प्रख्यातमस्ति । सीतास्वयंवर-विवाहकथायाः विस्तृतवर्णनमत्रास्ति ।

मेघविजय उपाध्यायविरचित- 'सप्तसन्धानम्' जैनलघुकाव्यम् । काव्येस्मिन् ऋषभदेव-शान्तिनाथादयानां चरितं निरूपितम् । श्लेषचमत्कारः अस्य काव्यस्य वैशिष्ट्यम् ।

वेङ्कटाध्वरिणा विरचितं यादवराघवीयलघुकाव्यं विलोमकाव्यम् । साधारणक्रमेण रामस्य वर्णनं व्यत्यस्तक्रमेण कृष्णवर्णनं बहुसुन्दरमस्ति ।

१.१४. माध्वलघुकाव्यानाम् इतिहासः

श्रीमदाचार्याः एव मध्वशास्त्रस्य प्रणेतारः । अतः तत्कालादेव माध्वकाव्यानि रचितानि ।

कृतिकारः		कृतिः
१.	श्रीमन्मध्वाचार्याः	यमकभारतम्
२.	नारायणपण्डिताचार्यः	शुभोदयम्, प्रमेयनवमालिका(अणुमध्वविजयः)
३.	श्रीहृषीकेषतीर्थः	संप्रदायपद्धतिः
४.	श्रीव्यासतीर्थाः	अनुजयतीर्थविजयः(२०० श्लोकाः, ३४ श्लोकाः)
५.	श्रीराघवेन्द्रतीर्थाः	श्रीरामचारित्र्यमञ्जरी, श्रीकृष्णचारित्र्यमञ्जरी
६.	श्रीसुमतीन्द्रतीर्थाः	चक्रवालप्रबन्धः, रामगुणावलिः, पूर्णबोधचम्पू, शाहूराजविजयः
७.	श्रीरघुदान्ततीर्थः	जयतीर्थविजयः
८.	रघुशान्तदासः	जयतीर्थगुणरत्नमाला
९.	अरकाड् नरसिंहाचार्यः	जयतीर्थगुणार्णवः
१०.	कृष्णाचार्यः	जयतीर्थविजयाब्धिः
११.	करिकेहळ्ळि श्रीनीवासाचार्यः	जयीन्द्रोदयः
१२.	छलारीसङ्कर्षणाचार्यः	जयतीर्थविजयः

१३.	कट्टिकेशवाचार्यः	श्रीसत्यध्यानविजयः, श्री सत्याभिज्ञविजयः, श्रीसत्यप्रमोदविजयः
१४.	पाङ्घ्रिश्रीनिवासाचार्यः	शिक्षारामायणम्
१५	हुलगिश्रीनिवासाचार्यः	लघुरामायणम्
१६.	केशवभट्टः	नृसिंहचम्पूः
१७.	वेङ्कटाध्वरिः	श्रीनिवासचम्पूः

द्वितीयः अध्यायः

२. रामायणकथाधारितलघुपद्यकाव्यानां समीक्षात्मकमध्ययनम्

अशेषे भारतखण्डे देदीप्यमानानि रत्नानीव वेदाः पुराणानि रामायणमहाभारतादि इतिहासकाव्यानि च । अत्र वेदाः प्रभुसम्मिताः पुराणानि मित्रसम्मितानि काव्यानि तु कान्तासम्मितानीति अस्मत्प्राचीनाः । अत एव काव्यमुखेन तत्त्वज्ञानस्य बोधनं सरलं सुरसं च ।

तत्र तत्कालीनेतिहासं वर्णयता महर्षिणा वाल्मीकिना विरचितं रामायणमहाकाव्यं तथा व्यासमहर्षिणा विरचितं महाभारतमहाकाव्यम् च प्रमुखकाव्ये । एते द्वे महाकाव्ये भारतमातुः नयनद्वयमित्यत्र नास्ति सन्देहलेशः ।

एते काव्ये आधृत्य नैके कवयः स्वकाव्यानि विरचितवन्तः । रामायणाधारितमाध्वलघुकाव्यानि सन्ति । तेषु हुलगिश्रीनिवासाचार्यविरचितं लघुरामायणम्, पाङ्गरिश्रीनिवासाचार्यविरचितं शिक्षारामायणम्, श्रीराघवेन्द्रतीर्थविरचितरामचारित्र्यमञ्जरी, सुमतीन्द्रतीर्थविरचितं रामगुणावली इति ।

२.१. हुलगिश्रीनिवासाचार्यस्य देशकालकृतिविचारः

श्रीनिवासाचार्यः हुलगीति वंशनाम्ना कर्नाटकस्य कोप्पळ मण्डले स्थितस्य हुलगि इति ग्रामः तस्य देश इति तु स्पष्टः । किन्तु पित्रोः विषये स्पष्टोल्लेखः न लब्धः ।

श्रीगलगलिपण्डरीनाथाचार्येण विरचिते 'माध्ववाङ्मय तपस्विगळु' इति कन्नडग्रन्थे माध्वकवीनां देशकालादिविचाराणामुल्लेखो वर्तते । अत्र हुलगिवंशस्य कवीनामपि उल्लेखो वर्तते ।

माध्ववाङ्ग्यतपस्विगळु इत्याख्ये ग्रन्थे लघुरामायणं , पद्मावतिपरिणयनाटकञ्च अस्य कविवर्यस्य द्वे कृती इति ज्ञायते । किन्तु कवेः कालविषये स्पष्टोल्लेखः न वर्तते । प्रमाणपद्धतेः 'आदर्श' इति व्याख्याग्रन्थे हुलगिनरसिंहाचार्यः 'अग्रजान् श्रीनिवासार्यान् नत्वा' इति मङ्गलाचरणे प्रणामं विदधाति । तथा द्वैतद्युमणिकारः श्रीनाथाचार्योऽपि अत्र स्तुतः । अतः एते त्रयोऽपि एकगर्भसञ्जाताः स्युः । अस्मिन् विषये

२.२. लघुरामायणम्

लघुरामायणलघुपद्यकाव्यं षष्ठसर्गोपेतमपि गहनविषयान् बोधयति । काव्येऽस्मिन् महाभारततात्पर्यनिर्णयोक्त-सूक्ष्मप्रमेयाणां चर्चा उपदेशश्च वर्तते । प्रासादगुणोपेतंकाव्यमिदम् । भाषा सरला स्पष्टा च । अल्ङ्काराः समासाश्च नाति कठिनाः । अत् एव सह्रुदयह्रुदयमाह्लादयति काव्यमेतत् ।

प्रथमसर्गे "नत्वा श्रीजानकीजानिं.... ॥"[1] इति मङ्गलमाचरन् कविः इष्टदेवतावन्दनं गुरुवन्दनञ्च विदधाति । ततः राज्ञः दशरथस्य पुत्रकामेष्टियागं श्रीरामभरतादीनां जननं, विश्वामित्रस्य अध्वरे राक्षससंहारः, मारीचस्य पराजयः, सुबाहुताटकयोः संहारः, अहल्यायामनुग्रहः, शिवधनुषः भङ्गः, जानक्या सह परिणयः, सीतारामयोः विवाहमहोत्सवः, परशुरामेण सह युद्धः, इत्यादिकथाः सप्तचत्वारिंशत् श्लोकेषु वर्णिताः ।

द्वितीये सर्गे रामस्य राज्याभिषेकमहोत्सवस्य सिद्धता, मन्थरया दुरूपदिष्टया कैकेय्या भरतस्य राज्याभिषेकार्थं आग्रहः, रामस्य वनवासगमनं , रामेण पितृवाक्यपरिपालनार्थं सीतया लक्ष्मणेन सह वनगमनं, गुहेन रामार्चनं, भरद्वाजाश्रमप्राप्तिः, दशरथस्य पञ्चत्वगमनं, भरतस्य भ्रातृभक्तिः, सिंहासनेऽरुचिः, भरद्वाजाश्रमे रामभरतयोः मेलनं, भरतेन रामस्य पादुकाप्राप्तिः, रामस्य परमभक्तेन भरतेन रामपादुकाश्रयेन राज्यशासनं, कुरङ्गवधः,इत्यादि कथाः वर्णिताः ।

---

[1] लघुरामायणे- प्रथमसर्गः ,प्रथमश्लोकः

तृतीये सर्गः - चित्रकूटं त्यक्त्वा दण्डकारण्यं प्राप्तः श्रीरामः शरभङ्गऋषेः झर्झरिताङ्गानि दृष्ट्वा करुणया अग्निप्रवेशानुमतिं प्रादात् । ततः पूजितो विराधमुक्त्यर्थं अगच्छत् । तेन विराधवधार्थं त्यक्ताः शराः विराधमुखेन बहिरागत्य विराधेन प्रयुक्तस्य त्रिशूलस्य खण्डनमकरोत् । विराधस्य बाहू कर्तयित्वा अगत्स्यात् इन्द्रप्रदत्तायुधान् स्वीकृत्य गोदावरीतीरे पञ्चवट्यामुवास । तत्र जटायुषः आतिथ्यं स्वीकृत्य क्रीडया कालं यापयामासुः । तदा रावणस्य भगिनी शूर्पणखीनाम्नी रामं दृष्ट्वा मोहिता पतिवियोगात् दुःखिता च रामं स्वचेष्टया मोहितुं प्रारभत । रामं परिणीतं दृष्ट्वा लक्ष्मणं मोहितुमुद्‌युक्ता सा लक्ष्मणेन तिरस्कृता राक्षसीचेष्टाः प्रादर्शयत् सा । तदा क्रुद्धः लक्ष्मणः तस्याः नासिककर्णच्छेदनमकरोत् । एवं वृत्तान्तं अकम्पेन श्रुत्वा रावणः क्रुद्धः । सीतायाः रूपातिशयवर्णनं श्रुत्वा सीतापहरणाय मारीचमाहूतवान् । मारीचः रामस्य वैरुद्ध्यं कर्तुम् नेच्छुकोऽपि रावणस्य चोदनेन आत्मानं मृगयितुमुद्‌युक्तः । चित्रमृगरूपेण जानकीं आकृष्टवान् । जानक्याः इच्छानुसारं रामः मृगानयनार्थं गतः । मृगरूपं मारीचं च मरितवान् । मरणसमये कपटी मारीचः लक्ष्मणमाहूतवान् । सीतया आदिष्टः लक्ष्मणः रामं आनेतुमुद्‌युक्तः । तदा भिक्षुरूपधारी रावणः सीतामपहृतवान् । जटायुनामकेन पक्षिणा रुद्धमाणोऽपि रावणाः तस्य पक्षे निकृन्त्य विमाने लङ्कामगच्छत् ।

चतुर्थसर्गः - सीताविरहेण तप्तः रामः तस्याः अन्वेषणार्थं पम्पातीरमागतः । तत्र सुग्रीवेण हनूमता सह मेलनमभवत् । हनुमतः वाक्यमनुसृत्य सुग्रीवसख्यमङ्गीकृतं रामेण । वालिनं वृक्षस्य मूले स्थित्वा पृष्ठतः संहृत्य अन्त्यकाले शरणमागताय तस्मै उत्तमां गतिं प्रादात् । सुग्रीवस्य राज्याभिषेकानन्तरं सीतान्वेषणकार्ये कपीन् न्ययोजयत् । समुद्रतीरे सर्वे कपयः स्वसामर्थ्यानुसारं समुद्रं लङ्घयितुम् शक्यते वा इति अचिन्तयन् । तदा जाम्बवता चोदितः हनूमान् अब्धितरणे उद्‌युक्तः ।

पञ्चमः सर्गः- सर्गेऽस्मिन् सुन्दरकाण्डकथा निरूपिता । हनूमान् बृहद्रूपं धृत्वा समुद्रलङ्घनं कृतवान् । मार्गे वायुपुत्रं निषेवितुमुत्सुकं मैनाकमालिङ्ग्य तमन्वग्रह्णत् । तदा सुरसया प्राप्तं वरं सफलीकर्तुं तस्याः मुखं प्रविश्य सूक्ष्मरूपेण बहिरागच्छत् । छायां संहृत्य लङ्कां

प्राप्तवान् । लङ्कादेवीं पराजित्य तस्याः साहाय्येन लङ्कां प्रविष्टः । अशोकवने सीतां दृष्ट्वा रामकथां श्रावयित्वा तस्याः वात्सल्यं सम्पाद्य चूडामणिं प्राप्य पुनः आगतवान् । अशोकवनस्य ध्वंसं कृतवान् । अशीतिकोटिराक्षससेनां चूर्णीकृतवान् च । रावणस्य सम्मुखे स्वलाङ्गूलस्य सहाय्येन उपर्युपविश्य रामस्य शौर्यं अवर्णयत् । तदा क्रुद्धेन रावणेन आदिष्टाः राक्षसाः तस्य पुच्छे अग्निं न्ययोजयन् । तेन अग्निना लङ्कां अदहत् । अक्षकुमारादीन् मारितवान् । पुनः रामस्यान्तिकमागत्य सीतायाः चूडामणिं प्रदर्श्य रामानुग्रहपात्रो बभूव ।

षष्टः सर्गः - रामेणादिष्टाः कपयः लङ्कासेनया सह योद्धुमुत्सुकाः लङ्कां प्रति जग्मुः । समुद्रोल्लङ्घनं कर्तुं सर्वे असमर्थाः इति सेतुनिर्माणं कर्तुं अचिन्तयन् । सर्वे कपयः नलस्य नेतृत्वे सेतुनिर्माणं कृतवन्तः । लङ्कां प्रविश्य रामः अङ्गदं सन्धानार्थं प्रेषितवान् । विफले सन्धाने लङ्कायाः चतुर्द्वाराणि रोधयामास । इन्द्रजित् कुम्भकर्णादयः रामेण हताः । अस्वस्थान् कपीन् जीवयितुं हनूमान् गन्धमादनङ्गत्वा संजीवनमानीतवान् । तेन सर्वे कपयः प्राप्तस्वास्थ्याः पुनः युद्धं कृत्वा रामसेवां चक्रुः । सीतां नीत्वा रामः लक्ष्मणेन हनूमदादिभिस्सह अयोध्यामागतः । तस्य राज्याभिषेकः प्राचलत् ।

आलङ्कारदृष्ट्या काव्यस्यास्य वैशिष्ट्यम्

वीररसः प्राधान्येन दृश्यते । अद्भुतरसश्च काव्ये तत्र तत्र प्रतीयते । प्रासादगुणः अस्य काव्यस्य । उपमार्थान्तरन्यासाद्यलङ्काराः बाहुल्येन दृश्यन्ते ।

काव्यस्य षष्ठे सर्गे युद्धस्य वर्णनं १०२ श्लोकेषु मनोज्ञरीत्या वर्तते । पठतः सहृदयस्य मनसि वीरभीभत्सादिरसाः प्रतीयन्ते ।

छन्दोविचारः - प्रथमसर्गे अनुष्टुप्छन्दः । पञ्चचत्वारिंशच्छ्लोकाः अनुष्टुबि वर्तन्ते । सर्गस्यान्ते उपजातिवृत्ते श्लोकद्वयं दृश्यते । द्वितीयसर्गेऽपि अनुष्टुबां एव बाहुल्यम् । सर्गस्यान्ते इन्द्रवज्रोपेन्द्रवज्रवृत्ते दृश्येते । तृतीयसर्गेऽपि अनुष्टुबः तथा उपजाति वृत्ताः ।

चतुर्थ सर्गे तथा पञ्चमसर्गे उपजात्यनुष्टुप् तथा शार्दूलविक्रीडितवृत्तः दृश्यन्ते । षष्ठे सर्गे अनुष्टुप् शार्दूलविक्रीडितम् उपेन्द्रवज्रा, प्रहर्षिणी, पृथ्वीवृत्ताः दृश्यन्ते ।

प्रविश्य स निजां पुरीं जनकजापतिः सानुजः ।
सभातलमुपाश्रितः सचिवक्लृप्त तौर्यत्रिकम् ।
महीसुरवराशिषः शिरसि मानयन्नंजसा ।
शशंस समासतः कृतमशेषमप्योजसा ॥[2]

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः इति लक्षणात् **पृथ्वीवृत्तः** ।

इत्येतत् प्रकृतिवचोभिर्नन्द्य देवः सम्भारेष्वपि भरतेन सम्भृतेषु ।
भूदेवानपि सकलान्मनुष्यदेवानायातानखिलगुरुः समार्चयत् ॥[3]
अत्र 'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्' इति लक्षणात् प्रहर्षिणीवृत्तः ।

अर्थालङ्काराः

<u>अर्थान्तरन्यासालङ्कारः</u>

कुरङयितुमात्मानमीयेष स खलः किल ।
वधेनाप्यात्मनः पापः परापकृतमीहते ॥[4]

अत्र खलानां स्वभावं वर्णयति कविः । मारीचः आत्मनः नाशं भविष्यतीति ज्ञात्वाऽपि रावणस्य सहाय्यं कर्तुमुद्युक्तोऽभूत् । तथा रामस्य विषये अपकारं कर्तुमद्यतः । पापिनः परापकारार्थं स्वेषां नाशमपि सहन्ते इति सामान्योक्त्या विशेषस्य समर्थनात् अर्थान्तरन्यासः । 'उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः' इति लक्षणमाह चन्द्रालोके ।

<u>परिणामालङ्कारः</u>

पृथग्विनिर्मितां शालां स्वावासादनुजन्मना।

---

[2]लघुरामायणम्-६ सर्गः . १७६ श्लो
[3] लघुरामायणम्-६ सर्गः . १८१ श्लो
[4] लघुरामायणम्-३ सर्गः . ४४ श्लो सं

अध्युवास रहः सीताकरपङ्केरुहार्चितः ॥[5]

अत्र सीतारामयोः वनवासः वर्णितः । लक्ष्मणः सीतारामाभ्यां पृथक् शालां निर्माय तत्र सीता करपङ्केरुहाभ्यां अर्चितो रामः इत्यत्र सीताकरपङ्केरुहार्चितः इति उपमानस्य उपमेयरूपे परिणामत्वात् परिणामालङ्कारः । परिणामः क्रियार्थश्चेद्विषयी विषयात्मना इति लक्षणम् ।

<u>अतिशयोक्त्यलङ्कारः</u>

तस्मिन्महोत्सवे पेठुः आशिक्षाः शुकशारिकाः।
भुज्यतां पीयतां भूयोप्यर्थिभ्यो दीयतामिति ॥[6]

अत्र रामस्य विवाहमहोत्सवे शुकशारिकाः अपि अतिथिसत्कारं चक्रुः इति वर्णयति । अनेन अतिशयौच्यते इति हेतोरत्र अतिशयोक्त्यलङ्कारः परिदृश्यते ।

<u>उत्प्रेक्षा</u>

निजान्वयवधूरोधक्रोधेनेवारुणे रवौ ।
त्रिकूटशिखरारूढः कार्यशेषमचिन्तयत् ॥[7]

अत्र लङ्कां यदा हनूमान् प्रविष्टः तदा सूर्यास्तः अभवदिति कविः चमत्कारेण वर्णयति । सूर्यवंशजः रामः । अतः स्ववंशस्य वधूं रावणः अपहृतवानिति क्रोधेन सूर्यः आरुण्यं भेजे इति स्वाभाविककार्ये सीतापहरणस्य कारणं सम्भावयतीति हेतूत्प्रेक्षालङ्कारः । सम्भावना स्यादुत्प्रेक्षा इति लक्षणम् ।

<u>भ्रान्तिमदलङ्कारः</u>

निर्धूय दैन्यं मित्राणां व्यादितास्यः खमुत्पतन् ।
ग्रसमान इवाभाति पुनः मार्ताण्डमण्डलम् ॥[8]

---

[5] लघुरामायणम्-२ सर्गः . २२ श्लो सं
[6] लघुरामायणम्-१ सर्गः . ३३ श्लो सं
[7] लघुरामायणम्-५ सर्गः . २२ श्लो सं
[8] लघुरामायणम्-५ सर्गः . ५ श्लो सं

हनूमतः समुद्रोल्लङ्घनं वर्णयति । आस्यमुद्घाट्य सः हनूमान् पुनः मार्ताण्डमण्डलं ग्रसति वा इति भाति इति सर्वेषु भ्रान्तिमजीजनदिति कारणात् भ्रान्तिमदलङ्कारः । हनुमतः बाल्ये घटितवृत्तान्तस्य स्मरणेन स्मृतिमदलङ्कारः ।

षष्ठे सर्गे रामरावणयोर्युद्धस्य वर्णनं मनोज्ञमस्ति । एकचत्वारिंशदधोकशत- श्लोकेषु युद्धः वर्णितः । काव्यं पठतः सहृदयस्य मनसि वीरभीभत्सरसयोः अनुभूतिर्भवति । उदाहरणार्थं श्लोकमिमं पश्यामः

नीलोप्यलातवच्चक्री तस्य नाप शरव्यथाम् ।
आग्नेयास्त्रेण चास्याभूद्रीतिलेशस्तदात्मनः ॥[9]

नीलनामककपिना सह रावणस्य युद्धः वर्णितः । रावणेन आग्नेयास्त्रः यदा प्रयुक्तः तदा आलातचक्रवत् भ्रमतो नीलस्य आग्नेयास्त्रात् लेशोऽपि न घातितः । युद्ध समये अस्त्रप्रयोगात् स्वरक्षणं नीलेन कथं कृतमिति नैजवर्णनम् अत्र दृश्यते ।

समुद्रवर्णनम्

अपारतीरं दृगतीतपारं तीरोच्छलत्तुङ्गतरङ्गहारम् ।
गम्भीरमम्भोनिधिमीक्ष्य दूरात्ते वानरास्तं परितो निषेदुः ॥

सीतान्वेषणं कुर्वन्तः कपयः समुद्रतीरमागत्य यदा समुद्रमपश्यन् तदा समुद्रः एवं दृष्टः इति कविः कल्पयति । श्लोकपठनेन समुद्रस्य गभीरता वैशाल्यं तरङ्गानां मनोहरदृश्यं दृष्टिपथमायाति । छेकानुप्रासोऽपि समुद्रस्य तरङ्गाः नृत्यस्य लयमनुसरन्ति इव विभाति ।

ऐतिहासिकदृष्ट्या काव्यस्याध्ययनम्

रामायणमहाकाव्यं तु ऐतिहासिक-काव्यमित्येव प्रसिद्धम् । रामायणे वर्णिताः भूभागाः अद्यापि वर्तन्ते । तेषां नामानि अपि यथाग्रन्थमेव वर्तते । आधुनिकजगति सङ्गणकयुगे

---

[9] लरा- ६ सर्गः, ५८ श्लो

रामायणकालीनवृत्तान्तानां सत्यत्त्वं पोषयितुं नैके आविष्काराः कृताः । यथा रामसेतोः निर्माणम् । नासा संस्थायाः उपग्रहद्वारा प्रेषितानि चित्राणि भारतस्य दक्षिणदिशमारभ्य श्रीलङ्कापर्यन्तं पनामासमुद्रभागे चतुस्सहस्रवर्षपुरातनस्य मानवनिर्मितसेतोः अवशेषाः लब्धाः । अनेन रामायणे वर्णितसेतुनिर्माणादिवृत्तान्तानां सत्यत्वं सिद्धम् [10]। सेतोः निर्माणस्य नेतृत्वं नलनामककपिः[11] स्वीकृतवान् ।

शूर्पनखा लक्ष्मणेन विकृतीकृता इति वार्ता अकम्पनामकेन राक्षसेन रावणः श्रृणोति । अत्र वार्तावाहकस्य राक्षसस्य नाम उल्लिखितो वर्तते । अत्र कवेः ऐतिहासिकप्रज्ञा श्लाघनीया एव । यतो हि रामायणे शुर्पनखायाः नासादिविकारस्य वार्ता प्रमुखं पात्रं वहति । अतः अस्याः वाहकस्यापि नामोल्लेखेन वृत्तान्तस्यास्य महत्त्वं प्रदर्शितम् ।

चतुर्थसर्गे श्लोकेऽस्मिन् तारनामा कपिप्रमुखः सर्वान् कपीन् उद्दिश्य इतः यदि गच्छामश्चेत् कालः अतीतः इति कारणात् सः सुग्रीवः अस्मान् हन्यात् । अतः अत्रैव सर्वसमृद्धिमति प्रदेशे निवसाम इत्युक्त्वा सर्वे स्वमतं वदन्तु इति उक्तं तारेण [12]। अत्र वानराणां राजनीतिः प्रजासत्तात्मक एव आसीत् इति स्पष्टतया ज्ञायते । तारः स्वयं वरिष्ठः कपिः तथापि सर्वानुमतेनैव निर्णयः कर्तव्यः इति ज्ञानमासीत् तस्येति ज्ञायते ।

तृतीयसर्गे सुग्रीवहनूमन्तौ सीतां दृष्टवन्ताविति वर्णितम् । ऋष्यमूके तेषां वासः आसीत् । तं ऋष्यमूकं अद्यापि कर्णाटकराज्यस्य 'हम्पि'[13]इति प्रदेशे प्रदर्शयन्ति मार्गदर्शकाः ।

षष्ठे सर्गे युद्ध- समये लङ्कापतेः स्थितिः कथमासीदिति ज्ञायते अनेन श्लोकेन

सान्त्वनं श्रृण्वतः कैश्चित् मन्त्रिणो ब्रुवतः परैः।

---

[10] http://www.google.co.in

[11] ल.रा- सर्गः६ १३ श्लो
[12] लघुरामायणम्, पञ्चमसर्गः , श्लोकसङ्ख्या ५५

[13] ल. रा ३ सर्गः, ६१ श्लो

मुखैस्तदन्यैरखिलैर्विलापोस्य न हीयते ॥[14]

अत्र दशमुखः रावणः कैश्चित् मुखैः मन्त्रिभिः सान्त्वनवचनानि शृणोति । कैश्चित् मुखैः स्वयं मन्त्रिणः युद्ध विषये किङ्कर्तव्यमिति पृच्छति । अन्यैश्च मुखैः कुम्भकर्णस्य मरणवार्तां श्रुत्वा विलपति इति तस्य दयनीय -स्थितिं वर्णयन् राज्ञः दुष्टनिर्णयः कथं तं अधोगतिं प्रापयतीति बोधयति ।

तथैव युद्धवर्णनसन्दर्भे नैकानां कपीनां राक्षसानाञ्च नामानि उल्लिखितानि यथा गजः, गवाक्षः, गवयः, गन्धमादः, कत्थनः, वृकः,नीलः, विविदः, मैन्दः,श्वेतः, सम्पातिः, उग्रः, दुर्मुखः, पनसः, वृषः, नलः, तारः, सुग्रीवः, अङ्गदः, जाम्बवान्, विभीषणादयः ।

वज्रदंष्ट्रः, प्रहस्तः, धूम्राक्षः, अकम्पः, कुम्भः, निकुम्भः, सुप्तघ्नः, यज्ञकोपः, शकुनिः, देवतापनिः, विद्‌युजिह्वः, प्रमाथीः, शुकः, नरान्तकः(अप्सरायां जातः रावणपुत्रः), देवान्तक, त्रिशिरः, अतिकायः(रावणपुत्रः), मकराक्षः, कुम्भकर्णः, इन्द्रजित्, महोदरः, यूपाक्षः, विरूपाक्षः, इत्यादयः रावणपक्षीयाः ।

षष्ठे सर्गे, यदा इन्द्रजिता प्रयुक्तैः महास्त्रैः कपयः मूर्छिताः तदा जाम्बवता उपदिष्टः हनूमान् सन्जीविनिनामकमौषधं आनेतुमुद्‌युक्तः । शतयोजनविस्तीर्णं गन्धमादनपर्वतञ्च आनीतवान् । अस्मिन् पर्वते विशल्यकरणी ,अमृतसञ्जीविनि, सवर्णकरिणी, सन्धानकरिणी इति औषधचतुष्टयस्य उल्लेखो वर्तते । विशल्यकरणीनाम्नीऔषधिः बाणान् शरिरात् निष्कासितुमुपयुज्यते । अमृतसञ्जीविनिनामकमौषधिः मृतान् उज्जीवयितुमुपयुज्यते । सवर्णकरिणीनामकौषधिः शरीरस्य नैजवर्णप्राप्त्यर्थमुपयुज्यते । सन्धानकरिणीनामकौषधिः शरीरात् विभक्तानवयवान् पुनः संयोजयितुमुपयुज्यते । एवं औषधमूलिकाभिः कथं शल्यचिकित्सादयः प्रचलन्ति स्म इति अनेन ज्ञायते । रामायणकालीनवैद्यकीयज्ञानं अस्मदपेक्षया अत्युत्तमम् आसीदित्यपि सुस्पष्टम् ।

---

[14] ल. रा ६ सर्गः, ९८ श्लो

अयोध्या पञ्चवटी, नन्दिग्रामः इत्यादीनि काव्ये उल्लिखितानि स्थलानि अद्यापि दरीदृश्यन्ते ।

सैद्धान्तिकदृष्ट्या काव्यस्यास्याध्ययनम्

मङ्गलाचरणानन्तरं वायुं वाल्मीकिं तथा स्वगुरुं स्तौति कविः । स्मृत्वा गुरुं मूलगुरुं पूर्वगुरुं आदिमूलगुरुं तथा देवता वासुदेवञ्च विद्याभ्यासी तु सिद्धिभाक् इति तन्त्रसारोक्तरीत्या[15] जगद्गुरुं श्रीमुख्यप्राणं रामायणस्य कर्तारं वाल्मीकिं तथा स्वगुरुं स्तुत्वा अस्याः सेवायाः फलं गुरुभ्यः तथा स्वस्मायापि स्यादिति धिया गुरुस्मरणम् कृतम् । अनेन ज्ञायते सर्वकार्याणां प्रारम्भे केवलदेवतावन्दनेन नालम् । किन्तु अवश्यं गुरुवन्दनं करणीयमिति ।

विश्वामित्रः स्वयागरक्षणार्थं रामलक्ष्मणौ नीतवान् । तदा सः रामं अस्त्रमन्त्रान् उपदिशति । वस्तुतः रामः विष्णोः अवतारः । मूलरूपे अवतारे वा भगवतः ज्ञानानन्दादिपूर्णः देहः । मन्त्रोपदेशः कृतः इत्यस्मात् भगवति अज्ञानस्य आरोपः भवति इत्युक्ते न तथा । अवतारकालेऽपि भगवतः ज्ञानं पूर्णम् । तथापि विश्वामित्रः मन्त्राणां प्रभावः बलवत्तरो भवतु इति रामस्य कर्णे मन्त्रपठनं कृतवान् नाम स्वयं मन्त्राणि जजाप अनन्तं विष्णुसन्निधाविति स्मृतेः तदा अस्त्राभिमानिदेवताः मूर्तिमत्यः तत्र उपतस्थुः ।[16]

सीतारामयोर्विवाहानन्तरं सीतां रामेण सह प्रेषयतः जनकस्य हृदये दुःखलेऽपि नासीत् यतो हि रामं सीतासमेतं सदैव हृदि ध्यायन्तं शोकः कुत्र । भगवतः सर्वान्तर्यामित्वचिन्तनेन दुःखं न भवतीति अत्र ज्ञेयः ।[17]

रामपरशुरामयोर्युद्धसन्दर्भे रामोऽपि विष्णोः अवतारः परशुरामोऽपि विष्ण्ववतारी । भगवतः अवतारेषु भेदो नास्ति । तथापि असुरमोहनार्थं युद्धस्य नाटकम् । अतुलनामकः दैत्यः ब्रह्मणः वरात् लोकव्याप्तः अवध्यश्च भूत्वा रुद्रस्य वरादपि अवध्योऽभवत् । तदा

---

[15] तन्त्रसारः

[16] ल. रा- १ सर्गः , १५ श्लो

[17] ल. रा-१ सर्गः , ३६ श्लो

ब्रह्मरुद्रौ तं भार्गवरामस्य उदरमाश्रित्य तिष्ठ इति उक्तवन्तौ । तदनुसारं सः भार्गवरामस्य उदरे आश्रयमाप्नोत् । यदा रामः शरं त्यक्तवान् तदा भीतः अतुलः बहिरागत्य रामबाणेन हतोऽभूत् । परशुरामः पराजितोऽपि स्वेनैव पराजितः । अतः भगवतः अजेयत्वमपि सिद्धम् ।

विराधनामकदैत्यं विराधवने रामः जघान । वस्तुतः विराधः तुम्बुरनामक गन्धर्वः । शापवाशात् दैत्यजन्म लेभे । तमनुगृहीतुं स्वस्य मूलरूपप्रापणार्थं तस्य वधमकरोत् ।

पञ्चवटी- क्षेत्रे सीतारामलक्ष्मणानां वनवासः आरब्धः । तदा मारीचः मायामृगरूपेण आश्रमे इतस्ततः अटन् जानक्याः मनः आकृष्टवान् इति रामायणे अस्ति । वस्तुतः सीता तु लक्ष्म्याः अवताररूपा। अतः तस्या अपि अज्ञानं नास्ति । तथापि भविष्यति काले राक्षसानां संहारः भवतु इति सङ्कल्पेन मृगं दृष्ट्वा मोहिता इव अभूत् इति । अतः अत्रापि कविः 'वञ्चयन्निव जानकीम्'[18] इत्यनेन वस्तुतः जानक्या स एव वञ्चितोऽभूदिति प्रतिपादयति । रामोऽपि सर्वं जानन् अपि मृगयार्थमगच्छत् [19]। सीतायाः लक्ष्म्याः नामस्मरणमात्रेण चण्डमुण्डाद्यसुराः त्रस्ताः भवन्ति । सा जानकी तु राक्षससंहारार्थं प्राकृतस्त्रीवत् आचरत् ।[20]

रावणः भिक्षुरूपेण सीतामपहरदिति वर्णितम् । अत्रापि शङ्कापरिहार कृतः । वस्तुतः सीता शङ्करेण प्रार्थिता श्रीरामं सेवितुं मूलरूपेण कैलासमगच्छत् । वस्तुतः लक्ष्मीनारायणौ नित्यावियोगिनौ । देशतः कालतः लक्ष्मी नारायणेन सह व्याप्ता । अतः तयोः वियोगः कदापि न चिन्तनीयः । किन्तु अत्र रावणस्य हननार्थं एतत्सर्वं कृतमिति ज्ञेयः । कैलासगमनात् पूर्वं सीताकृतिं रचयित्वा इन्द्रेण सह स्वसन्निधानं तत्र संस्थाप्य कैलासं

---

[18] ल रा- ३ सर्गः, ४५ श्लो

[19] ल रा- ३ सर्गः, ४६, ४७ श्लो

[20] ल. रा- ३ सर्गः, ५२ श्लो

जगाम सा सीता । असुरमोहनार्थं एवं कृतम् । सर्वे सीताकृतिमेव सीता इति भ्रान्तिमाप्नुवन्[21] ।रावणोऽपि तामाकृतिमेव जानकीति भ्रान्त्या नीतवान् ।

सुग्रीवहनुमन्तौ जानकी पूर्वं न दृष्टवती । तथापि ऋष्यमूके तौ दृष्ट्वा स्वाभरणान् अपातयत् । अनेन सीताकृतौ स्थितः इन्द्रः सर्वं जानन्नासीत् इति ज्ञेयः ।

रामः सीतामपश्यन् मूर्छितोऽभूदिति वर्णितं रामायणे । रामः सर्वज्ञः दुःखादिदोषवर्जितः । अतः असुरमोहनार्थमेवं कृतवानिति ज्ञेयम् । युद्धे रामः खरादिसहस्रसङ्ख्याकान् राक्षसान् अनन्त-रूपैः जघान । तस्य सीता-रक्षणं न दुष्करम् । सुराणां कार्यसिद्धये सीतामन्विष्यन्निव चचार । [22]

त्रैजटवने कबन्धनामकस्य बाहू कर्तयामास । वस्तुतः एषः कबन्धः दनुनामकगन्धर्वः ।

शापवशात् राक्षसयोन्यां जन्म लब्ध्वा सर्वान् पीडयति स्म । रामेण मुक्तिं प्राप्तवान् । निजगायकाय मुक्तिप्रदानेन हरेः वेदोक्त- भक्तप्रियता सिद्धा । [23]

ततः शबर्याश्रमं प्राप्य शबरीनामकवृद्धस्त्रियमनुगृहीतवान् । रामस्य सन्निधावेव अग्निप्रवेशं कृतवती सा । वस्तुतः सापि स्वर्गलोकस्थाप्सरस्त्री । शचीदेव्याः शापेन मतङ्गऋषेः आश्रमे जन्म लेभे । रामस्य निरीक्षणे एव स्वजीवनं यापयामास सा । रामदर्शनानन्तरं स्वलोकं प्राप्तवती ।[24]

रामः सुग्रीवस्य राज्याभिषेकं वालिनः संहारञ्च करोमीति प्रतिज्ञामकरोत् । तथापि सुग्रीवः रामबलस्य विषये संशयितमनाः आसीत् । तदा रामः स्वाङ्गुष्ठाग्रेण एव

---

[21] ल. रा- ३ सर्गः, ५४, ५५, ५६, ५७ श्लो

[22] ल. रा- ३ सर्गः, ६५, ६६ श्लो

[23] ल. रा - ३ सर्गः , ७१ श्लो
[24] ल. रा- ३ सर्गः, ७२ श्लो

दुन्दुभिनामकराक्षसस्य कलेवरं चिक्षेप । वाली एतं कलेवरं उत्थातुमप्यशक्तः आसीत् । तत् कलेवरं रसातले स्थितानां रुद्रवरेण अवध्यानां राक्षसाणामुपरि अपतत् । तेषां संहारश्च कृतः ।[25]

पुनः तस्य शङ्कानिवृत्यर्थं सप्ततालवृक्षानच्छिनत् । अत्र विशेषः विषयः वर्णितः । सप्ततालवृक्षाः ऋज्व्यां रेखायां नासन् । ते च वृक्षाः ब्रह्मपदप्राप्त्यर्थं तप्यमानाः राक्षसाः । ब्रह्मणः वरेण अवध्यत्वं प्राप्तं तैः । किन्तु श्रीरामः बाणेनैकेन वक्रतयाऽवस्थितान् तालवृक्षानच्छिनत् । तानसुरान् पाताले पातयित्वा तत्रस्थान् कुमुदिनीदैत्यानपि जघान ।[26]

वालीसुग्रीवयोर्मध्ये यदा युद्धः प्रवृत्तः तदा अभिज्ञानार्थं सुग्रीवं कण्ठहारं धर्तुमादिदेश रामः । अत्र श्रीनारायणावतारे रामे अज्ञानं कथं सङ्गच्छते । अतः लोकशिक्षणा -र्थमेवमकरोदिति ज्ञेयम् । यदि बन्धुजनेषु वैमनस्यं जातं तदा सहसैव एकस्य वधः न करणीयः । विचार्य तयोर्मध्ये पुनः मैत्रिभावं जनयितुं प्रयत्नः करणीयः इति लोकशिक्षणमत्र दीयते । [27]

रामः वृक्षस्य अधः अदृश्यो भूत्वा वालिसंहारं कृतवान् । अतः रामेण वाली वञ्चितः इति शङ्का उत्पद्यते । अस्याः परिहारः एवमुक्तः । वालिभयात् वा अन्यकारणात् रामः अदृश्यः नाभूत् । परन्तु यदि वालिनः समक्षं रामः अस्थास्यत् । तदा वाली शरणागतो अभविष्यत् । तदा अग्निसाक्षिपूर्वकं कृता प्रतिज्ञा मिथ्या जाता भवेदिति धिया वृक्षस्याधः अतिष्ठत् । [28]

---

[25] ल. रा - ४ सर्गः, १३, १४, १५ श्लो

[26] म. भा. ता- ६ अ, ८, ९, १० श्लो

[27] म. भा. ता- ६ अ, १६, १७ श्लो

[28] म. भा. ता- ६ अ. २० श्लो

सीतान्वेषणार्थं गताः कपयः कस्यांश्चित् गुहायां भोगासक्ताः तदा हनुमता उपदिष्टाः पुनः रामकार्ये नियोजिताः बभूवुः । कपिषु कथं रामकार्यविषये औदासीन्यमित्युक्ते दैत्यावेशादिति। यदा हनुमता उपदिष्टाः तदा दैत्यावेशात् मुक्ताः ।[29]

सीतान्वेषणे विफलाः कपयः प्रायोपवेशोद्युक्ताः रामकथां गात्वा प्राणान् त्यजामः इति रामकथागानमारब्धवन्तः । तां रामकथां श्रुत्वा सम्पातिनामकः पक्षी पूर्वं सूर्येण दग्धपक्षान् पुनः प्राप्तवान् । अनेन वृत्तान्तेन हरिकथाः अघटितघटना शक्ताः इति ज्ञायते ।

समुद्रोल्लङ्घनसन्दर्भे हनूमान् स्वस्य अध्यक्षस्य रामस्य व्याप्तोपासनामकरोत् । तदा तस्य देहः वृद्धिमाप्नोत् । अनेन यः भगवतः यं यं रूपं गुणं चिन्तयति सः तान् गुणान् प्राप्नोतीति विषयः ज्ञायते । [30]

समुद्रोल्लङ्घनसमये मैनाकः हनूमन्तं विश्रान्तिं स्वीकर्तुं विज्ञापयामास । वस्तुतः न श्रान्तोऽपि भक्तमनुगृहीतुं तमालिङ्गितवान् ।

मार्गे सुरसानाम्न्या रुद्धः । देवाः हनूमतः बलं लोकप्रसिद्धं कर्तुं सुरसामुखप्रवेशात् कोऽपि नागच्छेदिति वरमयच्छन् । तेन दृप्ता सा शतयोजनप्रमाणं स्वमुखमुदघाटयत् । तदा हनूमान् बृहदाकारो भूत्वा क्षणमात्रेण अङ्गुष्ठपरिमाणो भूत्वा बहिरागच्छत् । हनूमांश्चायं मुख्यप्राणावतारः । देवाः तस्मात् अवराः तथापि तेषु अनुग्रहं कर्तुं एवमकरोत् । अनेन देवानां वरस्य सत्यता सिद्धा तथा हनूमतः मार्गोऽपि अनिरुद्धः ।[31]

यदा हनूमान् अशोकवनध्वंसं कृतवान् तदा रावणाज्ञया इन्द्रजित् हनूमन्तं ब्रह्मास्त्रप्रयोगेण अबध्नात् । हनूमान् मुख्यप्राणावतारः , भाविब्रह्मा अपि गौरवं सूचयितुं

---

[29] ल. रा- ४ सर्गः, ५८ श्लो

[30] ल. रा- ५ सर्गः, १ श्लो

[31] ल. रा-५ सर्गः, १४ श्लो

बद्धः इव बभूव । किन्तु मूढ इन्द्रजित् पुनः अन्यैः पाशैः तमबध्नात् । तदा ब्रह्मास्त्रो निष्फलोऽभवत् इन्द्रजिता अगौरवः

सूचित इति हेतोः ।[32]

एवं लघुरामायणे अलङ्कारादिकाव्यसौन्दर्यवर्धकानां अंशानां , तथैव ऐतिहासिकोपयोग्यांशानां, तथा सिद्धान्तप्रमेयानाञ्च प्रतिपादनं सुष्टु कृतमित्यत्र न कोऽपि सन्देहः ।

२.३. श्रीराघवेन्द्रतीर्थाणां देशकालकृतयः

श्रीगुरुसार्वभौमाः इत्येव प्रसिद्धान् नैकभक्तानां कल्पद्रुम इव अभीष्टप्रदातृन् श्रीराघवेन्द्रतीर्थाख्यान् यतिश्रेष्ठान् को न जानाति? 'परिमळ' इत्याख्यः श्रीमन्यायसुधायाः व्याख्याग्रन्थः एभिरेव रचितः । अष्टचत्वारिशत् ग्रन्थानां प्रणेतारः मन्त्रालये विराजमानाः श्रीपादाः अद्यापि भक्तजनान् वृन्दावनमुखेन स्वरचितग्रन्थमुखेन च अनुगृह्णन्ति । तैः विरचितेषु ग्रन्थेषु द्वे लघुकाव्ये 'रामचारित्र्यमञ्जरी' 'कृष्णचारित्र्यमञ्जरी' इति अत्राध्ययनार्थं स्वीकृते । ततः पूर्वं श्रीपादानां देशकालादिविषयकज्ञानमवश्यकमिति धिया सङ्क्षेपेण अत्र दीयते ।

कर्णाटकराज्यस्य सुवर्णयुग इति प्रख्याते कृष्णदेवरायस्य शासनकाले आस्थानकविरासीत् तिम्मणभट्टो नाम विप्रः । चतुश्शास्त्रपारङ्गतोऽसौ वीणावादनेऽप्रतिमप्रतिभां प्राप्य 'वीणातिम्मणभट्ट' इत्येव प्रसिद्धोऽभूत् । तस्य भार्या गोपिकाम्बा नामसाध्वी ।

---

[32] ल. रा ५ सर्गः, ५८ श्लो

१५६५ क्रिस्ताब्दे विजयनगरपतनानन्तरं निराश्रितः पण्डितसमूहः तमिळुनाडुराज्यस्य तञ्जावूरुग्रामे चव्वप्पनायकस्य आस्थाने आश्रयं प्राप्यत । तत्पश्चात् कुम्भकोणनगरे श्रीसुरेन्द्रतीर्थ- श्रीविजयीन्द्रतीर्थाणामाज्ञानुसारं तत्रैव उवास ।

तिरुपतिक्षेत्रे श्रीश्रीनिवासं भक्त्या संसेव्य तदनुग्रहेण १५९८ क्रिस्ताब्दे, शालिवाहनशके १५१८ तमे वर्षे मन्मथनामसंवत्सरस्य फाल्गुणशुद्धसप्तम्यान्तिथौ मृगशिरानक्षत्रे लोककल्याणकारकं पुत्ररत्नं लेभाते भट्टदम्पती । वेङ्कटेशस्य अनुग्रहात् लब्धस्य शिशोः वेङ्कटनाथ इति नाम चकार पिता । नामकरणोपनयनादिजातकर्मसु सम्पन्नेषु विवाहस्य प्रक्रियाऽरब्धा । १६१६ क्रिस्ताब्दे सरस्वतिनाम्न्या कन्यया सह विवाहः समभूत् । पत्न्या सह कावेरीपट्टणे निवसतः वेङ्कटनाथस्य आर्थिकस्थितिः दयनीया आसीत् । पुत्रजननानन्तरं अध्ययनार्थं श्रीसुधीन्द्रतीर्थश्रीपादानां सन्निधौ आगच्छत् ।

भाट्टप्राभाकराणां मीमांसा , चन्द्रिकादिग्रन्थानामध्ययने रतः वेङ्कटनाथः नैकेषु वाक्यार्थेषु जयं प्राप्य प्रशस्तिभाजनोऽभूत् । तस्य अप्रतिमपाण्डित्यं दृष्ट्वा श्रीपादाः वेदान्तसाम्राज्यसिंहासनमलङ्कर्तुमेष एव समर्थः इति मत्वा दीक्षां प्रादात् । श्रीशके १५४३-१५४४ दुर्मतिनामसंवत्सरस्य फाल्गुणशुद्धद्वितीयायां श्रीमन्मध्वाचार्याणां वेदान्तसाम्राज्ये अभिषिक्तो बभूव । ततः प्रभृति श्रीराघवेन्द्रतीर्थाभिधा नैकग्रन्थान् विरचय्य प्रशस्तिसम्मानभाजना अभूवन् । तथा अतिमानुषकार्येष्वपि एषां महिमा प्रदर्शिता ।ग्रन्थरचने ,श्रीसितारामयोः पूजाकै~कर्ये, ज्ञानभक्तिवैराग्यादिसद्गुणे, शिष्यवात्सल्ये मध्वसिद्धान्तप्रतिष्ठापने तथा भक्तानुग्रहे एषां प्रसिद्धिः अद्यापि अद्वितीया ।

एवं श्रीरामप्दासक्ताः १६७१ क्रिस्ताब्दे १५९३ शालिवाहनशके विरोधिनामसंवत्सरस्य श्रावणबहुळद्वितीयायां सशरीरं बृन्दावनप्रवेशं चक्रुः । किन्तु वृन्दावनस्थोऽपि भक्तानामभीष्टान् अद्यापि पूरयति ।

श्रीराघवेन्द्रतीर्थविरचिताः कृतयः

राघवेन्द्रगुरुसार्वभौमविरचितानां कृतीनां नामानि अत्र दत्तानि ।

१.	ऋग्वेदविवृतिः	२.	यजुर्वेदविवृतिः
३.	सामवेदविवृतिः	४.	मन्त्रार्थमञ्जरी
५.	पुरुषसूक्तादिपञ्चसूक्तानां व्याख्याः	६.	दशोपनिषद् खण्डार्थः
७.	गीतार्थसङ्ग्रहः (गीताविवृतिः)	८.	गीताभाष्यप्रमेयदीपिकाटिप्पणी
९.	गीतातात्पर्यटीकाविवरणम्	१०.	तन्त्रदीपिका
११.	न्यायमुक्तावलिः	१२.	अणुभाष्यटीकातत्त्वमञ्जरी
१३.	ब्रह्मसूत्रभाष्य-तत्त्वप्रकाशिकाभावदीपः	१४.	अनुव्याख्यान-न्यायसुधापरिमळः
१५.	दशप्रकरणटीकाटिप्पणी	१६.	श्रीरामचारित्र्यमञ्जरी
१७.	श्रीकृष्णचारित्र्यमञ्जरी	१८.	तात्पर्यनिर्णयभावसङ्ग्रहः
१९.	वादावलिव्याख्यानम्	२०.	चन्द्रिकाप्रकाशः
२१.	तर्कताण्ड्वव्याख्यानम्	२२.	प्रमाणपद्धतिव्याख्यानम्
२३.	अणुमध्वविजयव्याख्यानम्	२४.	भाट्टसङ्ग्रहः
२५.	प्रातःसङ्कल्पगद्यम्	२६.	प्रमेयसङ्ग्रहः

२.४. श्रीरामचारित्र्यमञ्जरी

रामायणकथाधारितलघुकाव्येषु 'श्रीरामचारित्र्यमञ्जरी' अपि अन्यतमा । सम्पूर्णरामकथां एकादशश्लोकेष्वेव निबध्य गुरुसार्वभौमाः अणुत्वे महत्त्वं अदर्शयन्त । अर्थात् काव्यस्य लघुत्वेऽपि अर्थगाम्भीर्यो वा तत्त्वबोधनं वा बृहदेव इति ।

प्रथमश्लोके श्रीरामजननं, ताटकादिसंहारः, अहल्याशापविमोचनं, सीतास्वयंवरेत्यादिकथाः निरूपिताः । द्वितीयश्लोके परशुरामेण सह् युद्धं राज्याभिषेककथा निरूपिता । तृतीये रामस्य वनगमनं गुहेणार्चनं, चित्रकूटे पितुः दशरथस्य मरणवार्तां श्रुत्वा पितृकार्यादीन् व्यदधादित्यादिकथा निरूपिता । चतुर्थे श्लोके

भरताय पादुकानुग्रहः, शरभङ्गानुग्रहः, विराधहननं, अगस्त्यात् आयुधस्वीकारः इत्यादिकथा वर्णिता । पञ्चमे श्लोके पञ्चवट्यां शुर्पनखाविकृतिः, खरदूषणसंहारः, मारीचहननं, सिताकृत्यपहरणं रावणेन, जटायुं प्रति अनुग्रहः, कबन्धनिग्रहणमित्यादिकथाः निरूपिताः । षष्ठे श्लोके पम्पातीरे शबर्यै अनुग्रहः, हनुमता सह मेलनं, सुग्रीवेण साकं सख्यं, वालिसंहारः, सुग्रीवराज्यभिषेकः इत्यादिकथा वर्णिता । सप्तमे श्लोके सीतान्वेषणार्थं कपीनां प्रयत्नः हनुमता दृष्टा सीता, चूडामणेः लब्धिः, रामेणाज्ञप्तैः सुग्रीवाद्यैः सेतुनिर्माणकार्यमित्यादिकथा सूचिता । अष्टमे श्लोके रावणस्य पराजयः कुम्भकर्णहननं, गरुडेन कपीनामुज्जीवनं, विज्ञानास्त्रेण कपीनां रक्षणं, इन्द्रजित् संहारः इत्यादि

कथा निरूपिता । दशास्यस्य राक्षसानां च हननं, सीतायाः अग्निपरीक्षा , अयोध्यागमनं , रामस्य राज्याभिषेकः, च वर्णिताः । नवमे श्लोके रामराज्यस्य वर्णनम् । दशमे श्लोकेऽपि रामराज्यस्य शासनस्य वर्णनम् वर्तते । एकादशतमे श्लोके रामचरित्र्यमञ्जर्याः फलमुक्तम् ।

आलङ्कारदृष्ट्याऽध्ययनम्

श्लोकाः स्रग्धरावृत्ते निबद्धाः

श्रीमान् पूर्वं प्रजातो दशरथनृपते रामनामाथनीतो ।
विश्वामित्रेण मन्त्राहृदनुजसहितः ताटकां घातकोऽस्त्रम् ।
ब्रह्माद्यं प्राप्य हत्वा निशिचरनिकरं यज्ञपालो विमोच्या-
हल्याशापं च भङ्क्त्वा शिवधनुरुपयन् जानकीं नः प्रसीदेत् ।१।
म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् इति स्रग्धरा लक्षणम् ।

यथा रामायणे उल्लिखितानि तथैव अत्रापि कथाः वृत्तान्ताः निरूपिताः । अतः ऐतिहासिकदृष्ट्याऽपि उत्तमं काव्यमिदम् ।

सैद्धान्तिकदृष्ट्याऽध्ययनम्

काव्येऽस्मिन् नैकेषां प्रमेयाणामवबोधः भवति । एकैकशः पश्याम । श्रीमान् तथा पूर्वमिति शब्देन विष्णुः ग्राह्यः विष्णोः अनादित्वात् 'अनादि निधनो धाता........' इति विष्णुसहस्रनामसु । रामावतारात्पूर्वं सर्वे देवताः भूभारहरणार्थं महाविष्णुं प्रार्थयामासुः । तदा हरिः दशरथात् कौसल्यायायां प्रादुर्भविष्यामीति तान् अन्वगृह्णत् इति ज्ञेयः ।

इमौ च रक्षोधिपती वरोद्धतौ ।
जहि स्ववीर्येण नृषु प्रजातः ।
इतीरिते तैरखिलैस्सुरेश्वरैः ।
बभूव रामो जगतीपतिः प्रभुः ॥[33]

गृहे दशस्यन्दनामिनोऽभूत् ।
कौसल्यकानाम्नि तदर्थितेष्टः ॥[34]

विश्वामित्रेणाहरत् अस्त्रान् इत्यत्र रामस्य अस्त्रविषये अज्ञानं कथं सङ्गच्छते । नारायणः सर्वज्ञः अवतारे ज्ञानस्य न्यूनता नैव ।

विश्वामित्रेण बलातिबलनामकास्त्रान् आहरदित्यत्र रामः अस्त्रमन्त्रान् अज्ञजनमोहनार्थं पठितवान् । वस्तुतः मन्त्रस्वीकारः विश्वामित्रानुग्रहार्थमेव इति ज्ञेयः ।

अनुग्रहार्थं स ऋषेरवाप ।
सलक्ष्मणोऽस्त्रं मुनितो हि केवलम् ।
ववन्दिरे ब्रह्ममुखाः सुरेशा-
स्तमस्त्ररूपाः प्रकटाः समेत्य ॥[35]

---

[33] म भा ता नि ३अध्यायः, श्लो ६२

[34]म भा ता नि ३अध्यायः, श्लो ६३

[35] म भा ता नि ४अध्यायः, श्लो ६

'अनन्तं विष्णुसन्निधौ' इति वचनात् भगवतो रामस्य कर्णसमीपे जजाप । तेन भगवदुनग्रहं प्राप । अन्यथा नीचेन उच्चाय मन्त्रदाने निग्रह एव स्यात् नानुग्रहः इति भावः इति वादिराजीये ।

अहल्याशापप्रसङ्गः- अहल्या परमपतिव्रता इति प्रातःस्मरणीया सञ्जाता । किन्तु अन्यपुरुषसङ्गात् तस्याः पातिव्रत्यहानिर्न बभूव । वस्तुतः अहल्यायां पातिव्रत्यनाशादिदोषाः न सन्ति यतः प्रारब्धकर्मवशात् इन्द्रेणोपभुक्ता सा । गौतमस्य पुण्यहरणार्थं इन्द्रेण कृतमिदं कृत्यम् । गौतमगोत्रोद्भवस्य तस्य नाम शरद्वानिति किन्तु गौतम इत्येव सः प्रसिद्धः। गौतमेन शप्तः इन्द्रः सहस्रयोनिरभूत् । वस्तुतः गौतमाशापात् इन्द्रस्य कापि हानिः न बभूव तारतम्ये तस्य उत्तमत्वात् । गौतमस्य पुण्यह्रासार्थं भगवत्सङ्कल्पानुसारं अहल्याशाप -प्रसङ्गः ।

गौतमेन शप्ता अहल्या शिलारूपा अभवत् । चेतनस्य अचेतनत्वं कदापि नास्ति । शिलायां सा प्रविश्य तपः तेपे इति ज्ञेयम् "दुष्टे त्वं तिष्ठ दुर्वृते शिलायामाश्रमे" इत्युक्तेः ।[36]

सीतास्वयंवरः- सीतास्वयंवरे एव सीतारामयोः सङ्गमः समजनि । तत्पूर्वं तयोः समागमः नाभवत् इति न । सीतारामौ लक्ष्मीनारायणावतारिणौ । अनादिनित्यदम्पत्योः वियोगः कदापि न चिन्तनीयः । स्वयंवरोऽपि राम एव सीतायाः पाणिग्रहणं करिष्यतीति निश्चितज्ञानेनैव आयोजितः जनकेन नारदवचनात् । अन्यथा अनर्थसाधनो भवेत् ।[37]

देवता अपि एतयोः स्वयंवरविवाहाद्युत्सववीक्षणोत्सुकाः तत्र स्थिताः न सीतायाः पाणिग्रहणेच्छया ।

यथा पुरा सागरजास्वयंवरे ।
सुमानसानामभवत् समागमः।

---

[36] आध्यात्मरामायणं, बालकाण्डः, ५,श्लो २७

[37] आध्यात्मरामायणं, बालकाण्डः, ६ ,श्लो ६३

तथाह्यभूत् सर्व दिवौकसां तदा ।
तथा मुनीनां सह भूभृतां भुवि ॥[38]

रामपरशुरामयोर्युद्धः- परशुरामः रामं युद्धाय आह्वयत् । न क्रोधो नेदं युद्धम् । रामपरशुरामयोरभेदज्ञपनार्थमेव एवं कृतम् । तेन च उभावपि विष्णू एवेति सिद्धिश्च ।

स इत्थमुक्त्वा नृपतिं रघूत्तमं ।
भृगूत्तमः प्राह निजां तनुं हरिः ।
अभेदमज्ञेष्वपि दर्शयन् परम् ।
पुरातनोऽहं हरिरेष इत्यपि ॥[39]

'अजानत्सु सज्जनेषु परं मुक्तिसाधनं अवताराभेदं दर्शयन्' इति वादिराजीये ।

युद्धोद्योगः अतुलनामकराक्षस-संहारार्थञ्च ।

पुरातुलो नाम महासुरोऽभूत् ।
वरात् स तु ब्रह्मण आप लोकताम् ।
पुनश्च तं प्राह जगद्गुरुर्यदा ।
हरिर्जितस्स्याद्धि तदैव वध्यसे ॥[40]

अतुलनामकः परशुरामस्योदरे स्थित्वा तपस्तेपे । किन्तु रामबाणं दृष्ट्वा भीतः हरिः पराजितः इति मत्वा उदाराद्बहिरागत्य स्वप्राणान् तत्याज ।[41]

अतुलः तपोबलात् लोकमयः अर्थात् लोकव्यापी अभवत् । परशुरामोदरस्थः अतुलः नष्टः | तेन सह लोकमयं तपोऽपि ननाश "लोकास्त्वप्रतिमा राम निर्जितास्तपसा मया जहि

---

[38] म भा ता नि ४ अ, ३५ श्लो

[39] म भा ता नि ४ अ, ४३ श्लो

[40] म भा ता नि ४ अ, ५५ श्लो

[41] म भा ता नि ४ अ, ५६,५७,५८ श्लो

तान् शरमुख्येन” [42]इति परशु रामवचनात् अतुलस्य तपः लोकमयत्वमपि नष्टमिति ज्ञेयः ।

ननु रामोदरगस्य रक्षसो विनाशे समस्तलोकान्तप्रविष्टतदंशानां कथं नाश इति चेदित्थम् । लोकव्याप्तेः मूलभूततपोनाशात्, अंशिनो नाशात् अस्त्र- प्रयोगसमये रामजप्तमन्त्रसामर्थ्याच्चेति ब्रूमः । अत एव तपो दग्धमिति प्रवदन् मुमोद इत्युक्तम् इति वादिराजीये ।

द्वितीयश्लोके भगवतः अनन्तकल्याणगुणपूर्णत्वं, निर्दोषत्त्वं, सर्वान्तर्यामित्वञ्च प्रतिपादितानि ।

तृतीयश्लोके कैकेयी प्रीतिहेतोः इत्यनेन कैकेय्याः प्रीत्यर्थं तथा पित्राज्ञापरिपालनार्थं रामः अरण्यं जगाम इति ज्ञायते । किन्तु भरतस्य माता रामं स्वसुतादपि अधिकप्रेम्णा अपालयत् । तथापि सा कथं रामराज्याभिषेके विघ्नकारिणी अभवदिति शङ्का उत्पद्यते । वस्तुतः कैकय्यां निकृतिनाम्न्याः आसुर्यावेशः आसीत् ।

मातृणां चापि तल्लोकस्त्वयुताब्दादितोऽग्रतः ।
अनर्हायास्त्वयाऽज्ञप्ता कैकेय्या अपि सद्गतिः ॥[43]

कैकेयी तु दुष्टया मन्थरया दुर्बोधिता आसीत् । मन्थरा तु अलक्ष्मीरेव । तपस्तप्त्वा दुन्दुभीनाम्नी

गन्धर्वी अभवत् । दासी भूत्वा रामराज्याभिषेकविघ्ना भव योग्यां गतिं प्राप्नोषी इति ब्रह्मवरात् सा मन्थरा नाम्ना जाता । तथैव रामराज्याभिषेके विघ्नकारिणी भूत्वा तमसं स्वयोग्यगतिं प्राप्ता ।

पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी ततः ।
मन्थरा मानुषे लोके कुब्जा समभवत्तदा ॥[44]

---

[42] बालकाण्डः, ७६.१६
[43]म भा ता नि ९अ, ९५ श्लो

मन्थरा नाम कार्यार्थं अप्सरा प्रेषितासुरैः ।
दासी काचन केकय्या दत्ता केकयभूभृता ॥[45]

स्वगतिं स्वस्य योग्यां गतिमन्धं तम इत्यर्थः । अपवर्गमित्यस्या भ्रममुत्पादयितुं स्वगतिमित्येवोक्तम् इति वादिराजीये ।

तथा रामस्य वनगमनमपि पूर्वनियोजितमेव । पित्रोः वाक्यपालनं तु अमुख्योद्देश्यम् । मुखोद्देश्यं तु देवतानां मुनीनां कार्यसिद्ध्यर्थं अर्थात् राक्षसवधार्थमिति ज्ञेयम् ।

शक्तोऽपि राघवस्तस्मिन् राज्यं सन्तज्य धर्मतः ।
दशग्रीव -वधार्थाय पितुर्वचनहेतुना ॥ [46]

दशरथस्य प्राणवियोगः

'व्युप्ततीर्थः' इत्यनेन दशरथस्य प्राणत्यागादि कथाः ज्ञेयाः । दशरथः रामवियोगात् त्यक्तप्राणः । श्रीहरिं सुतत्वेन प्राप्तस्य दशरथस्य पुत्रवियोगः वृद्धदम्पत्योः शापादेव । पूर्वं मृगयार्थं गतः दशरथः मृगभ्रान्त्या अन्धवृद्धदम्पत्योः एकमात्रपुत्रं पितृशुश्रूषानिरतं श्रवणकुमारं शब्दवेधिविद्यया हत्वा तत्- पितृभ्यां 'पुत्रशोकहेतोः प्राणवियोगः स्यात् इति शप्तः । अतः तस्य प्राणवियोगकाले रामलक्ष्मणभरतशत्रुघ्नाः तत्र नासन् ।

एतस्मिन्नेव काले दशरथनृपतिः स्वर्गतोऽभूद्वियोगात् ।
रामस्यैवाथ पुत्रौ विधिसुतसहितैर्मन्त्रिभिः कैकयेभ्यः ।
आनीतौ तस्य कृत्वा श्रुतिगणविहितप्रेतकार्याणि सद्यः ।
शोचन्तौ राममार्गं पुरजनसहितौ जग्मतुर्मातृभिश्च ॥[47]

---

[44] वन- २७७, १३

[45] पद्मपुराणे
[46] पद्मपुराणस्य उत्तरखण्डे

[47]म भा ता नि ५ अ, ५ श्लो

कुरङ्गासुरसंहारः- 'काकनेत्रं' इत्यनेन कुरङ्गासुरसंहारवृत्तान्तः प्रतिपादितः । वस्तुतः इन्द्रसुतः जयन्तः असुरावेशात् काकासुरो भूत्वा सीतारामविहारसमये तत्रागतः । 'धरान्तरचर' नाम्ना काकेषु प्रविष्टः सः सज्जनान् पीडयति स्म । तदा कुरङ्गनामकः असुरः काकस्य द्विनेत्रत्वं यावत् तावत् मम मृत्युर्नस्यादिति वरं प्राप्य दुष्कार्येषु रत आसीत् । कुरङ्गेनाविष्टः धरान्तरचरः दुर्बुद्ध्या सीतास्तने चञ्चुं व्यधात् । तदा रामेण त्यक्तं तृणं अस्त्ररूपेण तमनुधावित्वा अमारयत् ।

स चासुरावेशवशात् रमास्तने ।
यदा व्यधात् तुण्डमथाभिवीक्षितः ।
जनार्दनेनाशु तृणे प्रयोजिते ।
चचार तेन ज्वलतानुयातः ॥[48]

शरणागतं जयन्तं अन्वगृह्य कुरङ्गासुरं अहन् ।

पुनः प्रयातः शरणं रघूत्तमं ।
विसर्जितस्तेन निहत्य चासुरं ।
तथाक्षिगं साक्षिकमप्यवध्यं ।
प्रसादतश्चन्द्रविभूषणस्य ॥[49]

नेत्रविनष्टिर्नाम अक्ष्णः नाशमिति न भावः । चक्षुरिन्द्रियम् एक एव इति भावः । तस्मात् काकानां चक्षुर्मात्र नाशो , न सर्वथा नाश इति भावः । तदेकनेत्रा इत्यत्र तत् तस्मात् कारणात् अन्येऽपि वायसा एकनेत्रा बभूवुरिति योजना । गोलकद्वयेऽपि एकमेवेन्द्रियम् । द्विपत्रिकवत् कार्यानुसारेण रामकृपया इतस्ततश्चरतीति एकनेत्रत्वं न त्वेकस्य गोलकस्यापि नाशः - इति वादिराजीये ।

अत्र काकानां कोऽपराधः इत्युक्ते असुरप्रवेशाङ्गीकारः एव दोषः[50] । भविष्यति काले काकानां एकनेत्रत्वं किमित्युक्ते सत्यं यतो हि यदि काकानां द्विनेत्रत्वं तर्हि पुनः

---

[48] म भा ता नि ५ अ, १० श्लो

[49] म भा ता नि ५ अ, १२ श्लो

कुरङ्गासुरस्य अवध्यत्वम् [51]। किन्तु कल्पान्तरे पुनः काकानां द्विनेत्रत्वं कुरङ्गासुरप्रवेशः रामवतारे तस्य संहारः ल्इति ज्ञेयः ।

शरभङ्गानुग्रहः- तापसेष्टं कुर्वन् इत्यनेन शरभङ्गऋषेः प्रसङ्गः उल्लिखितः । शरभङ्गर्षिः झर्झरिताङ्गः अग्निप्रवेशार्थं अनुमतिं प्राप्तुं निरीक्षते स्म । रामस्याज्ञां प्राप्य अग्निप्रवेशव्याजेन मोक्षं प्राप्तवान् । परमत्र स्वप्राणत्यागः आत्महत्या इति गण्यते आत्महत्या न दोषावहा यतः शरभङ्गः झर्झरितदेहः नित्यकर्मानुष्ठानेऽपि असमर्थ आसीत् । अतः साधनारहितशरीरत्यागमकरोत् इत्येवाशयः कवेः ।[52]

विराधस्योद्धारः- विराधं हत्वा इत्यत्र विराधस्य बाहुद्वयं कर्तयित्वा इत्यर्थः । विराधः रामलक्ष्मणौ स्वभुजे गृहीत्वा तौ हन्तुमुद्युक्तः । तदा रामः तस्य बाहुद्वयं कर्तयित्वा गर्ते संस्थाप्य तमन्वगृह्णत् ।तुम्बुरनामकगन्धर्वः ऊर्वशीसङ्गात् कुबेरेण शप्तः विराधनामकासुरोऽभूत् ।

रामोऽपि तत्र ददृशे धनदस्य शापात् ।
गन्धर्वमुर्वशिरतेरथ यातुधानीम् ।
प्राप्तं दशां सपदि तुम्बुरनामधेयम् ।
नाम्ना विराधमपि शर्ववरादवध्यम् । [53]
तस्य प्रार्थनानुसारं तं गर्ते स्थापयित्वा तं विराधदेहादमोचयत् ।

शार्ङधनुःप्राप्तिः

[50]म भा ता नि ५ अ, १५ श्लो
[51]म भा ता नि ५ अ, १६ श्लो
[52] म भा ता नि ५ अ, १८,१९ श्लो

[53]म भा ता नि ५ अ, २० श्लो

अगस्त्यात् धनुषः प्राप्तिः अत्र उल्लिखिता । रामावतारात् पूर्वं हरिणा स्वीयं धनुः इन्द्राधीनकृतम्, इन्द्रः तदेव अगस्त्यमुनयेऽदात् । रामः अगस्त्यात् पुनः तद्धनुः स्व्यकरोदिति ज्ञेयम् ।

आत्मार्थमेव हि पुरा हरिणा प्रदत्त-
मिन्द्रे तदिन्द्र उत रामकरार्थमेव ।
प्रादादगस्त्यमुनये तदवाप्य रामो ।
रक्षन् ऋषीनवसदेव स दण्डकेषु ॥[54]

अनुशासनपर्वेऽपि शार्ङ्गप्राप्तेः कथा वर्तते ।

सीतापहारवृत्तान्तः - रावणेन अपहृता तु न साक्षात् सीता । सीता साक्षात् लक्ष्म्याः अवतारः । रावणं निगृहीतुं सा समर्था एव किन्तु तेन कारणेन राक्षसवधः रामावतारस्य उद्देश्यमासित् । अतः अज्ञवत् आचरितम् । मायामृगप्रसङ्गेऽपि एवमेव इति ज्ञेयम् । सीता स्वीयामाकृतिं निर्माय तस्यां स्वसन्निधानयुतायाम् व्यवहाराय इन्द्रं प्रावेश्यकैलासं जगाम । अस्यां आकृत्यां लक्ष्मीस्वरूपा वेदवती चासीत् ।

देव्याः समीपमथ रावण आससाद ।
साऽदृश्यतामगमदप्यविषह्यशक्तिः ।
सृष्ट्वाऽत्मनः प्रतिकृतिं प्रययौ च शीघ्रम्।
कैलासमर्चितपदा न्यवसच्छिवाभ्यम् ॥[55]

तस्यास्तु तां प्रतिकृतिं प्रविवेश शक्रो ।
देव्याश्च सन्निधियुतां व्यवहारसिद्ध्यै ।
आदाय तामथ ययौ रजनीचरेन्द्रो ।

---

[54] म भा ता नि ५ अ, २३ श्लो

[55] म भा ता नि ५ अ, ३७ श्लो

हत्वा जटायुषमुरुश्रमतो निरुद्धः ॥[56]

सीतामन्विष्यन् रामः अतिदुःखित इव चचार । किन्तु नारायनावतारे रामे न दुःखादिदोषाः । सर्वज्ञस्य अज्ञानं च न , अज्ञजनमोहनार्थं तथा भक्तेभ्यः लीलाप्रदर्शनाय च तथा चकारेति भावः ।

अन्वेषमाण इव तं च ददर्श गृध्रम् ।
सीतां रिरक्षिषुमथो रिपुणा विशस्तम् ।
मन्दात्मचेष्टममुनोक्तमरेश्च कर्म ।
श्रुत्वा मृतम् तमदहत् स्वगतिं तथाऽदात् ॥[57]

कबन्धोद्धारः- कबन्धनामकराक्षसः रामलक्ष्मणौ आक्रम्य ताभ्यां छिन्नहस्तोऽभूत् । पूर्वं दनुनामकगन्धर्वः स्थूलशिरनामकान्मुनिना शप्तः राक्षसोऽभूत् । रामावतारे रामेण तस्य विमोचनमभवत् । श्रिया विराजितं पुत्रं दनुनाम्ना च दानवं ....[58]

शबर्यै अनुग्रहः- अतिरूपात् दर्पिता शचीदेव्या शप्ता । सेयं शबरी बभूव मतङ्गाश्रमे उवास च । मतङ्गऋषेः आज्ञानुसारं रामनामस्मरणं कुर्वन्ती रामस्य निरीक्षण एव जीवनं यापितवती । रामाय फलं दत्वा तस्यानुग्रहं प्राप्य उत्तमगतिं प्राप्तवती ।

हनूमतः जीवोत्तमत्वम् - हनूमान् जीवोत्तमस्य वायोः अवतारः । सोऽयं वायुः त्रेतायां हनुमदवतारेण, द्वापरे भीमरूपेण, कलौ मध्वरूपेणवातरत् । अत्र वायुः नाम मुख्यवायुः मुख्यप्राणः इत्यर्थः । तत्त्वाभिमानिदेवताः तस्य आज्ञानुसारमेव कार्यं कुर्वन्ति[59] ।

---

[56] म भा ता नि ५ अ, ३८ श्लो

[57] म भा ता नि ५ अ, ४१ श्लो

[58] वाल्मीकिरामायणे ७१, ७

[59] म भा ता नि ५ अ, ४६-४८ श्लो

सप्ततालच्छेदः- 'सप्तच्छित्वा' इत्यनेन सप्ततालवृक्षानां छेदनं निरूपितम् । रामः वालिवधे समर्थः इति प्रतिपादयितुं सप्ततालवृक्षानच्छिनत् । वस्तुतः ब्रह्मवरात् अवध्याः राक्षसाः तालवृक्षरूपेण स्थिताः । तान् अनेन व्याजेन संहृतवान् इति ज्ञेयम्[60] ।

वालीसंहारः- 'वालिभित्' इति विशेषणेन वालीसंहारः निरूपितः । वालिनं पृष्ठतः हत्वा युद्धनियमं नोल्लङ्घयामस रामः । रामः यदि वालिनः समक्षं स्थित्वा युद्धमकरिष्यत् तर्हि रामभक्तः वाली शरणागतोऽभविष्यच्च । शरणागतस्य हननं तु शास्त्रविरुद्धम् । परदारागमनदोषयुतस्य वालिनः शासनमवश्यमासीत् । अतः रामः तं पृष्टतः ममार ।

भक्तो ममैष यदि मामपश्यतीह ।
पादौ ध्रुवं ममसमेष्यति निर्विचारः ।
योग्यो वधो न हि जनस्य पदानतस्य ।
राज्यार्थिना रविसुतेन वधोऽर्थितश्च ॥[61]

बाणप्रहारानन्तरं यदि जीवितुमिच्छसि तर्हि उज्जीवयामीति यदा रामेणोक्तं तदा वाली नाङ्गीचकार । वाल्मीकिरामायणेऽपि अस्य उल्लेखो वर्तते ।

त्वत्तोऽहं वधमाकाङ्क्षन् वार्यमाणोऽपि तारया ।
सुग्रीवेण सह भ्रात्रा द्वन्द्वयुद्धमुपागतः ॥[62]

अग्निपरीक्षा- सीता रावणस्य वशे आसीत् । अतः तस्याः पातिव्रत्यपरीक्षार्थं अग्निप्रवेशमाज्ञापयामास रामः । मर्यादापुरुषोत्तमः लोकमातरं परमपावनीं सीतां न शशङ्क

---

[60] म भा ता नि ६ अ, ८ श्लो

[61] म भा ता नि ६ अ, १९ श्लो

[62] वाल्मीकिरामायणे, किष्किन्धाकाण्डे, १८. ६०

पतिव्रत्यै । किन्तु सीताकृतिं अग्नौ स्थाप्य कैलासादागताया मूलसीताया आप्त्यर्थं तथाविधानम् ।

जानन् गिरीशालयगां स सीतां ।
समग्रहीत् पावकसम्प्रदत्ताम् ।
मुमोद सम्प्राप्य च तां स रामः ।
स चैव देवी भगवन्तमाप्य ॥[63]
सीताकृतौ स्थितां वेदवतीं पुनः श्रीनिवासो भूत्वा पद्मावतीं स्वीचकार इति भावः ।

एवं नैकान् प्रमेयान् श्रीमदाचार्यप्रणीतमहाभारत-तात्पर्यनिर्णयोक्तरीत्या सङ्गृह्य नित्यपारायणार्थं रामकथास्मरणार्थं विरचितमिदं लघुकाव्यम् ।

२.५. पाङ्घ्री श्रीनिवासाचार्याणां देशकालकृतयः

पाङ्घ्री श्रीनिवासाचार्यः नारदानुग्रहपात्रः इति सुप्रसिद्धः । मूलतः नान्देडपुरवासिनः अस्य पूर्वजाः । जमदग्निगोत्रोद्भवः श्रीभीमसेनाचार्यः अस्य कुलस्य मूलपुरुष इति ज्ञायते । भीमाचार्योऽपि नैकान् ग्रन्थान् विरचितवन्तः इत्यपि ज्ञायते । अस्य पुत्रः श्रीनिवासाचार्यनामकः महातपस्वी, परिनिष्ठितपण्डित आसीत् । कदाचिदेष गोदावरीतीरस्थं राहेरक्षेत्रमागतः । तत्रस्थ श्रीलक्ष्मीनृसिंहः कुलदेवता इति हेतोः दर्शनार्थम् आगतः । चत्वारिंशद्दिनानियावत् उग्रं तपः कृत्वा भगवन्तं तोषयामास । शालिवाहनशके १७२६ रक्ताक्षिनामसंवत्सरस्य कार्तिकशुद्धद्वादश्यां तिथौ (तुलसीविवाहः अस्मिन् दिने एव आचर्यते) अरुणोदयकाले यदा श्रीनिवासाचार्यः गोदावर्यां स्नातुमुद्युक्तः तदा

---
[63]म भा ता नि ८ अ, २२३ श्लो

आकाशमार्गे महतिनामकां दिव्यवीणां वादयन् श्रीनारदमहर्षिः तत्रागत्य दर्शनं दत्वा श्रीनृसिंहपञ्चाक्षरीमन्त्रमुपदिश्य तमन्वगृह्णत् । श्रीनिवासाचार्यः गोदावरीतीरस्थ-श्रीपुरुषोत्तमाचार्य-सकाशात् न्यायवेदान्तशास्त्रानधीत्य,तदनु सुधा, व्यासत्रयानप्यधीत्य घनपाण्डित्यं प्राप्तवान् । नित्यं अग्निहोत्रानुष्ठानं कुर्वन् कदाचित् बार्शि मण्डलस्थं पाङ्घ्री इति ग्राममेत्य तत्र निम्बपत्रभक्षणमात्रेण तपश्चकार । अनेन सुन्तुष्टः महादेवः तमन्वगृह्णत् । तदा ग्रामस्य मुख्यः देशपाण्डे-वंशीयः तत्र वासार्थं गृहं निर्माय तत्रैव स्थातुं न्यवेदत । ततः प्रभृति तेषां पाङ्घ्री इति वंशनाम अभवत् ।

प्राप्तभगवदुनुग्रहः एषः महिमाशाली इति ख्यात आसीत् । कदाचित् भोगापुरे श्रीप्राणदेवस्य प्रतिमा भिन्नाऽभूत् । तदा कृष्णराव् हच्चोळ्ळि इति कश्चन न्यायाधीशः स्वकुलदेवताप्रतिमां पुनः प्रतिष्ठापितुं श्रीनिवासाचार्यं प्रार्थयत । तदा दशदिनानि यावत् गर्भगृहे द्वारं पिधाय वायुस्तुति -पुरश्चरणं विधाय सकलशकलान् पुनः एकीकृत्य पुनः प्रतिष्ठापनञ्चकार ।

विजापुरमण्डलस्थ बलकुन्दि इति ग्रामस्य मुख्यस्य प्रार्थनामङ्गीकृत्य तत्र श्रीलक्ष्मीसहितं नारायणं प्रतिष्ठापितवान् । चिक्कोडिग्रामे सोमयागञ्च अकारयत् । एवं नैकानि महिमा- पूर्णकार्याणि कृतवान् ।

ततः हलसगीग्राममेत्य तत्र किञ्चितकालमुषित्वा शालिवाहन शके १७८३ तमे वर्षे वैकुण्ठवासी बभूव ।

श्रीनिवासाचार्यस्य कृतयः

पाङ्घ्रीश्रीनिवासाचार्य-विरचितानां कृतीनां नामानि अत्र दत्तानि ।

१.	सन्ध्याभाष्यम्	२.	विष्णुसहस्रनामभाष्यम्

३.	भेदबीजः	४.	तत्वबोधः
५.	आह्नीकपद्धतिः	६.	सदाचारस्मृतिः (व्याख्या)
७.	आह्नीकचन्द्रिका	८.	नारदस्तवः (टीकासहितः)
९.	सत्सारसङ्ग्रहणम्	१०.	शिक्षारामायणम्
११.	गीता त्रिविदार्थ विवृतिः	१२.	विष्णुपञ्चकनिर्णयः
१३.	शाण्डिल्यतत्त्वटीका	१४.	भागवत विरोधोद्धारः
१५.	द्वादशस्तोत्रटीका	१६.	जैमिनी अश्वमेधटीका
१७.	आर्यसिद्धान्तसङ्ग्रहः	१८.	ब्रह्मसूत्रनामावलिः
१९.	सूत्रभाष्यार्थः	२०.	मानसपूजापद्धतिः
२१.	गीतादिदशरूपनिर्णयः		

इतोऽपि ग्रन्थाः विरचिताः किन्तु न लब्धाः ।[64]

२.६. शिक्षा रामायणम्

संस्कृतसारस्वतसरसि काव्याम्बुरुहाणि विपुलानि । तत्र रामायण-कथाधारित-काव्यानां न विरला सङ्ख्या । एतादृशेषु काव्येषु पाङ्गरि-श्रीनिवासाचार्य-विरचित-शिक्षारामायणमप्यन्यतमम् ।

काव्यप्रकारे तु लघुकाव्यमेतत् । किन्तु अर्थगाम्भीर्ये गुरुत्वमस्य काव्यस्य श्लोकेषु सुस्पष्टम् ।

[64] माध्ववाङ्मयत[पस्विगळु- पु सं ६२५-६२६

यथा काव्यस्य नामैव निर्दिशति काव्येस्मिन् रामायणकथा-शिक्षारूपेति प्रतिश्लोकं शिक्षाः बोधयति कविः । काव्यस्यास्य श्रीपाङ्घ्रीकृष्णाचार्यविरचिता भावप्रकाशिका व्याख्यापि वर्तते । अस्यां व्याख्यायां काव्ये प्रयुक्तस्य एकैकस्य शब्दस्य नैकानर्थान् प्रकाशयति व्याख्याकारः । अनेन काव्यस्य अर्थगभीरता तथा कवेः प्रतिभा च दरीदृश्यते । काव्यमिदं सप्तकाण्डेषु निबद्धम् । यथारामायणम् काण्डानां नामानि दृश्यन्ते ।

बालकाण्डम्

प्रथमकाण्डे मङ्गलाचरणं कुर्वन् श्रीरामं स्तौति कविः-

श्रीरामं गुणवारिधिं निजजनत्राणेऽवतीर्णं क्षितौ ।
निर्दोषं जितशत्रुमब्दवपुषं पित्रार्थ्यनिष्कामुकम् ।
वैदेहीहृदये ततो बहिरपि व्याप्तं समीरात्मजान्-
वाचारेषु दयां परां विदधतं बक्तेष्टदं सम्भजे ॥

इति । गुणपूर्णं सर्वत्रव्याप्तं पितृवाक्यपरिपालकं भक्त-वत्सलं सीताकान्तं भक्त-रक्षकं रामं स्तौति । द्वितीयश्लोके हनूमन्तं वाल्मीकिमहर्षिणञ्च स्तौति कविः । भगवतः अनन्तगुणपूर्णत्वं वर्णयन् कविः तव गुणाख्याने नारदानुग्रहीतः वाल्मीकिरपि अल्पवाक् तथा मम विषये किं वक्तव्यमिति स्वाहङ्कारखण्डनं दर्शयति । रामायणे लोकशिक्षणमेव प्रामुख्यमभजत । अस्मिन् काव्येऽपि रमायणवृत्तान्तैः प्राप्यमाण-लोकशिक्षाबोधनमेव प्रमुखम् इति कवेः अभिप्रायः । भगवतः जन्म न कर्मवशादिति ब्रह्मादिभिः प्रार्थितः अवातरत् । दानशीलत्वं बन्धूनां उपकारः सर्वैः करणीयः इति सूचयितुं स्वजन्मपिण्डं पुत्रकामेष्ठियागस्य प्रसादरूपं चतुर्धा विभज्य अनुजानां जन्मकारणोऽभूत् एषः रामः । सदा पुत्रः पित्रोः आनन्दकरः स्यादिति शिक्षयन् स्वबाललीलादिभिः मातापितृन् तोषयामास । विद्यार्थी कदापि स्वजनविषये रतिं न प्रदर्शयेत् अथ वा स्वजने आसक्तो न भवेदिति ज्ञापयितुं विश्वस्य मित्रं विश्वामित्रं स्वगुरुरूपेण स्वीकृतवान् । गुरोराज्ञानुसारेण ताटकां हत्वा गुरोः बल –अतिबल इति अस्त्रान् प्राप्तवान् । एतत् केवलं लोकवडम्बनाय इति ज्ञेयः । सुबाहुमारीचौ विश्वामित्रस्य यज्ञभङ्गं कर्तुमुद्युक्तौ । तदा रामः सुबाहुं हत्वा मारीचं

अक्षिपत् । अनेन गुरूपसत्तिः कथं करणीया इति सूचिता । मनुष्यैः अदत्तं न लभ्यते अर्थात् मनुष्यः यद्यद्पदार्थान् निष्कामतया दानरूपेण दास्यन्ति तेन दानेन पुण्यं प्राप्य उत्तमफलानि अनुभवन्ति इति शिक्षयितुं अहल्यां शापमुक्तां कृत्वा गौतमाय दत्त्वा सीतां प्राप्तवान् । शिवधनुः भङ्क्त्वा अहङ्कारदमनं सूचितवान् रामः । शिवः अहङ्कारतत्त्वाभिमानी तथा मनोभिमानी च । अतः शिवधनुर्भङ्गेन अहङ्कारभङ्गः सूचितः । सद्बुद्धिरूपिणीं सीतां जनकात् प्राप्य पूर्वजन्माप्तदोषं निवारयितुं भार्गवपरशुरामेण सह योद्ध्वा लोकमयासुरं अतुलं जघान । अनेन पूर्वकृतदोषः निवारणीयः इति शिक्षा लभ्यते । अतुलसंहारेण दोषः सन्ताज्यः इति शिक्षयित्वा परशुरामरामयोः भेदः नास्तीत्यपि दर्शयामास । गृहस्थधर्मं गृहस्थः सदा रक्षयेदिति सूचयितुं सीतया सह रेमे ।

अयोध्याकाण्डः – यौवराज्याभैषेकसिद्धताः प्रचलिताः । पूर्वं परशुरामावतारे समस्तभूमण्डलं दानरूपेण ब्राह्मणेभ्यो दत्तवान् । अतः दत्तं पुनः न स्वीकर्तव्यमिति शिक्षितुं राज्यं त्यक्त्वा वनवासार्थं जगाम । पुरा पितृवाक्यपरिपालनार्थं मातुः रेणुकायाः शिरच्छेदनं कृतवान् । इदानीं मातुः कैकेय्याः वचनं पालितुं राज्यं त्यक्तवान् । यदि राज्ये एव भवति तदा दाक्षिण्याद् वा पिता भ्राता राज्यं दद्यादिति धिया विनयशालीतां सूचयन् राज्यं त्यक्तवानसौ । यदा राज्यं पितृभोग्यं तदा पुत्रेण न स्वीकर्तव्यमिति शिक्षितुं राज्यम् न स्वीचकार । अहं न दुर्बलः किन्तु क्षमागुणान्वितः अहं न क्लीबः किन्तु ब्रह्मचारी न भोगासक्तः किन्तु विरागी इति सूचयितुं वनं गतः । एका क्रिया रामस्य अनेकार्थयुता । अतः वने कृताः क्रिया अपि अनेकार्थशिक्षिकाः । यौव्वने स्वपत्न्या दूरे वासः शङ्कार्हः इति शिक्षितुं सीतया सह वनमगच्छत् । स्त्रियः पृथक् शयने न शयितव्याः इति शिक्षितुं सीतां स्वेन सह नीतवान् । सभार्यः संसृतिं इच्छेदिति शिक्षितुं तल्पं शेषं लक्ष्मणरूपिणं स्वेन सह नीतवान् । स्वतन्त्रस्य मम आयुधैः न किमपि प्रयोजनमिति शिक्षितुं आयुधाभिमानिनौ भरतशत्रुघ्नौ राज्ये निधाय गतवान् । भगवतः रामस्य व्यापारोऽयं विचित्रः यतः युद्धार्थं गच्छन् आयुधानि अर्थात् आयुधाभिमानिनौ हित्वा तल्पेन लक्ष्मणेन सह गच्छति । लोकविलक्षणमिदमिति कविः वक्ति । यदि सीतालक्ष्मणसहितः रामः पादचारी भूत्वा

गमिष्यति तदा तद्दृष्ट्वा दशरथादयः सोढुमशक्ताः इति रथेन अगच्छत् किञ्चिद्दूरम् । त्यक्ते राज्ये मयि रथेन किमिति दर्शयितुं रथं तत्याज । शत्रवोऽपि कार्यार्थगौरवार्थं सन्धेयाः किं पुनः नीचानां विषये इति सूचयितुं गङ्गां तर्तुं गुहस्य सेवां स्वीकृतवान् । एवं तमन्वगृह्णच्च । समुद्रगां गङ्गां तीर्त्वा मनः सन्तरणं कृत्वा अर्थात् मनस्सन्तोषं दत्वा गुहमप्यन्वगृह्णत् । स्वदुहितुः गृहे न स्थेयमिति हेतोः तथा अप्रसूः गङ्गा सीतां दृष्ट्वा दुःखं नानुभवेदिति हेतोः तत्र न उवास इति उत्प्रेक्षते कविः । पितुः दशरथस्य पूर्वजनुः कश्यपः । तस्य जातः सुतः इन्द्रः । इन्द्रस्य गुरुः बृहस्पतिः । स बृहस्पतिः रामः मं विस्मृतवान् किमिति सन्देहं कुर्यात् । अतः तत्परिहारार्थं बृहस्पतेः पुत्रस्य भरद्वाजस्याश्रमं गतवान् । वर्षाकाले भूमिः निम्ना च कृष्णा च भवति । जल- कर्दमादिभिः प्रयाणे क्लेशः जायेदिति शिक्षितुं भरद्वाजाश्रम एव उवास । रामविरहेण दुःखतप्तः राजा दशरथः मरणं प्राप्तवान् । अनेन दुःखितः भरतः राज्यादागत्य पुनः अयोध्यामागन्तुं प्रार्थयत् । किन्तु रामः तमनङ्गीकृत्य भ्रातृवात्सल्यं प्रदर्शयामास । कैकेय्या यः निर्बन्धः कृतः तं पालितुं पुनः राज्यं न स्वीचकार । पितुरनन्तरं राज्यं ज्येष्ठस्य रामस्यैव किन्तु स्वपादुकां दत्वा स्वयं भरतमन्वगृह्णत् । पितृकार्यं कृत्वा देवान् पितॄन् वसून् च तर्पयामास । अतः तस्य वसुदेवत्वं सिद्धमिति कविः तर्कते ।

अरण्यकाण्डम्

जनानुरागो यत्र भवति तन्न स्वास्थ्याय भवति । अतः चिरं तत्र न स्थेयः इति शिक्षयन् ततः दण्डकारण्यं प्राविशत् । इक्ष्वाकु-निमिज-वैकुक्ष्यादिभिः भुक्ता एषा भूरिति स्वपूर्वजानां भूरियमिति तत्र उवास । अनेन पुर्वजानां स्थानं त त्यक्तव्यमिति शिक्षा प्राप्यते । विराधनामकः असुरः विरुद्धज्ञानात् अहम् एव सर्वस्य कर्ता इति मत्तः अभूत् । तं संहृत्य सर्वस्य कर्ता विश्वेशः रामः न जीवाः इति शिक्षितवान् । वनचारी अपि सतां सङ्गं न त्यजेदिति शिक्षयन् शरभङ्गऋषेः आश्रमं तथा अगस्त्याश्रमं च गतवान् । सतां सङ्गतिः सदैव लाभादायिका इति सूचयितुं अगस्त्यात् धनुषं तथा अक्षयसायकं तूणीं स्वीचकार । गुरुग्रहस्य सिंहराशेश्च सङ्गमं वीक्ष्य गङ्गां तीर्त्वा गोदावरीतिरमगमत् । पञ्चवेदयुतां विद्यां

सर्वे आश्रयेयुरिति शिक्षयन् पञ्चवटीमगमत् । जनस्थानमिति प्रसिद्धं क्षेत्रं स्वजनाश्रयामकरोत् । अविद्यारूपायाः शूर्पनखायाः घ्राणश्रवणादिन् छित्वा अज्ञानसंशयविपरीतज्ञानमच्छिनत् । मदमत्सरदम्भद्योतकाः त्रिशीर्षखरदूषणसंज्ञकाः । तान् संहृत्य मदमत्सरादयः नष्टव्याः इति सूचयति । मारीचेन मृगरूपेण सद्धीरूपिणी सीता प्रलोभ्य रावणेन कामात्मना हृता ।

मारीचेन मृगेणैव सद्धीरक्षालसात्मना । प्रलोभ्य सन्मतिं सीतां कामात्मा रावणोऽहरत् ।।[65]

अनेन विशेषांशः द्योतितः । सद्धीः सीता । मारीचः सुवर्णमृगरूपः लोभद्योतकः । यदा सन्मतिः लोभेन आकृष्टा तदा कामेन अपह्रियते यथा कामात्मना रावणेन सीता हृतेति शिक्षा प्राप्यते । धैर्यरूपः जटायुः तं दुरासदं रावणं रोद्धुं प्रायतत किन्तु तेन विकृन्तपक्षो भूत्वा भूमावापतत् ।

रामः ज्ञानस्वरूपोऽपि लोकविडम्बनार्थं मृगं अन्वेषयन् तद्गतं मारीचं दृष्ट्वा तं जघान । आश्रममाप्य सीतां अदृष्ट्वा लोकमोहार्थं शोचित इव दृष्टः । मूलसीता कैलासं जगाम । रावण सिताकृतिं नीतवान् । एषः विषयः पूर्वं चर्चित इत्यनेन हेतुना पुनः न विशदीक्रियते । परशुरामजन्मनि मातृवधः कृतः पुनः अस्मिन् जन्मनि अहल्या पद्भ्यां स्पृष्टा इति स्त्रीवियोगः स्यादिति लोकमोहार्थं सन्देहं प्रकटितवान् । स्निग्धैस्सह वृद्धौ पितरौ विहाय वने तपश्चरेदिति दर्शयितुं शोकसंप्राप्तिं दर्शयामास । मार्गे धैर्यरूपिणं जटायुं दृष्ट्वा रावणेन सीता हृता इति तेन विज्ञाय तस्य अन्त्यसंस्कारादिकम् कृत्वा अग्रेऽगच्छत् । यस्य दोषः स एव दण्ड्यः इति शिक्षितुं कबन्धस्य बाहू निकृन्तवान् । यः स्वस्य आदरं करोति तस्य मनोरथं शोच्याऽपि पूरयेदिति शबर्या दत्तानि फलानि भुङ्क्त्वा फलप्रदो बभूव ।

किष्किन्धाकाण्डप्रारम्भः

असाध्यकार्यस्य साधने निष्णातं हनूमन्तं दृष्टुं पम्पातीरमगमत् । तत्र हनुमता सेव्यमानः तद्वाक्यात् ऋष्यमूकपर्वतं गत्वा सुग्रीवेण सह मित्रतां भेजे । यतो हि सुग्रीवः सूर्यांशः रामः

[65] शिक्षारामायणम्- अरण्यकाण्डः १३ श्लो

सूर्यवंशे जातः । अतः तयोः मित्रता झटित्यभूत् । सन्मतिलाभार्थं देवतानुग्रहः आवश्यकः । यदि मुख्यप्राणमादौ नमस्कृत्य तत्त्वपतीन् नमति तदा अभीष्टान् प्राप्नोतीति सूचयितुं पूर्वं हनुमता मेलनमभूत् । मित्रताप्राप्त्यर्थं स्वगुणान् प्रदर्शयेदिति शिक्षितुं दुन्दुभेः अस्थिं अक्षिपत्, तालवृक्षान् एकेन बाणेन अच्छिनत् । हरिद्वेषी मरुद्वेषी, हरिभक्तद्वेषी स्वकीयोऽपि हन्तव्यः इति शिक्षितुं वालिनं जघान ।

सुन्दरकाण्डप्रारम्भः

रामपत्नीशोधार्थं सुग्रीवः वानरान् दिक्षु विदिक्षु सम्प्रेषयामास । कामारेः शिवस्य वरात् दृप्तं कामरूपिणं रावणं जेतुं रामः निश्चितवान् । धैर्यबन्धुं नाम जटायुबन्धुं सम्पातिं वीक्ष्य अब्धितटमगात् । हृदयस्थं बिम्बं दृष्टुं जीवः विषयाम्बुधिं त्यजेदिति शिक्षितुं समुद्रं अस्पृष्ट्वा अगच्छत् । स्वगुणाच्छादिकां छायाख्यां हत्वा पराविद्यारूपां सुरसामपसार्य स्वादरार्थमागतं मैनाकं स्पृशन् लङ्कां प्राप्तवान् । लङ्कां प्रविश्य अशोकवने सीतामपश्यत् । रामाङ्गुलीयकं दत्वा तां तोषयामास । सशोकां सीतां अशोकां कृत्वा अशोकवनं सशोकवनं कृतवान् । तदनु अक्षकुमारं जघान । ब्रह्मास्त्रेण बद्धः शक्तोऽपि स्वपितृव्यं मानयन् रावणान्तिकमगच्छत् । पुच्छगताग्निना लङ्कादहनं कृतवान् । यं वृक्षमाश्रित्य सीता स्थिता तं ,तथा विभीषणस्य गृहं विहाय सम्पूर्णलङ्का दग्धा । अनेन ,जडोऽपि सन्मतेः सङ्गात् मुच्यते, मानवस्य विषये किं वक्तव्यमिति कैमुत्यन्यायेन सन्मतेःसङ्गः करणीयः इति शिक्षा प्राप्यते । पुनः हनूमान् चूडामणिं प्राप्य रामान्तिकमागत्य दृष्टा सीता इति रामं ननाम ।

युद्धकाण्डप्रारम्भः

रावणं हन्तुं रामेण सह सुग्रीवः वानराः सूर्य-वह्नि-कारूद्भवाः अपि जग्मुः । अङ्गदारूढः सौमित्रिः रामः हनूमदंसगो भूत्वा जाम्बवान्मुख्यैस्सह अब्धितटमगच्छत् । तत्र रामे उपस्थितेऽपि समुद्रः मार्गं न दत्तवान् । तदा रुद्ध इवाभवत् रामः । तदा समुद्रः विनम्रो भूत्वा सेतुं बध्नातुं सहाकरोत् । विभीषणः त्यक्ताग्रजः चतुर्भिः मन्त्रिभिस्सह रामं

शरणमगच्छत् । राक्षस-वंशे जातोऽपि सज्जनः स्वीकर्तव्य इति शिक्षितुं विभीषणं स्वीचकार रामः । सत्वाभावात् सामः उपयुज्यते वस्तुलोभात् दानं, वीर्याभावात् दण्डः इति कारणेन भेदं विधास्यन् शत्रुगेहं प्रविष्टुमुद्यतः । समुद्रस्य प्रार्थनां मानयन् सेतुबन्धनेन तमन्वगृह्णत् । पूर्वं समुद्रमिदं अगस्त्यमहर्षिणा आपोशनरूपेण स्वीकृतम् । पुनः प्रार्थितः ऋषिः मूत्ररूपेण समुद्रं मोचयामास । अतः अस्य अपावित्र्यं परिहर्तुं सेतुं बन्धयामास । सीतापहारकेण समुद्रः न स्पृष्टव्य इति हेतोः सेतुं बन्धयामास । यथा दक्षः रुद्रश्च कलहं कृत्वा शप्ताः तथा श्वशुरजामात्रोः कलहः न स्यादिति सेतुं बन्धयामास । शेष,निऋति, अर्क, वायुभिस्सह चतुर्विधपुरुषार्थैस्सह इव शत्रुपुरं जगाम । शत्रवः प्रथमतः नतमस्तकाः भवेयुरिति तेषां कीरिटालिं अपातयत् । चतुरोपायेषु यदि दानं क्रियते तर्हि भीरुरिति अकीर्तिः स्यात् । भेदस्तु विभीषणेन सिद्धः एव । अतः दण्ड एव यशोदः इति तमेव कृतवान् । अत्यल्पविघ्नान् अत्यल्पसाधनैः निरासितव्यमिति शिक्षयन् कपिभिः राक्षससैन्यं क्षीणञ्चकार । प्रहस्तादीन् तथा मन्त्रिणः जघान । क्रोधरूपिणं कुम्भकर्णं क्षमारूपबाणेन अमारयत् । महाकायस्य कुम्भकर्णस्य देहः समुद्रे पातितः। तेन समुद्रः स्वीयमर्यादां त्यक्तवान् । अनेन अमर्यादिन सह समर्यादः कथं भवेदिति शिक्षा प्राप्यते । स्वपुत्रं इन्द्रजितं हतमिति श्रुत्वा स्वयं युद्धभूमिं न्यविशत् रावणः । दुर्जयं मनः विचारेण जयेदिति शिक्षितवान् । स्वपुत्रं हतं दृष्ट्वा स्वमजेयम् कर्तुं अग्नौ जुहाव । तदा विघ्नं कर्तुं तस्य स्त्रीं प्रेषयामास रामः । तेन क्रुद्धः रावणः रथगः राक्षसैस्सह आगतः । तद्दृष्ट्वा इन्द्रः समातलिं रथं रामप्रीतये प्रेषयामास । तदारुह्य रामः रावणेन सह अयोध्यत । मम भार्यां त्वं हृतवान् किन्तु तव भार्यां अहं न हरे किन्तु तां अयक्षराट्पुरीं करोमीति इत्युक्तवान् । तेन सह योद्ध्वा तस्य हृदयमभेदयत् । पूर्वजन्मनि नृसिंहरूपि-परमात्मना हतः हिरण्यकशिपुरेव रावणः इदानीं रामेण हतः । चिरं अन्यत्र स्थितां स्त्रीं शपथं विना न स्वीकुर्यादिति शिक्षयन् अग्निपरीक्षां कारितवान् । वस्तुतः लोकमाहाय एव एवं कृतः । अग्निपरीक्षासमये अग्निः मूलसीतां कैलासस्थां ददौ । श्राद्धे स्वयं दशरथः स्नुषाहस्तेन भोक्तुम् आगतः । पुनः भरतं दृष्टुमुत्सुको भूत्वा कुबेरेण दत्तं पुष्पकविमानमारुह्य सभार्यः सानुजः अयोध्यां गच्छन्

प्रियायै किष्किन्धादिप्रदेशान् दर्शयामास । रामागमनं श्रुत्वा अत्यन्त -तुष्टो भरतादयः रामस्य स्वागतं आनन्दनिर्भरहृदयेन अकुर्वन् ।

अथ उत्तरकाण्डम्

वसिष्ठादीन् नत्वा पुरं प्राविशत् । प्रारब्धं भुञ्जानोऽपि जीवन्मुक्तो भवेदिति शिक्षयन् सिंहासनमारुरोह । विषयेषु अनासक्तः केवलकर्तव्यपालनार्थं राज्यं स्वीचकार इत्यर्थः । सुग्रीवादीन् स्वनगरं प्रेषयित्वा हनूमल्लक्ष्मणाभ्यां सदार्चितः राज्यमपालयत् । शत्रुघ्नात् लवणासुरं हत्वा राज्यं सदा निष्कण्टकं भवेदिति शिक्षितम् । मुक्तौ आनन्दवृद्धिः स्यादिति धिया जीवन्मुक्तोऽपि कर्माणि कुर्यादिति शिक्षयन् अश्वमेधं चकार । विद्वानपि लोकापवादतः भीतो भवेदिति सीतां प्रेषयामास । स्वसुतौ इमौ लवकुशौ इति जानन्नपि ताभ्यां रामगुणगानं श्रुत्वा सीतां अगृहत् । विवरं देहि मे मातः रामं विना अहं किमपि न जाने इति सीतायाम् उक्तायां रामाज्ञया भूः तां ग्रस्तवती । तेन दुःखित इव लोकमोहाय दर्शयन् सुवर्णसीताविग्रहं निर्माय विप्रेभ्योऽदात् । लवकुशौ राज्ये आस्थाप्य भरतसुतौ मधुवने, लक्ष्मणशत्रुघ्नौ मल्लदेशे , पश्चिमदेशे च संस्थाप्य मोक्षाकाङ्क्षिणः मत्साकमागच्छन्तु इति आघोषयत् । एवं भुक्तप्रारब्धभोगान् स्वेन सह मोक्षं नीतवान् इति उत्तरकाण्डकथा समाप्यते । नारदानुग्रहेण रचितस्यास्य काव्यस्य फलम्पि वक्ति कविः ।

योऽस्य श्रोता प्रवक्ता च तत्प्रीतेः पात्रतां व्रजेत् । तथात्र लब्धान् स्त्रीपुत्रान् पर्त्रत्वपदं व्रजेत् ॥ [66]

आलङ्कारिकदृशाऽध्ययनम्

अनुष्टुप् छन्दस्येव सर्वे श्लोकाः निबद्धाः । प्रसादगुणोपेतमिदं काव्यं अर्थालङ्कारयुतम् ।

अर्थालङ्काराः

उपमालङ्कारः

---

[66]शिक्षारामायणम्- उत्तरकाण्डः- ३५ श्लो

अथ रामं तद्गुणोक्त्या स्वाग्रजत्यक्त आगमत् ।
विभीषणश्चतुर्भिस्स्वैरुपायैरिव मन्त्रिभिः ॥[67]

रावणेन स्वाग्रजेन त्यक्तः रामं शरणमागतः । चतुर्भिः मन्त्रिभिस्सह चतुरोपायैस्सह इव आगच्छत् । अत्र मन्त्रिणः चतुरोपायैस्सह सादृश्यमुक्तम् । अनयोः उपमानोपमेयभावः अतः उपमालङ्कारः । चतुरोपायाः सामदानादयः ।

अभेदरूपकालङ्कारः

कामरूप्युत्पतन् वार्धेः ऊर्ध्वगः प्रकृतिं स्वयम् ।
स्वगुणाच्छादिकामेकां हत्वा छायाग्रहाह्वयाम् ।
पराविद्यामपासार्य सुरसाख्यमथापराम् ॥[68]

छायाख्यायाः स्वगुणाच्छादिकेन सादृश्यं तथा सुरसायाः पराविद्यया सह सादृश्यमुक्तम् । किन्तु उपमानोपमेययोः अभेदः उक्तः इति हेतोः अभेदरूपकालङ्कारः ।

उत्प्रेक्षालङ्कारः

कृतो मातृवधं पूर्वं स्पृष्ट्वाऽहल्या च यत्पदा ।
तत्फलं स्त्रीवियोगः किमिति लोकममोहयः ॥[69]

सीतावियोगः जातः अस्य काराणं किम् स्यादिति विचार्य प्रायः परशुरामरूपेण मातृवधः कृतः तथा अहल्या पद्भ्यां स्पृष्टा अतः स्त्रीद्रोहकारणेन पत्नीवियोगः जातः इति कार्यस्य कारणस्य सम्भावितत्त्वात् हेतूत्प्रेक्षा । वस्तुतः रामे मातृवधदोषः वा पादेन अहल्यास्पर्शदोषः सर्वथा नास्ति । तथापि कविना ऊहा कृता ।

सैद्धान्तिकदृशाऽध्ययनम्

मङ्गलश्लोके व्याख्याकारः श्रीराम-शब्दस्य विशेषार्थं दर्शयति । श्रीः सीतारूपिणी लक्ष्मीः इत्यर्थः । ईरः वायुरूपो हनूमान् अमः न जायते । मा परिमाणे इति धातोः । अर्थात् लक्ष्मीः

---

[67] शिक्षारामायणम्- युद्धकाण्डः- ६ श्लो
[68] शिक्षारामायणम्- सुन्दरकाण्डः- ६ श्लो
[6969] शिक्षारामायणम्- अरण्यकाण्डः- १७ श्लो

वा मुख्यप्राणो वा अस्य परिमाणं ज्ञतुं न प्रभवन्तीति भावः । लक्ष्म्यादिभिरपि अज्ञेयः सम्पूर्णतया इति भावः ।

अथ वा श्रिया लक्ष्म्या युतः रः आनन्दरूपः मः अपरिमितरूपः इत्यपि अर्थः ।

समीरप्रथमावतारः

श्रीरामं गुणवारिधिं निजजनत्राणेऽवतीर्णं क्षितौ ।
निर्दोषं जितशत्रुमब्दवपुषं पित्रार्थ्यनिष्कामुकं ॥
वैदेहीहृदये ततो बहिरपि व्याप्तं समीरात्मजान् ।
वाचारेषु दयां परां विदधत भक्तेष्टदं तं भजे ॥

इति मङ्गलमाचरन् कविवर्यः गुणवारिधिरित्यादिनवविशेषणैः रामं स्तौति ।

द्वितीये श्लोके -

स्वहृत्स्थतत्पदद्दशिमत्सुपूरं वन्दे समीरप्रथमावतारम् ।
ततः श्रुतान् रामगुणान् गृणन्तं वाल्मीकये नौमि गुरुं सुरर्षिं ॥

इत्यत्र मुख्यप्राणं संस्तुवन् समीरप्रथमावतारमिति प्रयोगः कृतः । अत्र शब्देनानेन

मुख्यप्राणः तथा तस्य अवतारत्रयमपि विवक्षितमिति व्याख्याकारः । कथमित्युक्ते प्रथमावतारः

इत्यत्र प्रकर्षेण थं संकर्षणरूपीपरमात्मा । मा जयाख्या लक्ष्मीः । सङ्कर्षणात् जयायां कृतावतारः

मुख्यप्राणः इति । मुख्यप्राणः जीवोत्तमः । मूलरूपस्य अवतारः त्रेतायां हनुमदवतारः द्वापरे

भीमावतारश्च । मध्वावतारः भीमावतारस्यैव अंशेनाभवत् । थं शब्दः सङ्कर्षणनामकं कथं

प्रतिपादयतित्युक्ते थं सर्वभूतात्मकमन्नं । "यस्मादन्नं थमुच्यत" इति कौर्म्ये । अद्यतेऽत्ति

भूतानीति श्रुतिः । संहाराधिकृतरुद्रनियामकत्वात् सङ्कर्षणरूप इत्यर्थः । सङ्कर्षणरूपिपरमात्मनः

अधीना जयाख्या लक्ष्मीः । सा एव अत्र मा शब्देन प्रोक्ता । प्रकर्षेण थात् मायायां जन्म

अवतारः यस्य सः वायुरित्यर्थः ।

हनूमत्पक्षे - वायोः प्रथमावतारः हनूमानिति हनूमत्पक्षे । प्रथमो हनूमन्नाम द्वितीय भीम एव च

पूर्णप्रज्ञस्तीयस्तु भगवत्कार्यसाधकः इत्युक्तेः १ तथा श्रीवल्लभाज्ञां.......गुरुः सतां केसरिणो

गृहेऽभूत्२ तथा ये ये गुणानाम ....श्रीमन्तमेनं हनुमन्तमाहुः३ इति श्लोकद्वयात् हनूमान् वायोः

प्रथमावतार इति स्पष्टः ।

भीमसेनपक्षे- प्रकृष्टं थं भयं, थकारो भयलक्षण इत्युक्तेः । मा हिंसा मिनु-हिंसायां इति

धातोः। प्रकृष्टं थं मा च यस्मात् सः । अत्र भयकारणः हिंसाकारी इति विशेषणद्वयेन सूचितो

वायोः भीमावतारः । जरासन्धदुर्योधनादीनां भयकारणः भीमः तथा तेषां संहारकर्ता च ।

महागदं चण्डरणं पृथिव्यां ४इति मध्वविजयोक्तेः हिंसाकारीत्यपि भीमस्य विशेषणम् ।

"कृष्णसेवामपेक्ष्यैव वायुर्भीमात्मनाभवत्" इति तत्वसारोक्तेः कृष्णात् लब्धजन्मा भीमावतारः

कृष्णसेवार्थमेवाभवत् ।

पूर्णप्रज्ञपक्षे -प्रक र्षेण थस्य विष्णोः मा ज्ञानं यस्य सः पूर्णप्रज्ञः इति । पूर्णप्रज्ञरसार्णव

इत्युक्तेः, पूर्णप्रज्ञ इति आश्रमनाम । अच्युतप्रेक्षेण संन्यासाश्रमं स्वीकृत्य ब्रह्मसूत्राणां

यथार्थपरमर्थमदर्शयत् मध्वमुनिः । न केवलं सांकेतिकं किन्तु "दशप्रमतिं जनयन्त योषणः"

इति बळित्थासूक्तोक्तप्रकारेण अन्वर्थकं नामधेयमभूत् । दशप्रमतीति शब्दस्य पूर्णप्रज्ञ इत्येव

अर्थः । दशप्रमतिरित्यत्र दश पूर्ण प्रमतिः ज्ञानमित्यर्थः । पूर्णप्रज्ञ इत्यत्रापि पूर्णा प्रज्ञा यस्य सः

इति पूर्णप्रज्ञ इति । "दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते" इति सर्वमूलग्रन्थे । लोके सर्वज्ञ

इत्यपि प्रसिद्धाः श्रीमदाचार्याः मध्वः आनन्दतीर्थ इत्यपि जनमानसे प्रथिताः ।

एवं शब्देनैकेन नैकार्थान् गहनार्थान् च प्रकटीकुर्वतः कविवर्यस्य तलस्पर्शिव्यकरणपाण्डित्यं,

सिद्धान्ते परिश्रमः, कोशज्ञानं, अनितरसाधारणकविप्रतिभा सर्वाश्च शंसनीयाः अनुकरणीयाश्च ।

न कर्मबद्धो जायेतेत्येवं ज्ञापयितुं भवान् ।
ब्रह्मादिप्रार्थितो जातः स्वकोपकृतये प्रभो ॥[70]

स्वकाः स्वजनाः तेषां उपकृतये स्वकोपकृतये इति ।

रामावतारात् पूर्वं ब्रह्मादिदेवाः हरिं भूभारहरणार्थं प्रार्थयन्ति । अतः रामावतारः अभूत् अनेन अस्य जन्म कर्मवशेन न किन्तु स्वेच्छया इति ज्ञायते । अन्येषां जीवानां जन्ममरणादिविषयेषु तेषां न स्वातन्त्र्यं किन्तु भगवतः प्रादुर्भावित्यादिकं तस्य इच्छया एव इति तस्य स्वातन्त्र्यं प्रतिपादितम् ।

---

[70] शिक्षारामायणम्- बालकाण्डः- ५ श्लो

पूर्वजन्माप्तदोषञ्च विमृशेदिति दर्शयन् ।

भार्गवस्थं तपोलोकसं ज्ञासुरमथावधीः ॥[71]

अत्र रामस्य पूर्वजन्म अर्थात् परशुरामावतारः । परशुरामावतारे लोकमयनामकं अतुलनामकं ब्रह्मवरादवध्यं स्वोदरे संस्थाप्य दोषः कृतः इत्यभिप्रायः प्रतीयते । किन्तु भगविति दोषारोपः न सङ्गच्छते । अतुलः ब्रह्मणः वरात् परशुरामस्य उदरे स्थानं प्राप्तवान् । किन्तु रामावतारे रामबाणेन अस्य संहारो भविष्यतीत्यनेन ब्रह्मवरं सत्यं कर्तुं उदरे स्थानं दत्तवानिति ज्ञेयः । एषः न भगवतः दोषः इति ज्ञेयम् ।

शेषनिऋत्यर्कवायुरूपैरेभिः पुमर्थकैः ।

चतुर्भिरिव सम्प्रागाः सेतुना शात्रवीं पुरीं ॥[72]

शेषरूपिणा लक्ष्मणेन, निऋतिरूपिणा दुर्मुखेण, अर्करूपिणा सुग्रीवेण सह, वायुरूपिणा हनूमता सह चतुर्विध्पुरुषार्थैस्सह यथा तथा श्त्रुपुरं अगमत् ।

श्रोतृत्वगाक्षि रसना घ्राण वाक्पाणि पादगान् ।

प्रहस्ताद्यष्टमानेतान् कामारेर्मन्त्रिणोऽवधीः ॥[73]

पायूपस्थगतं कालनेमिमेकक्रियत्वतः ।

शेषजीवनविघ्नेशं प्राणेन तममारयः ॥[74]

मनोभिमानिशक्रजिद्धते विचारलक्ष्मणे ।

सशक्तितो हनूमता गजागदेन जीवितः ॥[75]

अस्मदिन्द्रियैः यानि दुष्कर्माणि क्रियन्ते तदसुरावेशादेव । अतः मनसि रामं आह्वयेत् । तदा श्रोतृत्त्वगादिभिः याः दुष्क्रियाः क्रियन्ते तासां अभिमानिदैत्याः रामेण हताः भवन्ति ।

---

[71] शिक्षारामायणम्- बालकाण्डः- १३ श्लो

[72] शिक्षारामायणम्- युद्धकाण्डः- १४ श्लो

[73] शिक्षारामायणम्- युद्धकाण्डः- २० श्लो

[74] शिक्षारामायणम्- युद्धकाण्डः- २१ श्लो

[75] शिक्षारामायणम्- युद्धकाण्डः- २२ श्लो

पायूपस्थगं कालनेमिं मुख्यप्राणः हन्ति। इन्द्रः मनोभिमानी इन्द्रजित् मनसि विकारं जनयति । तदा विचारलक्ष्मणेन इन्द्रजित् हन्तव्यः इति ज्ञेयम् ।

२.७. श्रीरामगुणावलिः

चतुर्दशोत्तरैकशतश्लोकेषु रामायणकथां सङ्क्षेपतया वर्णयति रामगुणावल्याख्यं लघुकाव्यमिदं श्रीसुमतीन्द्रतीर्तविरचितम् । काव्येऽस्मिन् रामस्य गुणाः एकत्रीकृताः । गुणस्तवनेन सह भक्ति-पुरस्सरप्रार्थना आत्मनिवेदनञ्च दृश्यते । रामं प्रति अनन्य-शरणागतिबुद्धिं प्रदर्शयति कविः । योग्येषु अभीष्टप्रार्थना करणीया यथा

रे रे चातक सावधानमनसा मित्रं क्षणं श्रूयताम् ।
अम्भोदा बहवो वहन्ति गगने सर्वेऽपि नैतादृशाः ॥
केचिद्वृष्टिभिराद्रयन्ति धरणीं केचिद्वृथा गर्जनं ।
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

इति सुभाषितकारः । अतः यः समर्थः दानशीलः तस्य पुरतः प्रार्थना कर्तव्या । अत एव समर्थं करुणामयं रामं मोक्षप्राप्त्यर्थं संसृति-निवृत्त्यर्थञ्च प्रार्थयति ।

मङ्गलाचरण-श्लोके काव्यनायकं रामं स्तुवन् हनुमते सीतामार्गणार्थं दत्ताधिकारः स्वमहिषीं सीतां मार्गयन्तं रामं मे मनः मृगयते इति रामस्य विषये आदरपूर्वकजिज्ञासां प्रकटयति ।

त्रातारं कमुपैमि कस्य भुवने भूतानुकम्पेति च ।
ध्याता सुत्रिदशावलीषु न भवत्येतादृगेकोऽपि यत् ।
वातापत्यनिवेशितप्रनयिनीदूताधिकारं ततः ।
सीताविभ्रमदैशिकं मृगयते जातादरं मे मनः [76]॥ इति ।

---

[76] रामगुणावलिः १ श्लो

आलङ्कारिकदृशा काव्यमिदं सुन्दरं ललितञ्च । शार्दूलविक्रीडितवृत्ते निबद्धाः सर्वे श्लोकाः । वृत्त्यनुप्रासः छेकानुप्रासः, लाटानुप्रासः आधिक्येन दृश्यन्ते । प्रासादगुणोपेतं काव्यमिदं भक्तरसप्रधानं अद्‌भुतरसोऽपि वर्तते ।

तुल्या यस्य न सन्ति चापकुशलावल्यामिलामण्डले ।
कल्यासङ्गमुषा यदङ्घ्रिरजसाऽहल्या पवित्रीकृता ।
कुल्यावज्जलधिं बबन्ध किल यो वल्याशरछित्तये ।
कल्याणाय स मेऽस्तु साशुगधनुर्वल्या विराजत्करः[77] ॥

इत्यत्र ल्य इति संयुक्तव्यञ्जनस्य आवृत्तिर्दृश्यते । वृत्त्यनुप्रासः ।

अत्यन्तं विषयास्तुदन्ति हृदयं सत्यं मृषा नत्विदम् ।
सत्यं तेन मलीमसं भवति मे कृत्यं ततो भाविकं ।
इत्यन्तः परितप्यते रघुपते गत्यन्तरं नास्ति मे ।
सत्यन्तावसरे त्वमेत्य सहसा भृत्यं सदा पाहि माम् [78]॥

इत्यत्र सत्यं इति शब्दः पुनरावर्तितोऽपि भिन्नार्थबोधकः । द्वितीये पादे सत्यमिति पदस्य अमृषा
इत्यर्थः चतुर्थे पादे सति अन्तावसरे इति पदच्छेदः । शाब्दस्तु लातानुप्रासो भेदे तात्पर्यमात्रतः
इति लक्षणात् लाटानुप्रासः ।

अर्थालङ्काराः

उपमालङ्कारः

ये वेदैर्विदुरस्थिराणि भुवनान्यावेधसोविष्टपा-
त्ते वेगेन तरन्ति यस्य कथया नावेव सिन्धुं भवम् ।
धावेर्युयुधि यस्य कार्मुकगुणारावेण दूरे चयो ।

[77] रामगुणावलिः २२ श्लो

[78]रामगुणावलिः २९ श्लो

भावेनालघुभक्तिना रघुभुवां सेवे तमेवेश्वरम् ॥[79]

वेदादिशास्त्राध्ययनेन भुवनानि अस्थिराणि इति ज्ञात्वा ये रामकथां श्रुण्वन्ति ते भवं संसारं यथा नावेन सिन्धुं अनायासेन तरन्ति तथैव तरन्तीति भावः । अत्र संसारस्य सिन्धुना सादृश्यं रामकथायाः नावेन सादृश्यमुक्तमित्यनेन उपमालङ्कारः ।

<u>**अनुभयाभेदताद्रूप्यरूपकालङ्कारः**</u>

अम्भोधिद्युतिमर्कवंशतिलकं कुम्भोरुलङ्कापुरी-
रम्भोरुकुच बाष्पपूरपतनारंभोपयुक्ताहवम् ।
शम्भोरायुधचापशैलविषये दम्भोलिकेलीजुषम् ।
स्तम्भो मास्तु गिरां ममेति कलये तं भोगमोक्षप्रदम् ॥[80]

शिवधनुषः शैलेन सादृश्यं रामस्य वज्रायुधेन सह सादृश्यमुक्तम् । अत्र उपमानोपमेययोः समानधर्माः उक्ताः अतः अनुभयताद्रूप्यरूपकम् ।

सैद्धान्तिकदृशाऽध्ययनम् - भगवति भक्तिरेव मोक्षसाधनमिति प्रमुखः प्रमेयः मध्वसिद्धान्ते । अत्र कविः भक्त्युद्रेकेण भगवतः लीलां संस्मरन् प्रार्थयति यथा

वाचा वारितमप्यतीक्ष्णमहसा प्राचामृषीणां मता ।
नाचारानपहाय धावति मनो नीचावतीर्णे पथि ॥
हा चापल्यहतास्म तन्नियमने का चातुरी मे ततो।
याचाम्यानयमेव शंत्विदमिति त्वा चापपाणे विभो ॥ [81]

मानवस्य असहायकता, विषयासक्तिः, मनोनिग्रहे क्लिष्टता इत्यादिकं वर्णितम् । यद्यपि शास्त्रैः कर्तव्यमकर्तव्यञ्च उपदिष्टम् मनः अकर्तव्यमेव करोति विषयभोगासक्तमेव भवति

---

[79]रामगुणावलिः २३ श्लो

[80]रामगुणावलिः ३९ श्लो

[81] रामगुणावलिः १६ श्लो

। तस्य निग्रहार्थं प्रयतोऽपि साफल्यं न भवति । अतः कविः धनुर्धारिं रामं स्वमनोनिग्रहार्थं प्रार्थयति । अनेन जीवस्य अस्वातन्त्र्यं सिद्धं तथा भगवतः सर्वनियामकत्वमपि । नातो राघवतोऽपरं शरणमित्यातोद्यमाघोषये[82] इति रामस्य सर्वोत्तमत्वं प्रतिपादितम् ।

एत्याभीक्ष्णमनादिकर्मपटलीवात्यामवैष भ्रमन् ।
यात्यायाति परत्र चेह च मुहुर्भीत्या च संयुज्यते ।
भीत्या गायततश्च भूतकरुणाचैत्यायमानेक्षणम् ।
कात्यायन्यधिनाथकार्मुकभिदं दैत्यारिमालम्बते ॥[83]

जीविनः आवरकादिविषयान् प्रतिपादयति । जीवः अविद्याकामकर्मादि-सप्तावरकैः बद्धः । आवरक-नाशेन स्वरूपानन्दाविर्भूतिः । आवरकनाशार्थं भगवदनुग्रहः आवश्यकः । अतः रामं प्रार्थयति । मनः इतस्ततः भ्रमन् कदाचित् भीत्या भगवद्विषये संयुज्यते । अतः शिवधनुभङ्गः यथा तथा दुर्विषयासक्तमनसः भङ्गं कर्तुं शिवधनुर्भिदं रामं प्रार्थयति । अनेन भगवति मनः निवेशयितुं तस्यानुग्रहः आवश्यकः तदर्थं भक्तः भगवन्तं प्रार्थयेदिति बोधयति ।

[82] रामगुणावलिः २५ श्लो
[83] रामगुणावलिः ३१ श्लो

तृतीयाध्यायः

३.महाभारत-भागवत-पुराणाधारितलघुकव्यानामध्ययनम्

माध्वैः राचितानिकाव्यानि महाभारत, भागवतादिपुराणान्याधृत्यापि रचितानि। एषु काव्येषु पुराणोक्त विषयाः,सैद्धान्तिकविषयाश्च चर्चिता वर्तन्ते । अतः तेषामध्ययनमत्र विहितम्।

३.१. श्रीनारायणपण्डिताचार्याणां देशकालकृतयः

श्रीनारायणपण्डिताचार्यः लिकुचवंशसम्भूतः अङ्गीरसगोत्रोद्भवः । कविकुलतिलक इति विख्यातस्य श्रीत्रिविक्रमपण्डिताचार्यस्य तृतीयः पुत्रः । अस्य प्रामाण्यं श्लोकेऽस्मि वर्तते

त्रिविक्रमविपश्चितो गुणनिधेः सुशिष्याः सुताः ।
सतामभिमतास्त्रयो यस्तृतीयोऽत्र नारायणः ॥[1]

श्रीसुब्रमण्यपण्डितः अस्य पितामहः । लिकुचवंशः पण्डितवंश इत्येव सुप्रसिद्धः । श्रीनारायणपण्डिताचार्यस्य जीवितकालः प्रायः क्रि. पू १२९५-१३७० इति ज्ञायते । तुळुदेशः अस्य देशः इति सुस्पष्टम् । अद्यापि रजतपीठपुरसमीपस्थे कावुमठे श्रीत्रिविक्रमपण्डिताचार्यस्य तथा नारायणपण्डिताचार्यस्य वंशजाः वसन्ति । तत्र तयोः शिलास्मारकमपि वर्तते ।

मूलतः श्रीत्रिविक्रमाचार्यः अद्वैतपण्डितः । श्रीमदाचार्यैस्सह वादे पराजितोऽयं यथावचनं द्वैतमतमवलम्ब्य श्रीमध्वाचार्याणां शिष्यरूपेण नैकान् द्वैतग्रन्थानरचयत् । कदाचित् बदरीक्षेत्रे बदरीनारायणस्य पूजाकैङ्कर्यं हनुम-भीम-मध्व इति रूपत्रयेण कुर्वन्तं श्रीमदाचार्यं दृष्ट्वा भक्त्युद्रेकितः वायुस्तितिमरचयत् । अद्य सकलमाध्वैः अत्यन्तादरेण

[1] भावप्रकाशिका

भक्त्या च पठ्यमाना वायुस्तुतिः त्रिविक्रमपण्डिताचार्यस्य काव्यप्रतिभां तथा श्रीमदाचार्याणां महिमानं दर्शयति ।

सुमध्वविजयकारः इत्येव प्रसिद्धः नारायणपण्डिताचार्यः अलङ्कारनिपुणः, शास्त्रकोविदश्च । बाल्ये स्वपितुस्सकाशादेव अलङ्कार-व्याकरण-वेदान्तशास्त्रानधीत्य नैकान् ग्रन्थानरचयत् । अनितरसाधारणकविप्रतिभा-सम्पन्नस्यास्य वस्तुनिष्ठता, ऐतिहासिकप्रज्ञा, शास्त्रज्ञानञ्च लोकोत्तरम् । लिकुचवंशजेषु अत्यधिकग्रन्थकारोऽयमिति ख्यातः श्रीनारायणपण्डिताचार्यः ।

श्रीनारायणपण्डिताचार्यविरचिताः कृतयः

श्रीनारायणपण्डिताचार्यस्य सुमध्वविजयमहाकाव्यं अत्युत्कृष्टमाध्वमहाकाव्यमिति प्रसिद्धम् । अन्यासां कृतीनां च नामानि अत्र दत्तानि ।

१.	सङ्ग्रहरामायणम्	२.	सुमध्वविजयमहाकाव्यम्
३.	भावप्रकाशिका	४.	प्रमेयनवमालिका(अणुमध्वविजयः)
५.	मणिमञ्जरी	६.	शुभोदयम्
७.	पारिजातहरणम्	८.	नयचन्द्रिका
९.	तत्त्वमञ्जरी	१०.	यमकभारतटीका
११.	अणुभाष्यटीका	१२.	कृष्णामृतमहार्णवटीका
१३.	मिथ्यात्वानुमानखण्डनटीका	१४.	योगदीपिका
१५.	ध्यानमाला	१६.	कृष्णमाला
१७.	नृसिंहस्तुतिः	१८.	दाशरथ्यष्टकम्
१९.	रामगीत्यष्टकम्	२०.	गोविन्दस्तुतिः
२१.	महालक्ष्मीस्तुतिः	२२.	अणुवायुस्तुतिः
२३.	मध्वकवचम्	२४.	पूर्णबोधस्तुतिः
२५.	शिवस्तुतिः	२६.	तारतम्यस्तोत्रम्

२७.	यमकस्तोत्रम्(१)	२८.	यमकस्तोत्रम्(२)
२९.	यमकस्तोत्रम् (३)	३०.	अंशांशिनिर्णयः
३१.	मध्वामृतमहार्णवः		

३.२. शुभोदयम्

श्रीत्रिविक्रमपण्डिताचार्यसुत- श्रिमन्नारायणपण्डिताचार्येण विरचितं लघुकाव्यं शुभोदयम् । शुभ-नामकस्य राज्ञः चरितमिति भासमानोऽपि भागवतोक्त-पुरञ्जनोपाख्यानस्य सादृश्यं दृश्यते[2]।अतः पुराणाधारितकाव्येष्वन्तर्भवतीदं काव्यम्। काव्येऽस्मिन् पञ्चकाण्डानि सन्ति –प्रमादकाण्डः, प्रादुर्भावकाण्डः, गोविन्दकाण्डः,परिशुद्धिकाण्डः, अभ्युदयकाण्ड इति ।

प्रथमे प्रमादाकाण्डे शुभनामकस्य राज्ञः कयाचित् प्रमदया सह मेलनं वर्णितम् । सुकृतिर्नामिपुर्याः राजा शुभः तस्य पत्नी सुमतिर्नाम भरतस्य पुत्री । एकदा वने विहरतः राज्ञः काचित् सुन्दरी प्रमदा दृष्टि- पथमायाति तयि तत्क्षणे एव अनुरक्तस्सन् सर्वं त्यक्त्वा तया सह रमते । तां पुरं नीत्वा तदाज्ञानुसारमेव तत्र बहुकालं यापयति । अनेन दुःखिता सुमतिः तस्याः कुमारश्च । तदा कुमारः सैन्यसहाय्येन योद्धुमुद्युक्तः । तदा स्वजनेषु वैरः न कर्तव्यः इति धिया तूष्णिमापन्नः । एवम् सर्वत्राटन् कदाचित् कमपि मुनिपुङ्गवं दृष्ट्वा तेन भारतान् अमात्यरूपेण प्राप्य तुष्टः । पुनः स्वस्य पुरं दग्धं दृष्ट्वा शुभः शोचयामास । तदा गुरुः तम् भगवतः गुणवर्णनादिकथाभिः उपदिशति इति कथा अत्र निरूपिता ।

प्रादुर्भावकाण्डे सृष्टिक्रमः, दशावतारवर्णनं, विशेषतः वामनरूपस्य वर्णनं दृश्यते । तथा भगवतः यज्ञ, कपिलादिरूपाणां वर्णनं कथा च अत्र निरूपिता ।

[2] डा, कृष्णमूर्तिमहोदयः- प्रस्तावना- शुभोदयम्

गोविन्दकान्डे कृष्णकथा निरूपिता । परिशुद्धिकाण्डे उपदेशेन परिवर्तितमनसः शुभस्य वृत्तान्तः निरूपितः । अभ्युदयकाण्डे धर्ममार्गे कथं स कालं यापयतीति वृत्तान्तः वर्णितः ।

आलङ्कारिकदृष्ट्याऽध्ययनम्

प्रतिकाण्डं नैकवृत्तमयाः श्लोकाः दृश्यन्ते । प्रमादकाण्डे द्रुतविलम्बितवर्गः, मञ्जुभाषिणीवर्गः, रथोद्धतावर्गः, प्रमिताक्षरावर्गः, वैतालीयवर्गः, रुचिरावर्गः, उपजातिवर्गः, वंशस्थवर्गः, वसन्ततिलकावर्गः, औपच्छन्दसिकवर्ग इति दशवर्गाः दृश्यन्ते । प्रादुर्भावकाण्डे जगत्युपजातिवर्गः, गीतिकावर्गः, मन्दाक्रान्तवर्गः, स्वागतावर्गः, प्रहर्षिणीवर्गः, पथ्यावक्त्रवर्गः, युग्मविपुलावर्गः, पुष्पिताग्रावर्गः, इन्द्रवंशावर्गः, इन्द्रवज्रावर्गः, उपेन्द्रवज्रावर्गः, प्रामाणिकवर्गः इति द्वादशवर्गास्सन्ति । गोविन्दकाण्डे अन्त्यपादोपेन्द्रवज्रावर्गः, तृतीयपादोपेन्द्रवज्रावर्गः, द्वितीयपादोपेन्द्रवज्रावर्गः, प्रथपादोपेन्द्रवज्रावर्गः, चतुर्थपादेन्द्रवज्रावर्गः, तृतीयपादेन्द्रवज्रावर्गः, द्वितीयपादेन्द्रवज्रावर्गः, प्रथमपादेन्द्रवज्रावर्गः, उत्तरार्धोपेन्द्रवज्रावर्गः,पूर्विर्धोपेन्द्रवज्रावर्गः इति दशवर्गास्सन्ति । परिशुद्धिकाण्डे शालिनीवर्गः, वातोर्मीवर्गः, सङ्कीर्णवर्गः, मालिनीवर्गः, दोधकवर्गः, उद्गीतिकावर्गः, अपरान्तिकावर्गः(रथोद्धता), मात्रासमकवर्गः, शिखरिणीवर्गः, प्रथमचतुर्थपादोपेन्द्रवज्रावर्गः, स्रग्धरावर्गः, शार्दूलविक्रीडितवर्गः इति द्वादशवर्गास्सन्ति । अभ्युदयकान्डे तोटकवर्गः, चित्रावर्गः, द्वितीयचतुर्थपादोपेन्द्रवज्रावर्गः, प्रथमतृतीयपादोपेन्द्रवज्रावर्गः, द्वितीयतृतीयपादोपेन्द्रवज्रावर्गः, वैश्वदेवीवर्गः इतिषट् वर्गास्सन्ति ।

चक्रबन्धे निबद्धः श्लोकः

त्रिस्थानाततशुद्धचिच्छुभतनो भूयः स्वशोणश्रिया ।
भित्वाराजि विभो तवाण्डभवनं श्रीलोकनाथाक्रमे ।
चित्रं यस्तु वदन्नरिं निभवटुः कामस्य दिव्यं हि ते ।

तेजः पात्रीति शोभि नो रुचितमायासेन मे दृश्यते ॥[3]

गोमूत्रिकाबन्धे निबद्धः श्लोकः

ससृजेऽर्चयतां पादं विधिना विभोः । उदपात्राच्च वक्त्राच्च सुरसेव्या सरस्वती ।

नारायणरमानाथ देवाद्वरगिरः पितः । सुरागुणसमास्तेऽथ नैवासुरनरः कुतः ॥[4]

मुरजबन्धः

सारामा परमा रम्या सरामा परमारदा । दारमाप रमायत्ते याऽऽरमा परमायया ॥[5]

एकाक्षरी

तातत्तेतीततातत्ता ततततुत्ततितोततता । तततातीत्तात्तितोत्तेतितततोतीतेतितातततते ॥[6]

अर्धैकाक्षरम्

लीलालोल ललल्लीलालीलालेलालिलालिलाः ।पापपापापापपापोपापापीपापपाप्यप ॥[7]

प्रतिलोमानुलोमश्लोकौ

मानये मानसाऽसारविभाता शिवदारप । वामानामितगो त्वा हि रसा ते परमाक्षर ।

रक्ष मारपते सार हित्वा गोतमीनाम वा । परदा वशिताऽभावि रसा साऽनम येन मा ॥[8]

अर्थालङ्काराः

उपमालङ्कारः

प्रहिता तयाऽऽलिरिदमब्रवीन्नृपं । ननु मानवेन्द्र कुशली प्रवर्तसे ।

यशसा तवातिविशदेन मोदते । जगती यथा कुमुदिनीन्दुतेजसा ॥[9]

नृपस्य शुभस्य यशेन्दुतेजसोः सादृश्यम् तथा जगत्कुमुदिन्योः सादृश्यमुक्तम् । यथा कुमुदिनी चन्द्रिकया मोदते तथा नृपस्य यशसा जगदिदं अर्थात् प्रजाः मोदन्ते इति भावः । उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोरिति लक्षणात् उपमालङ्कारः ।

तपः फलं मूर्तमुपागतं ध्रुवं । ममेति निश्चित्य नरेन्द्रनन्दनः ।

---

[3] शुभोदयम्- प्रादुर्भावकाण्डः, सप्तमवर्गः, ७० श्लो, परिशिष्टः १
[4] शुभोदयम्- प्रादुर्भावकाण्डः, वर्गः, ७० श्लो,
[5] शुभोदयम्- प्रादुर्भावकाण्डः, षष्ठवर्गः, ५६ श्लो,
[6] शुभोदयम्- प्रादुर्भावकाण्डः, सप्तमवर्गः, ६५ श्लो,
[7] शुभोदयम्- प्रादुर्भावकाण्डः, सप्तमवर्गः, ६२ श्लो,
[8] शुभोदयम्- प्रादुर्भावकाण्डः, सप्तमवर्गः, ५४ श्लो,
[9] शुभोदयम् , प्रमादकाण्डः, द्वितीयवर्गः , १२ श्लो

प्रसादयामास मुहुः प्रणम्य तं । समग्रसिद्धिर्हि सतां समागमः ॥[10]

तपसः फलमेव मूर्तरूपेण दृष्टः इति मुनेः, तथा तपसः फलस्य अभेदः निरूपितः इत्यनेन अभेदरूपकालङ्कारः ।

विरोधाभासालङ्कारः ।

नियोगतश्चैत्रगवाद्विचित्रतो । दिशामिवेशा दश ते महाभटाः ।

अपीपलंस्तानथ कान्तिमन्मुखान् । पराजयाद्व्यक्तमकान्तिमन्मुखान् ॥[11]

युद्धे शत्रवः कान्तिमन्तोऽपि पराजयात् अकान्तिमन्तो बभूवुः इति विरोधाभासालङ्कारः ।

अर्थान्तरन्यासालङ्कारः

दिवं भुवं साङ्गमुताश्रुवान-मुत्पातमुत्प्रेक्ष्य च जोषमाप ।

अवार्यवैरं स्वजनं विवेकी । न मानिनामापदि चापलं स्यात् ॥[12]

अत्र युद्धे शुभः पुरदहनं वीक्ष्य स्वजनवैरं त्यक्तवानिति विशेषविषयं न मानिनामापदि चापलं स्यात् इति सामान्यवचनेन समर्थयतीति अर्थान्तरन्यासालङ्कारः ।

सम्भोगश्रृङ्गारवर्णनम्

इति तं निबध्य नियमेन मानिनी। रमयाम्बभूव रमणीयविभ्रमा ।

अपि धर्मशीलमिव रुग्मभूषणम् । प्रतिपादिता विधिबलेन मोहिनी ॥

नवसङ्गमे समधिक त्रपाकुलां । तरुषण्दमध्यधितिरोहितां किल ।

विजनं लतालयमितिऽपनीय तां सुरतोत्सवाननुबभूव भूपतिः ॥[13]

सैद्धान्तिकदृशाध्ययनम् ।

भागवतस्य पुरञ्जनोपाख्यानमेव अस्य काथायाः आधारः । नारदमहर्षिः प्राचीनबर्हिं पुरञ्जनकथां कथयति । भागवतोक्तपुरञ्जनकथा संक्षिप्ततया अत्र दीयते । पुरञ्जनो नाम कश्चिद्राजा तस्य अविज्ञातः सखा आसीत् । स भूलोकमागतः तत्र कस्मिन् पुरे

---

[10] शुभोदयम् , प्रमादकाण्डः, सप्तमवर्गः , ७७ श्लो

[11] शुभोदयम् , प्रमादकाण्डः, अष्टमवर्गः , ७१ श्लो

[12] शुभोदयम् , प्रमादकाण्डः, सप्तमवर्गः , ६२ श्लो

[13] शुभोदयम् , प्रमादकाण्डः, सप्तमवर्गः , १६, १७श्लो

वसामीत्यचिन्तयत् । तदा हिमालयस्य दक्षिणे नवद्वारयुतं कञ्चित्पुरं दृष्ट्वा तं प्राविवेश । तस्य पुरस्य नवद्वाराः । पूर्वे पञ्च पश्चिमे द्वौ दक्षिणे उत्तरे च एकैकम् । पुरं प्रविशन् तत्रोद्याने काञ्चित् कन्यामपश्यत् । सा तं दृष्ट्वा तं परिणेतुमिच्छुकाभूत् । तदा पुरञ्जनः तया सह विद्यमानं पञ्चफणयुतं सर्पमेकं दृष्ट्वा भीतः । तदा सा एषः सर्पः सदा अस्मान् रक्षति तथा मम दशभटाश्च सन्ति तेषां नैके किङ्करास्सन्ति । यदि त्वया सह आगन्तव्यं तर्हि ते सर्वेऽपि आवाभ्यां सह आगमिष्यन्तीति । तदङ्गीकुर्वन् स तां उपयेमे । तया सह सुष्टु रेमे । तयोः शताधिकानि सन्तानानि बभूवुः ।

एकदा चण्डवेगो नाम गन्धर्वः तस्य पुरं वीक्ष्य आक्रमणं कर्तुमुद्युक्तः । पुरञ्जनः भार्यया सह रमयन् किमपि न जानन् उवास । गन्धर्वेण स पुरः दग्धः । तदा कालकन्यका नाम काचित् कन्या आगता । सा अवलक्षणपूर्णा इति कोऽपि तां परिणेतुं नेच्छुकाः । तदा सा यवनेश्वरमेत्य मम पाणिग्रहणं कुर्विति प्रार्थयामास । स तु तां भगिनीरूपेण स्वीकर्तुमङ्गीकृतवान् । तस्याः दशां वीक्ष्य कमपि पुरुषं गूढतया प्रवेष्टुं सा समर्था भवेदिति वरं अदात् । तेन सन्तुष्टा सा पुरञ्जनसमीपमागता । तदा सः सम्पूर्णतया दुर्बलोऽभूत् । तदा यवनेश्वरः तमाक्रमत् । दुर्बलस्सन् योद्धुमप्यशक्तः दशभटान् अपृच्छत् । ते सर्वे पलायिताः । पञ्चफणयुतः सर्पः यवनेश्वरेण सह युद्धं कृत्वा अन्ते बहिर्गतः । तदा पुरः दग्धः । पुरञ्जनं यवनेश्वरस्य किङ्कराः पाशेन बद्ध्वा निन्युः । पुनः वैदर्भी नाम्ना जाता सा मलयध्वजं उपयेमे । तस्य मरणानन्तरं दुःखतप्ता सा ब्राह्मणमेकमपश्यत् । स पूर्वजन्मनि तस्य सुहृत् अविज्ञात इति उक्त्वा तमुपादिदेश ।

एषा कथा रहस्यार्थबोधिका । पुरञ्जनः जीवः तेन प्रविष्टः नवद्वारयुतः पुरः देहः । पूर्वस्थद्वाराः नयने नासद्वारौ वदनञ्च । पश्चिमस्थौ द्वारौ कर्णौ उत्तरदक्षिणस्थौ पायु उपस्थौ । तेन दृष्टा कन्या तया सह विद्यमानः पञ्चफणयुतः सर्पः पञ्चप्राणाः । दशभटाः दशेन्द्रियाणि । पुरः झर्झरितः नाम देहो झर्झरितः इति । कालकन्यका मृत्युः तस्यां आगतायां दशेन्द्रियाणि निष्क्रियाः भवन्ति । पञ्चप्राणाः अन्त्यकालपर्यन्तं देहे भवति । तेषु बहिर्गतेषु जीवः देहाद्बहिर्गच्छति इति तथ्यम् ।

त्रिपथगां समया त्रिदिवोपमं विरचितं कृतिना सुरशिल्पिना

सुकृतिनामपुरं सुकृती पुरा शुभैति प्रथितो अध्यवसन्नृपः ॥[14]

शुभ एव पुरञ्जनः ।

विषयतो विष्यान्तरमाव्रजन् प्रकृतिभिः प्रकृतिं गमितोपराम् ।

वनमपश्यदितां प्रमदामसौ सपदिकाञ्चन काञ्चनसन्निभाम् ॥[15]

काञ्चित् कन्यां दृष्ट्वा तयि अनुरक्तः इति वृत्तान्तः ।

अथ माधुरादिविषयान् बुभुजे सह पञ्च पञ्च सचिवः प्रियया ।

अरुणेन ये द्विगुणिता विषयान् ददताऽऽत्मनो दुहितृमाननया ॥ [16]

इति पञ्चज्ञानेन्द्रियाणां पञ्चकर्मेन्द्रियाणां द्योतकं पञ्चपञ्चसचिवाः । इन्द्रियाणि सदा विषयासक्ताः इत्यपि अत्र सूचिता ।

जाग्रदेव बलवान्दिवानिशं यक्षराजविहितोऽभिरक्षति ।

यां च पञ्चफनकञ्चुकीश्वरो गां हिरण्यनिधिगर्भिणीमिव ॥[17]

पञ्चप्राणाः एव पञ्चफणाः सर्पः मुख्यप्राणः इति ज्ञेयः ।

दशावतारवर्णनम् सुष्टु वर्तते ।

प्राप्तः पाणौ रुचिररुचकः कान्तिकृत्सत्यवक्त्रैः ।

सच्चिन्मूर्तिः कतिपयदिनैर्मेरुशोभो बभूव ।

भूत्वा मत्स्यः स मधुमथनो मुग्धभावस्तिरश्चां ।

नास्मिंस्तर्को यददिशदसौ वेदगर्भाय वेदान् ॥[18]

वेदोद्धारकं मत्स्यावतारं वर्णयति । अत्र सच्चिन्मूर्तिरित्यनेन अवताररूपेऽपि भगवतः अप्राकृतत्वं सूचितम् ।

तुङ्गाङ्गं यो जलधिवसनं क्षोभितं देवदैत्यैः ।

---

[14] शुभोदयम् , प्रामादकाण्डः, प्रथमवर्गः , २ श्लो

[15] शुभोदयम् , प्रामादकाण्डः, प्रथमवर्गः , ६ श्लो

[16] शुभोदयम् , प्रामादकाण्डः, चतुर्थवर्गः , ३२ श्लो

[17] शुभोदयम् , प्रामादकाण्डः, तृतीयवर्गः , २६ श्लो

[18] शुभोदयम् , प्रामादकाण्डः, तृतीयवर्गः , २१ श्लो

स्थेष्टे पृष्टे वहति हि जगन्मण्डलं मन्दरं च ।

कूर्माकारं प्रकृतिविकृतिस्पर्शलेशव्यपेतं ।

मन्ये मूर्तं धृतिगुणमिमं केवलं केशवस्य ॥[19]

इति प्रकृतिविकृतिस्पर्शलेशव्यपेतः इत्यनेन मन्दरं धरन्नपि तस्य न कोऽपि श्रमः इति सूच्यते ।

नासाकाशात्समजनि पुरा वेधसोऽङ्गुष्टमात्रो ।

व्याप्ताकाशे गिरिरिव बभौ क्रीडया क्रोड एषः ।

किञ्चेन्द्रारिं कुलिशकठिनं गां तिरस्कर्तुकामं ।

रम्भास्तम्भं गजपतिरिवापातयद्वीर्यसारः ॥[20]

अत्र चतुर्मुखस्य नासात् उद्भूतः वराहरूपः । केवलाङ्गुष्टपरिमितः पुनः बृहद्गात्रं स्वीकृत्य हिरण्याक्षसंहारं कृत्वा भूमिमुद्धरयामास इति विषयः सूचितः ।

प्रादुर्भावा न जनतनुजा भूम्न इत्यत्र दृष्टो ।

दृष्टान्तोऽयं रिपुसदसि यत्सम्भवः स्तम्भमध्यात् ।

आद्यं माद्यद्दितिजगजविध्वंससिंहं नृसिंहं ।

यक्षस्यांशं यवनवनसंहारिवह्निं भजेथाः ॥[21]

मर्त्यानां देहात् यथा अन्येषां जन्म तथा मम नास्तीति दर्शयितुं स्तम्भादाविरभूदिति भगवतः जननमरणादिराहित्यं सूचयति ।

वामनावतारवर्णनं विषदतया निरूप्यते ।

---

[19] शुभोदयम् , प्रामादकाण्डः, तृतीयवर्गः , २२ श्लो

[20] शुभोदयम् , प्रामादकाण्डः, तृतीयवर्गः , २३ श्लो

[21] शुभोदयम् , प्रामादकाण्डः, तृतीयवर्गः , २ श्लो

भूषारत्नं भुवनवलयस्याखिलाश्चर्यरत्नं ।
लीलारत्नं जलधिदुहितुर्देवतामौलिरत्नं ।
चिन्तारत्नं जगति भजतां सत्सरोजद्युरत्नं ।
दाक्षायण्यां समजनि मुनेः कश्यपात्पुत्ररत्नं ॥[22]

इति त्रिभुवनेषु भूषणप्रायः , अखिलानां आश्चर्यमूर्तिः लक्ष्म्याः लीलारत्नं , देवानां शिरोरत्नं, ये तं सदा भजन्ते तेषां चिन्तितं दास्यमानं चिन्तारत्नं, सज्जनसरोजानां सूर्य इव , कश्यप-दाक्षायण्योः वामनः पुत्ररत्नं अवातरत् ।

धरणिधरकुल त्रिसप्तवारं । धरणीधरो धरणीभरापहारी ।
अहरदहह वीरशेखरोऽसौ ।नडनिकरं द्विरदीव जामदग्न्यः ॥[23]

असुरसंहारार्थमेव त्रिसप्तवारं भूप्रदक्षिणं कृतवानिति सूच्यते ।

नगमृगनरवानरादिविश्वं । निजपदमेव निनाय यो मुमुक्षुं ।
भुवनभयभरघ्नमङ्ग रामं । भज भज तं करुणामृताब्धिमेनं ॥[24]

रामावतारसमाप्त्यनन्तरं सर्वान् मुमुक्षून् मोक्षं प्रति निनाय रामः इति विषयः सूचितः ।

रिपुसदसि रणाजिरेवधूना-मपि वलये हृदये च योगभाजाम्।
पशुपतिशिशुमात्तविश्वरूपं । स्मर नृप विस्मर मा स्मरस्य तातम् ॥[25]

पशुपतिः गोपालकः नन्दगोपः तस्य पुत्ररूपेण मुखे सकलं विश्वं दर्शयामास । भगवतः मूलरूपे अवताररूपे समानशक्तिसामर्थ्यं भवतीति सूचितः ।

---

[22] शुभोदयम् , प्रामादकाण्डः, तृतीयवर्गः , २५ श्लो

[23] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , २६ श्लो

[24] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , ७३ श्लो

[25] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , ७४ श्लो

सुमतममृततुल्यमासुरेभ्यः । स्मितललिताऽऽदितवाणिनीव वाणी ।

अदिशदपि सुरोत्कराय यः स्वं । प्रदिशतु ते शुभ बुद्धिमेष बुद्धः ॥[26]

असुरमोहनार्थं वीपरीतार्थबोधकः स्वयं सदा ज्ञानानन्दस्वरूपः । स अस्माकं बुद्धिं सम्यग् प्रेरयत्विति प्रार्थयते ।

कलिमलकलिलं जगत् स्ववासात् । कतकफलं कमिव प्रसादयेद्यः ।

खलकुलवनवह्निरेष कल्की रिपुविपदे तव सम्पदे च भूयात् ॥[27]

इति दशावतारवर्णनम् । तदनु भगवतः वेदव्यास- कपिलादिरूपाणामपि वर्णनम् दृश्यते ।

मुनिघननिकरो यतो गृहीत्वा । बहु भुवि वर्षति वेदजीवनीयम् ।

यमथ विशति विश्वमेव साक्षात् ।उपसरसात्यवतेयसागरं तम् ॥[28]

इति वेदव्यासरूपवर्णनम् ।

निजकमलमपास्य यद्भजेता-मपि कमला कमलासनो रसेन ।

भुवनसुरभिकार्दमं विनिद्रं । कपिलवपुःकमलं मनोलिरेतु ॥[29]

इति कर्दमसूनोः कपिलरूपिणः वर्णनम् ।

मुकुर इव विभाति यस्य शुभ्रे । वचसि विभासिनि रम्यमात्मरूपम् ।

नतमिह यदुहेहयादिभूपै-स्त्वमपिनमस्कुरु दत्तमत्रिसूनुम् ॥[30]

इति दत्तात्रेयवर्णनम् ।

दावे ततं दावमिवोग्रजिह्वया ।संहृत्य यातुप्रकरं प्रपालितः ।

स्वायम्भुवो येन मनुर्मनुष्व भोस्तं यज्ञसंज्ञं रुचिरं रुचेस्सुतम् ॥[31]

इति यज्ञनामकं परमात्मानं स्तौति ।

सृष्टिक्रमोऽपि अत्र वर्णितम् ।

---

[26] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , ७५ श्लो
[27] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , ७६ श्लो
[28] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , ७७ श्लो
[29] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , ७८ श्लो
[30] शुभोदयम् , प्रामादकाण्डः, अष्टमवर्गः , ७९ श्लो
[31] शुभोदयम् , प्रामादकाण्डः, नवमवर्गः , ८१ श्लो

आसीदवसितलीलो ग्रस्तसमस्तात्मसम्भवः पूर्वम् ।

नारायण उपमातुं कविभिः कथितो बतोर्णनाभिरिह ।

यथोर्णनाभिः तथा जगदिदं सृजते विश्वः इति माण्डूक्योपनिषदि यदुक्तं तथा विश्वेन अतिलीलया विश्वमिदं सृज्यते ।

श्रीस्तनभरपरिरम्भी परपदवेद्ये परो निजनिमेषे ।

निद्रामुद्रावसितः श्रुतिभिरथास्थावि वन्दिभिरिवेन्द्रः ।।[32]

सृष्टेः पूर्वं प्रलयोदके श्रुतिभिर्गीयमानः लक्ष्म्याः श्रीभूदुर्गारूपैः स्तूयमानः आसीत् हरिः ।

समजनि स वासुदेवो मायाप्रणयी स्मृतोऽत्र योगीन्द्रैः ।

उर्वारुकमिव वल्लीवलयाद्यो मोचयेन्नरं बन्धात् । [33]

प्रथमतः वासुदेवरूपं स्वीकृतवान् हरिः लक्ष्मी च मायारूपेण स्थितः । वासुदेवरुपेण हरिः जीवानां मोक्षप्रदः इत्यंशः अत्र सूचितः ।

सङ्कर्षणनामाऽभूज्जयया यज्जायया जगद्यत्र ।

शलभतुलां किल लभते ज्वलन इव ज्वालयोज्ज्वलज्वलिते ॥[34]

जयानामकलक्ष्म्या सहितः सङ्कर्षणनामकः हरिः अग्निरिव रक्तवर्णः । यथा शलभः अग्नौ दग्धो भवति तथा जगदिदं सङ्कर्षणेन लय काले दग्धं भवतीति विषयः अत्र प्रतिपादितः ।

प्रद्युम्नं सुद्युम्नं विद्धि ततोऽनन्तरं कृतिप्रकृतिम् ।

यद्भ्रूविभ्रममात्रात् स नवावरणं भवेत्सुवर्णाण्डम् ॥[35]

कृतुपतिप्रद्युम्नः ततः प्रादुरभवत्। तस्य भ्रूविभ्रममात्रेणैव ब्रह्माण्डसृष्टिर्भवतीत्यंशः अत्र प्रतिपादितः ।

अनिरुद्धोऽप्यनिरुद्धो विश्वस्थितिदोऽथ शान्तिकान्तोऽभूत् ।

पञ्चात्माञ्चित एवं देवोऽस्यैवञ्च नास्ति पञ्चत्वम् ॥[36]

---

[32] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १२ श्लो

[33] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १३ श्लो

[34] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १४ श्लो

[35] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १५ श्लो

[36] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १६ श्लो

शान्तिपति अनिरुद्धः विश्वस्य् स्थितिकारणः । एवं भगवतः पञ्चरूपाणां नारायण, वासुदेव , सङ्कर्षण, प्रद्युम्न, अनिरुद्धादिरूपाणां सृष्टेः क्रमं तथा तेषां कार्यमपि अत्र उपनिषदुक्तरीत्या वर्णितम् ।

प्रकृतिर्विकृतिमवाप्ता पुंसो वीर्याद्गुणेषु विषमेषु ।

असृजज्जगतां बीजं हन्त महान्तं महितम् ॥[37]

ततः महत्तत्वं प्रादुरभवत् । महत्तत्त्वाभिमानि चतुर्मुखः । जडप्रकृत्यभिमानिनी लक्ष्मी । सा प्रकृतेः महत्तत्वं असृजत् ।

अजनि महाहङ्कारः शितिकण्ठोऽकुण्ठवैभवस्तस्मात् ।

अतनुत यस्त्रितनुतया सेन्द्रियवृन्दारकेन्द्रभूतानि ॥[38]

महत्तत्त्वादहङ्कारतत्त्वं सृष्टम् । अस्याभिमानी रुद्रः । सः त्रितनुं वैकारिक, तैजस, तामस इति स्वीकृत्य इन्द्रियाभिमानिनः असृजत् ।

तत्त्वानामपटूनां संयुज्य स्वं विधातुमायतनम् ।

रूपै रूपेषु रतस्तावद्भिः स कृतवानिदं कृपया ।

ब्रह्माण्डेऽखण्डमूर्तिर्दशशतसकलाङ्गो महापूरुषः स –

न्नापातालाद्वितन्वन् सुखचिदवयवान् व्यज्तमासत्यलोकात् ।

जीवाजीवाख्यमेतत् ससुरनरमसौ सासुरं साधु सृष्ट्वा ।

प्रत्येकं तत्तदाख्यानियतिकृदखिलांस्तानथार्थान् विवेश ॥[39]

भगवतः विराड्रूपदर्शनं वर्णयति । आवितलात् सत्यलोकपर्यन्तं बृहद्रूपं स्वीकृत्य ततः सुरानसुरान् नरान् प्राणिनः तत्वानि इत्यादिकमसृजत् । भागवतस्य द्वितीयस्कन्द्स्य प्रथमाध्याये विराड्रूपवर्णनं दृश्यते । भगवतः विराट्-रूपचिन्तनम्

इह संसारे विविधसांसारिकदुःखदोषादिभिः पीडिताः अत एव जर्झरिताः मानवाः संसारात् मुक्तिं प्राप्तुं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थप्राप्त्यर्थं च सर्वशक्तिमन्तं

---

[37] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १७ श्लो

[38] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १८ श्लो

[39] शुभोदयम् , प्रादुर्भावकाण्डः, द्वितीयवर्गः , १९, २० श्लो

सर्वान्तर्यामिणं भगवन्तं प्रार्थयन्ति । भगवत्प्रसादादेव मोक्षप्राप्तिरिति श्रीमन्मध्वाचार्याः । भगवत्प्रसादस्तु भक्त्या एव सिध्यति । भक्तिश्च नवविधा -

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

इति भागवतोक्तेः स्मरणापरपर्यायवाच्यस्य चिन्तनस्यापि भक्तेः अङ्गत्वमङ्गीकृतम् । अर्थात् भगवतः चिन्तनमपि मोक्षप्रदायकमिति भावः । कथं चिन्तनं करणीयं ? कस्य वा रूपस्य ? निराकारस्य परमात्मनः रूपचिन्तनं कथमित्यादिशङ्काः उत्पद्यन्ते मुमुक्षूणां मनसि । ईदृशः प्रश्नः राजर्षिणा परीक्षितेनापि पृष्टः शुकाचार्यसन्निधौ ।

भागवतस्य द्वितीये स्कन्धे प्रथमाध्याये राजा परीक्षितः शुकमहर्षिमपृच्छत् संसारात् मुक्तिप्राप्त्युपायः कः इति । तदा सन्तुष्टेन ऋषिणा उत्तररूपेण विराट् रूपचिन्तनमुपदिष्टम् । श्रोतव्येषु विषयेषु सर्वोत्तमं भगवच्चिन्तनम् । जीविनः स्वस्य जीवितावधौ अर्धभागं निद्रायां शेषं दारापत्यगृहादिविषयेषु यापयन्ति । किन्तु यः विवेकी स तु सदैव भगवच्चिन्तनपरः आयुषः सार्थक्यं कृत्वा मोक्षं प्राप्नोति यथा खट्वाङ्गराजः स्वस्य जीवितावधिं क्षणद्वयमिति मत्वा जीवितस्य अन्तिमकाले विरक्तो भूत्वा भगवति मनो निधाय मुक्तोऽभवत् । "तव तु सप्ताहं जीवितावधिः । तस्मात् यत्कर्तव्यं तत्कुरु" इति सूपदिष्टः राजा ध्यानं चिन्तनं कथं करणीयमित्यपृच्छत् । तदा शुकोऽवर्णयत् भगवतः विराट् रूपम् ।यन्मया पूर्वं द्वापरादौ भगवतः बादरायणात् अधीतं तदेव विवृणोमीति अवदत् शुकमुनिः । अत्र "द्वापरादौ पितुर्द्वैपायनात्..." इत्यत्र द्वापरस्य प्रारम्भे इति न ज्ञेयः यतो हि द्वापरस्य आदौ व्यासस्य अवतार एव नाभवदिति हेतोः । द्वापरे कृष्णावतारस्य पूर्वं मया अधीतमिति ज्ञेयः । द्वापरादौ शब्दस्य अनेकार्थान् पाङ्घ्री आचार्यः विशदीकरोति । केचन अधोदत्ताः ।

१. द्वापरः आदिः यस्य सः तस्मिन्- द्वापरकल्योः युगसन्धिकाले इत्यर्थः ।

२. द्वापरश्च आदिश्च द्वापरादिः तस्मिन् -द्वापरे वर्तमानकालात् पूर्वमिति ।

३. परः अदश्च परादौ द्वौ परादौ यस्मिन् सः - परः सर्वोत्तमः अदः कर्म अत्तीति अदः

जीवः । सर्वोत्तमस्य जीवानां च विषयः यस्मिन् पुराणे तत् भागवतमधीतवानिति । प्रथमतः ध्यानं यः करोति तस्य लक्षणमुक्तम् । जितासनो जितश्वासो.... इत्यादिश्लोकैः अधिकारिणः लक्षणमुक्तम् ।[40] अन्त्यकाले सन्निहिते सति स्वगृहात् दूरे एकान्ते विधिवत्कल्पितासने स्थित्वा अ उ मेति त्रिवृत् ब्रह्माक्षरं मनसा आवर्तयेत् । एवं कुर्वन् परं ब्रह्म अनुस्मरन् विरक्तो भूत्वा विषयेभ्यो मनो नियच्छेत् भगवति मनः धारयेदिति ध्यानात् पूर्वं कर्तव्यमाणा विधिरुक्ता ।

ब्रह्माण्डकोश अर्थात् पञ्चमहाभूतमहत्तत्त्वाद्यावरणयुतः अण्डकोशः शिलावत् देहः भगवतः,अर्थात् प्रतिमास्थानीयः । यः पुरुषः इदं ब्रह्माण्डं धरति स एव वैराजः स एव सर्वोत्तमः विष्णुरिति भागवततन्त्रे[41] । विराट्नामक चतुर्मुखब्रह्मान्तर्गतरूपं धारणाविषयभगवद्रूपम् । शिलावद्देहे परमात्मनि जडत्वादि दोषाः अपि सङ्ग्च्छन्ते किम् इत्युक्ते न तथा जडत्वादिदोषाः भगवति । यतो हि शिलादिकं भगवदधीनं । अतः न शिलासंस्थभगवतो दुःखभोगः । तदुक्तं ब्रह्मवैवर्ते "शिलावत्तस्य देहोऽयमण्डकोशस्तु सावृतिः तत्तन्त्रत्त्वान्न तत्संस्थदुःखभोगोऽस्य न क्वचित्" इति ।[42]

विराट् पुरुषस्य पादमूलक हि पातालल्लोकः पार्ष्णिप्रपदे रसातलं महातलं सुगुल्फौ जङ्घे तलातलम् । अत्र अभेदः नोच्यते किन्तु ज्ञानानन्दात्मकशरीरस्य भगवतः जडस्य च अभेदस्यासम्भावित्वात् विवक्षाभेदो ग्राह्यः । विवक्षाभेदः तु इत्थं , चतुर्दशलोकात्मिका प्रतिमा अपि भगवतः एका प्रतिमा । तत्र सर्वे लोकाः अवयवाः । प्रतिमा अवयविनी । एतदभिप्रायेण अभेदः उक्तः "प्रतिमापेक्षयाङ्गानि स्वरूपापेक्षया तज्जानि तदाश्रितानि च

[40] भागवत २ स्कन्दः, १ अध्यायः, २३ श्लो
[41] वैराजस्तगतो विष्णुरथवा सर्वतो वरः - म. भा ता-२-१,२५
[42] म. भा. ता- २-१-२४

"[43] इत्युक्तेः । किन्तु भगवतः सच्चिद्रूपस्यावयवैः लोकाः जाताः अवयवानाश्रिताश्च इति स्वरूपापेक्षया अपि सामान्याधिकरण्यमुपपद्यते ।

जानुभ्यां सुतलं, ऊरुद्वयात् अतलवितलं च, जघनाभ्यां महीतलं भूलोकः विशेषतः चिन्तनीयः, नाभीसरसः अन्तरिक्षः ।[44] वक्षस्थलात् ज्योतिर्लोकः, ग्रीवायाः महर्लोकः, वदनात् जनोलोकः, ललाटात् तपोलोकः, शिरसः सत्यलोकः । बाहोः इन्द्रादयः जाताः, कर्णाभ्यां दिशः, श्रोत्राभ्यां शब्दाः, नासिकायाः अश्विनीदेवौ, घ्राणेन्द्रियात् गन्धः, मुखादग्निर्जातः [45]। अक्षिभ्यां द्युलोकः, चक्षुभ्यां सूर्यः,[46] पक्ष्मभ्यां देवमनुष्याणां उभे अहनि, भ्रूभ्रमणात् ब्रह्मस्थानं, तालोः आपः, जिह्वायाः च रसः इति वेद्याः । भगवतः गिर्भ्यः गायत्रीत्यादिछन्दांसि, दंष्ट्रेभ्यः अर्यमा इन्दुश्च, दन्तेभ्यः नक्षत्राणि, हासात् उन्मादः, अपाङ्गात् विश्वःइति ज्ञेयम् । अत्र चक्षुषः सूर्यः मनसः चन्द्रमाः इति श्लोकान्तरे उक्तं । पुनरत्र पुनः अर्यमेन्दू दंष्ट्राः इत्युक्तिः देवतानां बह्वङ्गत्वादिति उक्तिर्युज्यते । तदुक्तं ब्रह्मतर्के ।[47]

प्रतिमापेक्षयाङ्गानि भूरादीनि स्वरूपतः ।
तदाश्रितानि तज्जानि बह्वङ्गत्वं बहुत्वतः ॥

उत्तरोष्ठात् लज्जा, अधरात् लोभः, धर्मः हरेः स्तनद्वयात्, पृष्टात् अधर्मः, गुह्येन्द्रियात् प्रजापतिः, वृषणाभ्यां मित्रावरुणौ, कुक्षेः समुद्रः, अस्थिसमूहादेव गिरयः । नाडीभ्यः नद्यः, रोमभ्यः वृक्षाः, वीर्यादन्नं, ?स्वसितात् वायुः,[48] गमनात् आयुः, भगवतः कर्मणः एव सत्वादिगुणप्रवाहः वा संसारः । केशेभ्यः मेघाः, वस्त्रात् सन्ध्ये, हृदयादव्यक्तं, चन्द्रमाः मनसः,[49] मतेस्तस्य विज्ञानतत्वमन्तःकरणात् रुद्रः । अश्वाश्वत्थगजाः नखेभ्यः, पशवः श्रोणिदेशमाश्रिताः । हरेः शब्दोच्चारणात् वचांसि जातानि, मनीषायाश्च स्वायम्भुवमनुः, परमात्मनः स्वरस्मृतेः गन्धर्वविद्याधरचारणाप्सरस्त्रियः जाताः । ब्राह्मणाः मुखात्, बाहोः

---

[43] म. भा. ता -२-१-२६
[44] नाभ्याः आसीदन्तरिक्षे - पुरुषसूक्ते
[45] मुखादिन्द्रश्चाग्निश्च- पुरुषसूक्ते
[46] चक्षोः सूर्योऽजायत- पुरुषसूक्ते
[47] म. भा. ता-२-१-३१
[48] प्राणाद्वायुरजायत
[49] चन्द्रमा मनसो जातः- पुरुषसूक्ते

क्षत्रियाः, ऊरुभ्यां वैश्याः, पद्भ्यां शूद्राः अजायन्त [50]। हरेः मध्यदेहः हव्यकव्यजनकः । लोके ये ये पदार्थानि सन्ति तेषां सर्वेषां जननं विराट् नामकपरमात्मनः देहादेव इति ज्ञेयम् । त्रिषष्टि पदार्थानामुल्लेखो अत्र दृश्यते । अभ्युदयकाण्डे शुभस्य धर्ममार्गे कालयापनं वर्णितम् यथा

विषयेषु स पञ्चसु पञ्च निजान् ।
निदधे सचिवान्नियमेन शुचीन्।
निजधर्मपथागतमर्थचयं ।
पुरि यक्षमखाय निनाय सखा ॥
कनकानकचामरचारुमणीन् ।
मधुहेम घटान् मणिपद्म घटान् ।
धनमाहृतमाहृतमप्यमितम् ।
व्ययमेष निनाय परार्चनया ॥[51]

दशेन्द्रियान् वशीकृत्य शुचिर्भूत्वा, स्वयार्जितवित्तं दाने विनियोज्य स कालं यापितवानिति अत्र निरूपितः ।

भगवतः गुणवर्णनम् एवं क्रियते

स्वचिन्मयागण्यगुणामृतार्णवं ।
नारायणं निष्कलमस्य कारणम् ।
ब्रह्माह्वयं प्राहुरुपह्वरप्रियं ।
वेदन्तिनो यक्षपतिं क्षितीश्वर ॥
अपाणिपादाक्षयुतो हि निष्कलः ।
कथं जगन्त्येष सृजेच्चतुर्दश ।
प्रवर्तयेद्वा न हि कुत्रचि-त्कार्याणि ।

---

[50] पद्भ्यां शूद्रो अजायत - पुरुषसूक्ते
[51] शुभोदयम् -अभ्युदयकाण्ड- प्रथमवर्गः ,- २,३ श्लो

लोके कुणिपङ्गुवीक्षणाः ॥[52]

अमेययेच्छाह्वययाऽऽत्ममायया ।

सच्चिन्मयानन्तवपुः स पठ्यते ।

प्रवर्तकः प्राणभृतां च वैभवात् ।

सर्वं स्वतन्त्रे घटतेऽत्र शोभनम् ॥[53]

अत्र भगवतः सच्चिदानन्दमयत्त्वं अर्थात् अप्राकृतत्वं , निष्कलमित्यनेन दोषविवर्जितत्वं, अपाणिपादमित्यनेन निराकारत्वं, उक्त्वा इत्थम्भूतं चतुर्मुखः यः सृष्टिकर्ता इति ख्यातः सः कथं सृजेदिति भगवतः चतुर्मुखात् उत्तमत्वमुक्तम् । अमेयमित्यनेन न सम्पुर्णतया एनं ज्ञातुं शक्यते इति सूचयति । तथा सर्वप्रवर्तक्त्वं स्वतन्त्रत्वञ्च अत्र उक्तम् ।

एवं काव्यमिदं आलङ्कारिकदृशा तथा सैद्धान्तिकदृशा उत्तमकाव्यमिति निर्णीयते ।

३.३. मणिमञ्जरी

श्रीनारायण पण्डिताचार्य विरचिता मणिमञ्जरीति लघुकाव्यं रामायण-भागवत पुराणाधारितम् । प्रथमसर्गे सृष्ट्यादिकार्याणामुल्लेखः, तारतम्यश्च रामायण कथा च दृश्यते । द्वितीयसर्गे हनूमतः सेवा, रावणसंहारादि कथाः वर्णिताः । तृतीयसर्गे चतुर्थसर्गे च भागवतोक्तप्रकारेण कृष्णकथा वर्णिता तथा द्वापरे भीमसेनेन कृता कृष्णसेवा च वर्णिता । पञ्चमसर्गे वेदविरुद्धार्थप्रतिपदकान् विषयान् जगति प्रसरितुं कलिमुखादिदैत्यैः कृतः प्रयत्नः वर्णितः । षष्ठे सर्गे सङ्करनामकस्य शठस्य पूर्वजन्मवृत्तान्तः वर्णितः । सप्तमे सर्गेऽपि स वृत्तान्तः अनुवर्तितः । अष्टमे सर्गे मायावादनिरसनं श्रीमध्वाचार्याणामवतार - वर्णनमित्यादि वृत्तान्ताः वर्णिताः ।

ऐतिहासिकदृशाऽध्ययनम् – इक्ष्वाकुवंशस्य इतिहासमुल्लिखति कविः

तस्य घ्राणादभूच्छ्रीनिक्ष्वाकुः क्षुवतो मनोः ।

---

[52] शुभोदयम् -प्रादुर्भावकाण्ड- प्रथमवर्गः ,-६,७ श्लो

[53] शुभोदयम् -प्रादुर्भावकाण्ड- प्रथमवर्गः ,-८ श्लो

तपस्तप्त्वा विरिञ्चात् स लेभे रङ्गेश्वरं हरिम् ॥[54]

विकुक्षिस्समभूत्तस्य पुरञ्जय पुरोगमाः।
तदन्वये व्यजायन्त शूराः राजर्षयः परेः ॥[55]

तस्मिन्वंशे दशरथो बभूवात्यन्त-भाग्यवान् ।
सोऽर्चन् वैमानिकं वष्णुं ररक्ष महतीं महीम् ॥[56]

(१५) इति संक्षिप्ततया रघुवंशस्य परिचयं कारयति । एवं चन्द्रवंशस्यापि वर्णनं वर्तते –

हिमांशोरत्रिपुत्रस्य बुधो नाम सुतोऽभवत् ।
पुरूरवा महाराजस्तस्य पुत्रो व्यजायत ॥[57]
तस्यायुरभवत्पुत्रो नहुषस्तस्य नन्दनः ।
ययातिरभवत्तस्य नन्दनो बलवीर्यवान् ॥
देवयानीं च् शर्मिष्ठां स उवाह प्रिये उभे ।
प्रथमोशनसः पुत्री द्वितीया वृषपर्वणः ।
यदुं च तुर्वसुं चैव देवयान्यामजीननत् ।
द्रुह्युं चानुञ्च पूरुञ्च शर्मिष्ठायामजीजनत् ।
यदोर्वंशे महाराजाः कार्तवीर्यपुरोगमाः ।
बभूवुर्भगवद्भक्तास्तपोज्ञान परायणाः ॥[58]
पुरोर्वंशे तु राजानः आसन् दौष्यन्तिपूर्वकाः ।
तेषां कीर्त्या च विक्रान्त्या समस्ताः पूरिताः दिशः ॥(६)

चन्द्रात् बुधः, तस्मात् पुरूरवः, ततः आयुः, तस्य नहुषः, तस्मात् ययातिः अभवत् । ययातेः पञ्चपुत्राः यदुतुर्वसू, द्रुह्यु अनु पुरुश्च । यदोर्वंशे कार्तवीर्यार्जुनदयः बभूवुः । पुरोर्वंशे

[54] मणिमञ्जरी १३ श्लो
[55] मणिमञ्जरी- स १, १४ श्लो
[56] मणिमञ्जरी- स १, १५ श्लो

[57] मणिमञ्जरी , ३ स, १ श्लो
[58] मणिमञ्जरी , ३ स, २-५ श्लो

दुष्यन्तादयः बभूवुः । तस्यैव वंशे शन्तनुः वरुणः बभूव ।तस्य विचित्रवीर्य- चित्राङ्गद इति द्वौ पुत्रौ[59] । विचित्रवीर्यस्य पाण्डुः धृतराष्ट्र इति द्वौ पुत्रौ आस्ताम् । धृतराष्ट्रस्य गान्धार्यां दुर्योधनादयः शतपुत्राः आसन् । पाण्डोः कुन्त्यां युधिष्ठिरादयः माद्याञ्च नकुलसहदेवौ आस्ताम् ।

शास्त्राणां इतिहासोऽपि अत्र उल्लिखितः-

उदजृम्भन्त वेदान्ता धर्मा वर्णाश्रमोचिताः।
ब्राह्मणास्तुषुर्यज्ञाः प्रावर्तन्त महीतले ।
विमृष्य भारविर्भाट्टं समुदास्त निरीश्वरम्।
शुश्राव तन्निराकर्तुं मात्सर्येण प्रभाकरः ॥
माघो वररुचिर्बाणो मयूरो कालिदासकः ।
प्रचण्ड कोविदो दण्डीमुख्याश्चैतदुदासत ॥
उम्बकस्तर्कवित्तन्त्री प्रभाकृत्तर्क -तन्त्रवित् ।
मण्डनो रेफनश्चैते भट्टाद्भाट्टमश्रुण्वत ॥
ततः प्राभाकरं चक्रे व्यर्थयुक्तिः प्रभाकरः ।
भट्टसंरब्धमात्सर्यो बहुतन्त्रप्रपञ्चनम् ॥ [60]

इति । वेदोपनिषदानां प्रामाण्यं अङ्गीकुर्वाणः ब्राह्मणाः ज्योतिष्टोमादि यागान् प्रावर्तन्त । निरीश्वभाट्टमतं विमृश्य भारविः तन्मतं निराकुर्वत् । प्रभाकरः तन्मतं निराकर्तुमेव शुश्राव । ततः माघः, वररुचिः ,बाणः, मयूरः ,काळिदासः, दण्डिप्रमुखाः शास्त्रमेनं औदासीन्येन त्यक्त्वा साहित्ये प्रवृत्तिं दर्शयामासुः । उम्बको नाम कश्चित्तर्कवित् , तथा मीमांसाशास्त्रवित् प्रभाकरः ,तर्कमीमांसाकोविदः मण्डनमिश्रः, तथा रेफणश्च भाट्टमतस्य अध्ययनमकुर्वन् । प्रभाकरः भाट्टमतं अस्वीकृत्य प्राभाकरमतं संस्थापयामास ।

---

[59] मणिमञ्जरी , ३ स, ९, १० श्लो

[60] मणिमञ्जरी , ६ स, १-५ श्लो

दूर्वाससः उपदिष्टाः   सत्यप्रज्ञतीर्थाः प्राज्ञतीर्थम् उपदिष्टवन्तः –

'प्राज्ञतीर्थः सशिष्योऽसौ छिन्न दण्डकमण्डलुः।

उद्दिश्य प्रस्थितः प्रातः सत्क्षेत्रं पौरुषोत्तमम् ॥[61]

उपविश्यासने तस्मिन्नुपवेश्य च तान् मुनीन् ।

उवाचाहं भयं वेद्मि भवतां तपसाऽखिलम् ॥

अयं कालः कलेः साक्षात्तेन चोपद्रुता जनाः ।

वत्सा विमुञ्चतात्युग्रं तत्त्वविप्लवसङ्कटम् ॥[62]

तवामी प्राज्ञतीर्थान्तेवासिनः पौरुषोत्तमे ।

क्षेत्रे यान्तं परां सिद्धिमुपास्य पुरुषोत्तमम् ॥[63]

संन्यासयेत् सनिपुणमेककं वंशधरं द्विजं ।

सोप्यन्यमन्यं सोऽपीति वंशो नः स्यादखण्डितः ॥[64]

इति सत्यप्रज्ञः प्राज्ञतीर्थमुपादिदेश । तदनुसृत्य प्राज्ञतीर्थः कञ्चन शिष्यं स्वसम्प्रदायमशिक्षयत् –**एकं वंशधरं शिष्यं कृत्वोपास्तिमशिक्षयत् ।**

अन्यं संन्यस्य सोऽपि स्वं सम्प्रदायमशिक्षयत् ॥[65]

सोऽप्यन्यमित्ययं वंशो नोदच्छिद्यत भागतः ।

ततः केवल वंशेऽस्मिन् मायिभिः स्वजनभ्रमात् ।

गृह्यमाणोऽच्युतप्रेक्षः पारिव्राज्यमुपागमत् ॥[66]

---

[61] मणिमञ्जरी , ८ स, ३ श्लो

[62] मणिमञ्जरी , ८ स, ११ श्लो

[63] मणिमञ्जरी , ८ स, १२ श्लो

[64] मणिमञ्जरी , ८ स, १३ श्लो

[65] मणिमञ्जरी , ८ स, ३२ श्लो

[66] मणिमञ्जरी , ८ स, ३३ श्लो

सत्यप्रज्ञानां वंशे कालान्तरे अच्युतप्रेक्षो नाम मुनिरभूत् । तस्मादेव श्रीमदाचार्याः संन्यासाश्रमं स्वीचक्रुः

सैद्धान्तिकदृशाऽध्ययनम्- मङ्गलमाचरन् कविः

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रियः श्रीमदानन्दतीर्थार्यवल्लभं परममक्षरम् ॥[67]

इति गोविन्दं स्तौति । अत्र भगवतः आनन्दज्ञानपूर्णत्वं अप्राकृतत्त्वं , श्रियः पतिरित्यनेन लक्ष्म्याः उत्तमत्त्वमुक्तम् । अक्षरमित्यनेन नाशरहितत्वं परमित्यनेन सर्वोत्तमत्वं च उक्तम् ।

सृष्टेः आदौ भगवान् सत्वरजस्तमोगुणान् असृजत् [68]। ततः महत्तत्वं । तदेव चतुर्मुखब्रह्मणः वपुः । महत्तत्त्वादहङ्कारतत्त्वमसृजत् । तदेव शिवस्य तनुः । ततः देवान्, मनः, इन्द्रियान् तथा आकाशमसृजत्[69] । आकाशात् वायुः सृष्टः, वायोः तेजः, तेजसः सलिलं, सलिलात् पृथ्वी एवं पञ्चभूतयः सृष्टाः[70] । ततः कूटस्थनामकं जडप्रकृतिं सृष्ट्वा ब्रह्माण्डसृष्टिमकरोत । तत्र चतुर्दशलोकानप्यसृजत्[71] । भगवान् विराड्रूपं स्वीकृत्य तत्त्वाभिमानिनः तथा सनकादींश्च संसृष्टवान् । एवं असुरान्, अविद्यां, ब्राह्मणादिवर्णान्, ब्रह्मचर्याद्याश्रमांश्च असृजत्[72] । चतुर्मुखब्रह्मणः मरीच्यादि ऋषयः सम्बभूवुः । मरीचेः कश्यपः जज्ञे । कश्यपस्य षड् भार्याः आसन् । दितिः, अदितिः, विनता, कद्रुः, कीकसा, दनुः इति । दित्यां दैत्याः, अदित्यां देवाः, विनतायां पक्षिणः, कद्रौ नानाविध सर्पाः, कीकसायां यातुधानाः, दनौ दानवाः अजायन्त । कश्यपस्य सुतात् आदित्यनामकात्

[67] मणिमञ्जरी , १ स, १ श्लो

[68] मणिमञ्जरी , १ स, २ श्लो

[69] मणिमञ्जरी , १ स, ५ श्लो

[70] मणिमञ्जरी , १ स, ४ श्लो

[71] मणिमञ्जरी , १ स, १ श्लो

[72] मणिमञ्जरी , १ स, ७ श्लो

सूर्यात् जातः मनुः वैवस्वत-मनुरिति प्रसिद्धः मानवानां जनकः । तस्य घ्राणादभूत् इक्ष्वाकुः ।

सीतापरित्यागविषये तथ्यं दर्शयति –

सुराणकांस्तमोनेतुं तत्याजेवस जानकीं ।
व्याप्तत्वान्निरवद्यात्वात्तस्यास्त्यागः कथं भवेत् ॥

इति लक्ष्म्याः अवतारः सीतारूपेणाभवत् । सा नित्यानपायिनी, देशतः कालतः हरिणा सह व्याप्ता । अतः तयोः वियोगः कथं स्य़ादिति समाधानं वक्ति । सुराणकैःकृतः लक्ष्मीनारायणयोः वियोगस्य प्रयत्नः सफलः स्यादिति परित्यागः दर्शितः इति ज्ञेयः ।

३.४. कृष्णचारित्र्यमञ्जरीलघुकाव्यम्

श्रीराघवेन्द्रतीर्थश्रीमच्चरण-विरचितेऽस्मिन् लघुकाव्ये भागवतोक्त कृष्णकथा निरूपिता । एकोनत्रिंशच्छ्लोकैः सम्पूर्णकृष्णकथा निबद्धा । श्रीकृष्णस्य जन्मनः आरभ्य द्वारकावासपर्यन्तां कथां वर्णयति । कृष्णभक्ताः नित्यं कृष्णकथायाः पारायणं वा श्रवणं वा कर्तुमिच्छन्ति । समयाभावेन भागवतस्य पठनादिकं न भवेत् । अतः अल्पसमय एव कृष्णकथां पठितुं एकश्लोकीभागवतं रचितम् –

आदौ देवकिदेविगर्भजननं गोपीगृहे वर्धनम् ।
मायापूतनिजीवितापहरणं गोवर्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं कुन्तीसुताः पालनं ।
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥

एकैनैव श्लोकेन दशमस्कन्दभागवतोक्त- कृष्णाकथा निरूपिता। अनेन अस्मत्प्राचीनानां काव्यकौशलं भगवद्भक्तिश्च स्फुटं दृश्यते । एतादृशीप्रतिभासम्पन्ना अस्मत्प्राचीनाः । एतादृशमेव काव्यं कृष्णचारित्र्यमञ्जरी । अत्यल्पसमये कृष्णकथायाः नित्यपारायणं भवेदिति धिया रचितं स्यात् । अत्र कृष्णकथा किञ्चिद्विस्तरेण निरूपिता ।

विष्णुर्ब्रह्मादिदेवैः क्षितिभरहरणे प्रार्थितः प्रादुरासीत् ।

देवक्यां नन्दनन्दी शिशुवधविहितां पूतनां यो जघान ।

उत्थानौत्सुक्यकाले रथचरणगतं चासुरं पादघातै-

श्चक्रावर्तं च मात्रा गुरुरिति निहितो भूतले सोऽवतान्माम् ॥[73]१ श्लो

इति मङ्गलमाचरन् कविः अत्यल्पशब्दैः दीर्घवृत्तान्तं कथयति । कृष्णावतारात्पूर्वं ब्रह्मादिदेवैः भूभारोत्तारणाय प्रार्थितः विष्णुः देवक्यामजनि । **नन्दनन्दीति** शब्देन नन्दगोपस्य गृहे नन्दादीन् बाललीलाभिः सन्तोषयन् उवास इति । उत्थानौत्सुक्यकाले निष्क्रमणमहोत्सवे रथचरणं नाम चक्रगतं शकटासुरं जघान इति वृत्तान्तः कथितः । गर्गाचार्येण कृतनामा बाललीलाभिः गोपिकान् तोषयामास । गोपालकरूपेण गौः रक्षितवान् । कालियमर्दनं कृत्वा दावाग्निं पीत्वा वृक्षरूपेण स्थितस्य कस्यचिदसुरस्य संहारमकरोत् । रासक्रीडया गोपिकाः तोषयित्वा संवृष्टेः स्वजनान् उद्धारयामास । केशीधेनुकाद्यसुरान् हत्वा अक्रूरेणाहूतः मथुरां जगाम । मार्गे भक्तमक्रूरं निजस्वरूपं दर्शयामास । मथुरायां रजकं हत्वा, सुधाम्नं , त्रिवक्राञ्च अन्वगृह्णत् । शार्वधनुषं भङ्क्त्वा चाणूरमुष्टिकादीन् हत्वा कंसं जघान । ततः सान्दीपनेः सकाशात् सर्वविद्यां प्राप्य जरासन्धं बहुशो विद्रुतं व्यतनुत। गोमन्तक्षेत्रे श्रुगालवासुदेवं हत्वा समुद्रमध्ये द्वारकानगरीं निर्माय स्वजनान् तत्र नीतवान् । रुग्मिणीं , सत्यभामां, जाम्बवतीं , कालिन्दीं, मित्रविन्दां, नीलां , मद्रेशकन्यां भद्राञ्च उपयेमे । नरकासुरं संहृत्य तत्रत्याः शोडषसहस्रकन्याः उपयेमे । पौण्ड्रकवासुदेवं च जघान । मातुः पुत्रान् कंसहतान् अदर्शयत्। द्वारकायां नारदं अनुगृहीत्वा अनन्तरूपेण स्वपत्निभिस्सह कीडयामास । भीमेन जरासन्धसंहारं कारयित्वा तस्य सूनुं भगदत्तं राज्ये नियोजयामास । विदेहदेशे कतिपयदिनान् नीत्वा उपप्लाव्यनगरमगमत् । कुरु पाण्दवयोः मध्ये जातस्य कलहस्य निवारणार्थं दूतरूपेण हस्तिनापुरीं अगच्छत् । अर्जुनाय पाशुप्तास्त्रं दापयित्वा कुरुक्षेत्रयुद्धे सारथिर्भूत्वा पाण्डवानरक्षत् । दन्तवक्रं निपात्य स्वजानान् यः पाति स मां पायादिति कविः प्रार्थयति ।

---

[73] कृष्णाचारित्र्यमञ्जरी-१ श्लो

आलङ्कारिकदृशाध्ययनम्- स्रग्धरा वृत्ते निबद्धाः श्लोकाः ।

सैद्धान्तिकदृशाध्ययनम् – कृष्णस्य मुखे ब्रह्माण्डो द्विवारं दृष्टः इति । एकदा जृम्भमाणस्य कृष्णस्य मुखे दृष्टः पुनः मृद्भुञ्जान्अस्यास्ये दृष्टः इति विषयं सूचयति अनेन श्लोकेन –

यो मातुर्जृम्भमाणो जगदिदमखिलं दर्शयन्नङ्करूढो ।
गर्गेणाचीर्णनामा कृतरुचिरमहाबाललीलो वयस्यैः ।
गोपीगेहेषु भाण्डस्थितमुरुदयया क्षीरदध्याधि मुष्णन् ।
मृन्मा भक्षीति मातुः स्ववदनजगद्भासयन् भासतां मे ॥ [74]

अत्र अन्योऽपि विषयः ज्ञेयः । उरुदयया भाण्डस्थितं क्षीरदध्यादि मुष्णन् इत्यत्र स्वहितार्थे वा भुभुक्षया वा क्षीरादिकानां नाचोरयत् किन्तु तन्मुखेन तत्रत्यानां पापहरणमेव अस्य मुखोद्देश्यमासीत् । कृष्णः नित्यतृप्तः , विषयेषु तस्य आसक्तिर्नास्ति । भक्ताननुग्रहीतुं क्षीरदध्यादिकं चोरयित्वा तेषां पापान् सङ्कर्षति स्म इति ज्ञेयः । सर्वं जगदिदं भगवतः अधीनमेव । अतः तस्य गृहे यदि किञ्चित् स्व्यकरोत् तत् कथं वा चौर्यं भवेत्? अतः गोपीकाः उद्धर्तुम् एवं कृतमिति ग्राह्यम् ।

धनपतेः कुबेरस्य तनयौ नलकूबरौ । देवलऋषिणा शप्तौ वृक्षरूपेण नन्दगोकुले आस्तां । तावुद्धर्तुं कृष्णः मन्त्रभङ्गं कृत्वा यशोदया पाशेन उलूखले बद्धः । उलूखलं नयन् वृक्षरूपौ नलकूबरौ पातयित्वा तौ मोचयामास –**कृच्छ्रेणुलूखले यो धनपतितनयौ मोचयामास शापात्**[75]

वस्तुतः गोपिकास्त्रियः अप्सरस्त्रियः । कृष्ण एव अस्माकं पतिस्स्यादिति कृततपसः-कृष्णोऽस्माकं पतिःस्यादिति कृततपसां मज्जने गोपिकानां...[76] । अतः ताः स्वीकृतवान् न कामादिदोषैः । सप्तवर्षीयस्य बालस्य कथं वा कामादिदोषाः ?

---

[74] कृष्णचारित्र्यमञ्जरी-२ श्लो

[75] कृष्णचारित्र्यमञ्जरी-३ श्लो

[76] कृष्णचारित्र्यमञ्जरी-६ श्लो

गोपीनां वस्त्रापहरणमपि ताः उद्धर्तुमेव इति ज्ञेयः । यमुनायां नग्नाः भूत्वा जलक्रीडां कुर्वन्त्यः ताः । एतत् शास्त्रविरुद्धं अतः तासां वस्त्राणि अपहार्य ताः उद्धारयामास ।

वरुणभृत्यैः अपहृतं नन्दगोपं ततः आनीय स्वलोकं दर्शयित्वा अन्वगृह्णत् । वस्तुतः नन्दगोपः अकाले स्नातुमगच्छत् । अतः तं दण्डयितुं वरुणभृत्याः तं बन्धयामासुः । किन्तु कृष्णस्याज्ञामनुसृत्य तं मोचयामासुः ।[77]

अक्रूरः कंसभृत्यः किन्तु कृष्णभक्तः । कृष्णं संहर्तुं मथुरामानेतुं कंसः अक्रूरं प्रेषयामास । अनिच्छन्नपि कृष्णबलरामौ मथुरां नीतवान् अक्रूरः । मार्गमध्ये सन्ध्याकाले प्राप्ते सायंसन्ध्योपासनं कर्तुं यमुनायां न्यमज्जत् । तत्र शेषशायिनं कृष्णं वीक्ष्य एष एव नारायणः इति मत्वा भगवद्रूपेषु भेदः नास्तीति ज्ञात्वा तं ननाम ।[78]

शङ्खचूडनामकं असुरं हत्वा तस्य मणिं बलरामाय ददौ । मथुरां गत्वा कञ्चन रजकं हतवान् किमर्थमित्युक्ते स रजकः कश्चिदसुरः । भूभारहरणायैव कृष्णस्य् जन्म अभूत् । अतः तं हतवान् इति ग्राह्यः । त्रिवक्रापि अप्सरस्त्रीः । तपस्तप्त्वा कृष्णस्य पत्नी भवितुम् इष्टं तया । तस्याः तपसा तुष्टः देवः तां सुरूपिणीं कृत्वा ताम् उपयेमे ।

कंसहृताः देवकीपुत्राः वस्तुतः मरीचिऋषिपुत्राः । शापात् कालनेमिनः पुत्रा भूत्वा अवध्यत्वं प्राप्तवन्तः । कालनेमिनः हस्तेनैव मरणं स्यादिति वरं प्राप्य दुष्कार्येषु रताः । कालनेमी एव कंसः अतः तस्य हस्तेन मारिताः । लक्ष्म्याः विशेषशक्त्या समुद्रे क्षिप्तदेहाः सुप्तावस्थां प्राप्य पुनः देवक्याः पुत्ररूपं प्राप्य कंसेन हताः ।[79]

---

[77] कृष्णचारित्र्यमञ्जरी-७ श्लो

[78] कृष्णचारित्र्यमञ्जरी-१० श्लो

[79] भागवतम् -दशमस्कन्दः

चतुर्थोऽध्यायः

४.ऐतिहासिकलघुकाव्यानामध्ययनम्

इतिहासमाधृत्य नैकानि काव्यानि रचितानि । अत्र अध्ययनार्थं गलगलिरामाचार्यविरचितं स्वराज्यरत्नाकरम्, जयसिंहं प्रतिशिवाजिप्रभोः पत्रं, श्रीसुमतीन्द्रतीर्थविरचिता जयघोषणा, चक्रवालप्रमन्धः इति चत्वारि काव्यानि स्वीकृतानि ।

४.१. गलगलिरामाचार्यस्य देशकालकृतयः

कर्णाटकराज्यस्य बागल्कोटे मण्डले शोभते गलगलीति ग्रामः विद्वज्जनानां जननभूमिरिव । तत्र गोविन्दाचार्य - बाळाचार्य-मुद्गलाचार्य प्रभृतयः पण्डिततल्लजाः विद्यासरस्वत्याः सेवां कृत्वा श्रीविद्याधीश- श्रीसत्यबोधतीर्थादि उत्तरादिमठाधीशानां तथा श्रीवादिराजगुरुसार्वभौमानां अनुग्रहपात्राः बभूवुः । तत्र श्रीनृसिंहाचार्यनामा पण्डितोत्तमः स्वविद्यया निस्पृहतया वैराग्यादिगुणोपेतः विप्रबान्धवैः वन्दनीय आसीत् । तस्य षट् पुत्राः आसन् । तेषु ज्येष्ठः अण्णय्याचार्यः, द्वितीयः सुब्रह्मण्याचार्यः, तृतीयः कूर्माचार्यः, चतुर्थः मुद्दुविट्ठलाचार्यः, पञ्चमः श्रीरामाचार्यः च ।

सहजप्रतिभान्वितः श्रीरामः बाल्य एव अमरकोश, वैजयन्तीत्यादिकोशान् आत्मसादकरोत् । तदनु स्वाग्रजेण सुब्रह्मण्येन व्याकरणशास्त्रमधीतवान् । श्रीरामदुर्गश्रीनिवासाचार्यतः महाभाष्यमधीतवान् । कूर्मशर्मणः तर्कमधीतं तथा कल्लापुरगोपालकृष्णाचार्यनामकात् तर्के अनितरसाधारणपटुत्वं प्राप्तं तेन । तथापि तस्य विद्यातृषा न कुण्ठिता । तदा यलत्तुरुकृष्णाचार्यवर्येण सह तस्य मेलनमभवत् । यलत्तुरुआचार्यः काशीक्षेत्रे अद्वैतसभायां स्वविरचितनवनवीनैः कोटिक्रमैः तान् पराजयित्वा मध्वमतध्वजं संस्थापयामास । रामाचार्यः यलत्तुरुआचार्यस्य तर्कपाण्डित्यं प्रगल्भप्रतिभाविषये श्रुत्वा तत्सकाशात् तर्कम्ध्येतव्यमिति धिया अगच्छत् । गलगलीत्युपाधिं

श्रुत्वा मुदितः यलत्तुराचार्यः सद्य एव तं स्वशिष्यरूपेण स्व्यकुर्वत् । एवं विद्यार्जने एव रतमनस्कः रामाचार्यः भ्रमरवत् सर्वतः विद्यामर्जयामास ।

लोकमान्यतिलक-लालालजपतराय-बिपिन्चन्द्रपाल-अरविन्दघोष-रासबिहारिबोस इत्यादि नायकैः प्रारब्धस्य स्वराज्यान्दोलनस्य सहस्पन्दनं कुर्वन् यलत्तुरुआचार्याः शताधिकान् श्लोकान् रचयित्वा आङ्ग्लानां दौष्ट्यं, भारतीयान् प्रति तेषां दौर्जन्यं, शोषकतेत्यादिविषयान् परिणामकारिरीत्या आविरकुर्वन् । विजयपुरमण्डले सर्वजनानांहृदयेषु स्वदेशप्रेममाजनयत् । तदनु गलगलिग्रामेऽपि स्वातन्त्र्यसङ्ग्रामस्य ज्योतिः दीप्ता यलत्तुरुआचार्येणैव । तस्यैव प्रेरणया रमाचार्योऽपि स्वराज्यरत्नाकरं रचयामास ।

न केवलं काव्यरचनायां किन्तु पत्रिकाक्षेत्रेऽपि अस्य योगदानं श्लाघनीयं वर्तते । गालवक्षेत्रे रामाचार्येण 'सौदामिनी' नाम्नी पत्रिका कतिपयकालपर्यन्तं प्रचलिता । ततः शिष्यगृहस्थैः प्रार्थितः बेळगांव नगरमगच्छत् । तत्र बुर्लिश्रीनिवासाचार्यमहाभागस्य सहयोगदानेन 'मधुरवाणी'ति संस्कृतपत्रिका प्रारब्धा । एषा पत्रिका न केवलं भारते किन्तु पाश्चात्यदेशेष्वपि विस्तृतिं लेभे ।

सर् राधाकृष्णन् महोदयः रषियादेशे, बि.जि,खेर् महोदयः ब्रिटन् देशे, अन्ये च महनीयाः जर्मन्, फ्रान्स्,अमेरिकादेशेषु मधुरवाण्याः प्रसारकार्यं व्यदधुः । पं. मदनमोहनमालवीय, कैलासनाथकाटजु, एन्.सि.केळकर्, सि.डि.देशमुख, लोकनायक अणे, पं.क्षमाराव प्रभृतयः नेतारः मधुरवाण्याः ग्राहकाः अभिमानिनः प्रोत्साहकाश्च आसन् । एतत्सर्वं रामाचार्यस्य सरसलेखनानां परिणाम एवेति निश्चप्रचम् ।

रामाचार्यस्य काव्यप्रतिभा

रामाचार्यस्य कविप्रतिभाऽप्रतिमाऽऽसीत् । कदाचित् रामाचार्यः काशीक्षेत्रे कविगोष्ठ्यां पञ्चषनिमेषेष्वेव विष्णुस्तोत्रपरान् श्लोकानरचयत् । तदा सभाध्यक्षेण मदनमोहनमालवीयेन वैष्णवकवयोऽत्रभवन्तः भवन्तः काशीशं विश्वनाथं कदाचिदपि किं

नैवोपश्लोकयन्ति? इति पृष्टस्सन् तत्रैव मनोनियामकं रुद्रं श्लोकपञ्चकेन स्तुवन् अद्वितीयप्रतिभां दर्शयामास ।

गलगलिरामाचार्यविरचिताः कृतयः

मधुराञ्जलिः इत्याख्ये काव्यगुच्छे रामाचार्यविरचितानि गद्यपद्यकाव्यानि सङ्गृहीतानि । तत्र प्रसिद्धानि अत्र दीयन्ते ।

१	यदुवंशमहाकाव्यम्	२	स्वराज्यरत्नाकरः
३	नैकानि सुभाषितानि	४	मुनि-मेनकासंवादः
५	देवमन्दिराक्रन्दनम्	६	श्रीधीरेन्द्रस्तोत्रम्
७	श्रीसत्यध्यानतीर्थजीवनगाथा इत्यादि पद्यकाव्यानि	८	देवीवासन्ति
९	सुरसरस्वतीसन्देशः	१०.	कथाः
११.	श्रीगुरुसार्वभौमस्तवनाष्टकम्		

अश्वधाटीश्रीगुरुसार्वभौमस्तवनाष्टकं तु अतिविरलतया लप्स्यमानेषु अश्वधाटीकाव्येष्वन्यतमम् । तथा नैकग्रन्थानां शोधनं प्रकाशनञ्च कृतमनेन विद्वन्मणिना ।

४.२. स्वराज्य रत्नाकरः

स्वातन्त्र्यपूर्वभारतस्य स्थितिं वर्णयन् कविः तद्दिनेषु विद्यमानाः समस्याः प्रति प्रकाशं तनोति । अस्मिन् लघुपद्यकाव्ये गान्धिमुखदेशभक्तानां स्वातन्त्र्यप्राप्तये योगदानं वर्णितम् । काव्यमिदं पञ्चलहरीषु निबद्धम् । प्रथमलहरी स्वराज्यलहरी , द्वितीयलहरी गान्धिटोपीलहरी, तृतिया श्रीचक्रलहरी, चतुर्थलहरी बहिष्कारलहरी, पञ्चमलहरी कारागृहलहरीति ।

स्वराज्यलहरी - मङ्गलपद्ये गोविन्दं स्तुवन् कविः कुविन्दो गोविन्दो इति संस्तुत्य स्वराज्यसङ्ग्रामे खादीवस्त्रस्य प्रामुख्यं स्ववस्त्रसीवनस्य विषये जनानां रुचिः कीदृशी आसीदिति निरूपयति । अस्यां लहर्याम् श्लोकान्ते खादीवस्त्रं स्वदेशीयोदञ्चवसनसुरधेनु इति विशेषणेन श्लाघयति कविः । एषा खादीवस्त्रसुरधेनुः सदा श्रयितव्या इति विज्ञापयति कविः ।

सदा द्वीपान्तरं सञ्चरन्ती आर्याक्षोण्याः धनिकानां गृहाणि निर्वर्त्य भारतदेशे बहुकालात् विद्यमानं दैन्यं अस्वातन्त्र्यं च हृत्वा एषा वस्त्रधेनुः शोभते सा श्रयितव्या इति । खादीवस्त्रस्य अन्वेषणात् पूर्वं अविच्छिन्नतया या पराधीनता आसीत् सा खादीसीवनेन परिहृता । स्वार्थत्यागः तथा स्वदेशप्रेम च वस्त्रधेनोः स्तनौ परिपुष्टौ कुरुतः । परमपुरुषार्थं च तन्वन्ति । गान्धीतिलकादिमहोदयैः पोषिता समुन्नीता उत्तमस्थितिमपि प्राप्तवती । तन्तुसमूहारण्ये चरन्ती स्वालम्बनामकवत्सेन सह उल्लासभरिता । विदेशीयवसनात् अपूतं शरीरं पापं परिहृत्य पवित्रीकरोति । अत एव मङ्गलकारिणी । श्वेतवर्णीया एषा विदेशीयानां दृशः स्फीतश्वेताः करोति । अस्याः सास्ना तुरी (कुविन्दैः उपयुज्यमानम् उपकरणम्) वेम एव तस्य धाम । सर्वेषां पर्याप्तमभीष्टं वितनोति ।

कर्णाटदेशे कलिङ्गे, वङ्गदेशे इत्यादिप्रदेशेषु स्वदेशवसनप्रेम वर्धितम् । अनेन स्वदेशीयवस्त्रसीवनेन सम्पूर्णभारतदेशः मुदितः । पूर्वं आङ्ग्लैः सृष्टा या पराधीनता अनुभूता तां चिन्तां परिहर्तुं चिन्तामणिमिव एषा सुरधेनुः । स्वदेशीयवस्त्रधारणं पाश्चात्यैरपि स्तुत्यमभवत् । विदेशेष्वपि खादीवस्त्रं प्रसिद्धमभूत् । पुरा भारते एव स्वार्थपरैः वणिग्भिः तथा भारतं स्वाधीनं कर्तुमुद्युक्तैः परकीयैश्च रुद्धगमना इदानीं पाश्चात्यैरङ्गीकृता खादीवस्त्रधेनुः देशभक्तैः स्थिरालम्बा अपूर्वं वैभवं प्राप्य भरतभूमौ जागर्ति । प्रकृत्या गोमांसप्रियाः विदेशीयाः तद्विहाय स्वदेशवस्त्रधारणे उत्सुकाः । लालालजपतरायमुखैः पोषिता खादीवस्त्रधेनुः। पञ्जाब् -प्रदेशे मदान्धानां प्रायश्चित्तं कारितवती । मुसलमानैः प्राचीनगुरुपीठस्य ध्वंसः कृतः । तेन क्षुब्धान् धार्मिकान् सान्त्वनं कृतवती । अनेन स्वदेशीयवस्त्रधारणेन हिन्दूजनाः तथा दीनाः यवनाः अपि ऐक्येन एकीभूताः । एतां

खादीवस्त्रधेनुं निजजनाः भारतीयाः सहर्षं सोत्साहमश्यन् । विफलाशाः आङ्ग्लाः सरोषं सेर्ष्यमपश्यन् । केचन तटस्थाः आश्चर्यस्तिमितकौतुकादपश्यन् । केचिदुदासीनाः स्वदेशवस्त्रविषये नोत्सुकाः किन्तु ये भारतस्यौन्नतिमैच्छद्भिः तैः एषा सुरधेनुः उपासिता । आङ्ग्लानां न्यायस्थाने अन्यायाः एव बहवोऽभूवन् । तान् धैर्येण बहिष्कृत्य विरचिता सुरधेनुरेषा ।

आर्तानां बुभुक्षूणां भारतीयानां अशनप्रदात्री, शुभप्रदायिनी, क्षामं नाशयित्वा राज्ञां क्षेमङ्करी एषा । खादीवस्त्रं विपन्नानां भाग्यमिव, नरके पतितानां शरणमिव, दुर्बलान् उद्धरति, आङ्ग्लानां मदं हरति, आलस्यं द्वेष्टि , लक्ष्म्याः सहचरं अर्थात् सम्पदं ददाति । कुविन्दानां बन्धुः, गतिहीनानां सहाया, कृषिकानां मित्रं वणिजां हितकारिणी । भारतीयाः प्रशान्तमनस्काः, अहिंसापराः । तेषां करकमलेन भ्रमितात् चक्रात् समुद्भूतसूत्रसमूहं पवित्रं सर्वेभ्यः स्निह्यति च । भारतभूमेः सहजगुणं लज्जां रक्षति । तथा विदेशीयैः उत्पन्नं परिभवं नाशयति । पवित्रवस्त्रमिदं जगतः समाधानस्थानम् । स्वदेशवस्त्रं भारतदेशाय सौभाग्यं प्रदास्यति । युरोपदेशस्य व्यापारव्यवहारस्यालम्बनरहितं चीना देशस्य पराचीनविभवं च ददाति अर्थात् स्वदेसवस्त्रेण विदेशीयवस्त्रानां उपयोगः न्यूनिभूतः । अनेन युरोप, चीना इत्यादि-देशानां आदायोऽपि न्यूनीभूतः । वस्त्रमेतत् ग्रामान् प्रविश्य विपदं हरति, नगरीः सम्पद्भरिताः करोति, राज्ञां निवासे सदा निवसति । सर्ववयोमानिनामपि स्वदेशवस्त्रं प्रीत्यास्पदं। बालाः, तरुणाः, वृद्धाश्च खादीवस्त्रं धरन्ति मोदन्ते च । स्वदेशवस्त्रं निर्गतिकानां सम्पत् प्रदिशति वस्त्रस्य तन्तवः सुरवनस्य तृणमिव पवित्राः । भारतभुवि प्रसादं सन्तोषं प्रापयति । विदेशीयानां रम्यसौधान् शिथिलयति यन्त्रोद्भूतगुणान् त्यजति । अर्थात् हस्तकौशल्येन निर्मितं वस्त्रं यन्त्र- निर्मितवस्त्रात् भिन्नं विशिष्टं च । बुद्धिहीनानपि वाग्मिनः करोति । प्रगल्भबुधिमतः निस्सन्देहं सन्तोषयति । ये स्वदेशवस्त्रं क्रीणन्ति तान् प्रेम्णा विनोदयति । भारतीयाः मोदवशतः शिरांसि आन्दोलयन्ति । पूर्वार्जितपुण्येन लब्धमिदं वस्त्रम् भारतीयानामभ्युदयार्थं श्रेयसे च । अतः यः पवित्रं अतिसुलभं स्वदेशवस्त्रं निराकरोति तस्मात् अधमः अधन्यः न कोऽपि वर्तते । अस्मिन्

जगति विलम्बफलप्रदाः कठिणतममार्गेण प्राप्तव्याः नानाविघ्नैर्युताः मार्गाः सन्ति किन्तु स्वदेशवस्त्रधेनुः शीघ्रफलोन्मुखी अस्माभिः सदैव आदर्तव्या इति कविः भारतीयान् जागृतान् करोति । यथा पुरा श्रीकृष्णः सुधाम्ना आनीतैः पृथुक-कणसमूहैः प्रीतः तमरक्षत् तथैव स शौरी करुणाकटाक्षं विकिरत्विति प्रार्थयति । विदेशीय-वसन-व्यामोहं तथा मनसः मालिन्यं या श्लथयति सा लहरी पठनादेव सद्बुद्धिं जनयति । एषा लहरी देशीया भवतु इति आशस्ते कविः ।

एवं कविः खादीवस्त्रं कथं स्वदेशसङ्ग्रामे प्रमुखपात्रमवहदिति सुष्टु वर्णयति ।

गान्धिटोपीलहरी -द्वितीयालहरी गान्धीटोपीलहरीति । कविः गान्धीवर्यस्य अनुयायी आसीदिति स्पष्टमनुभूयते । गान्धीमहोदयस्य टोपीमधिकृत्य लहरीयं रचिता ।

यस्याः लोकनेन अधिकारमदान्धजनाः सूर्यं दृष्ट्वा उलूक इव अधिकतापाकुलधिया कोपरहिताः सा गान्धिटोपी नृणाम् हृदि ज्वलतु इति आशास्ते कविः । जनानां शिरसि शोभमाना टोपी जनानां मेधासु विद्यमानं मलं परिहरति । सारासारविचारशक्तिम् तनोति । दम्भाचारविनाशने वज्रायुध इव । इतरेषामपेक्षया अस्याः मौल्यम् अल्पमेव । तदापि भारतवासिनः शिरसि विराजमाना आत्मशुद्धिं कारयति स्वदेशप्रेम जनयति । द्रविणमदं भङ्गं करोति । सनिष्कान् निष्किञ्चनं निर्धनं करोति । इटालियान् अपि त्रुटितान् विदधाति । स्वराज्यप्रेमयुतानां शुभतमा, अस्वातन्त्र्योदधेः उद्धारमाणा नौका, सहकारपिशाचेन आकुलितमतीनां महामन्त्र इव एषा टोपी । आबहोः कालात् यत् कोलाहलकरं वातावरणमासीत्, स्वौदासीन्येन यत् दास्यभावं प्राप्तं तेन प्राप्तसन्तापं हरन्ती एषा टोपी । स्वदेशद्रोह- निबिडं अभेद्यं चिराद्गुरुतरं तिमिरं विनिस्सार्य या ज्वलयति परं ज्योतिं सा टोपी सर्वेषां हृदि ज्वलतु इति कविराशास्ते । स्मृतिमात्रेण एषा टोपी स्फूर्तिं जनयति आर्तिं शमयति ,दर्शनमात्रेण दुरदृष्टं हरति, यदि संस्पृष्टा चन्द्रकिरणमिव शरीरम् शिशिरायति । यदा शिरसि टोपी धार्यते तदा देशप्रेमार्द्राः भारतीयजनाः स्वयं प्रपूता इति मन्यन्ते । उज्ज्वलमणिं तृणीकृत्वा टोपीं किरीटमिव धरन्ति । कविः एषा टोपी शिरस्त्राणं वा, लक्ष्म्याः पाणिकमलं वा, स्वराज्यप्रासादस्य श्रेणी वा, दास्याग्निना तप्तानां सुधावापी वा ,इति

टोपीं विविधदृग्भिः वर्णयति । रामनामसरसि प्रसन्नतानामकनीरे भूरेव हंसी । तस्याः धवलपत्रमिव एषा टोपी झटिति आत्मोन्नतिं प्रदास्यति । स्वदेशप्रेमविसरैः पवित्रैः सुलभैः तीर्थसलिलैः स्नातानां स्वेषां निजजननां प्रेम्णा पूजितानां साम्राट् इति पदवीं अलङ्कृतानां श्वेतच्छत्रमिव अस्ति गान्धीटोपी । अर्थात् नायकानां शिरसि श्वेतच्छत्रमिव राजते इति वर्णयति कविः । इन्दोः धवलिमा यथा सुखकरं तथैव धवला टोपी । अस्याः आकारं अपि मनोज्ञं । एषा टोपी समग्रभारतं प्रीणयति । प्रशान्ते शिरसि गान्धिमहोदयस्य अमलकीर्तिः वर्तत इव , तस्य सेवा साकारा इव, भूदेव्याः मन्दस्मितकान्तिवत् एषा टोपी । स्वदेशभक्तिं जनयति । तथा देशप्रेम सर्वेषां मनसि अचलं करोति । गान्धिमहोदयेन उपदिष्टे सत्पथे प्रेरयति एषा टोपी इति गान्धिटोपीमहिमानं वर्णयति कविः ।

श्रीचक्रलहरी- स्वातन्त्र्यसङ्ग्रामे स्वदेशीयवस्त्रं (खादीवस्त्रं) तथा गान्धीटोपी यथा देशप्रेमिणां अस्त्रमासीत् तथैव चक्रं अर्थात् चरका इति हिन्दीभाषया यदुच्यते तदपि अन्यतमम् अस्त्रमासीत् । गलगलिकविवर्यः चक्रस्यास्य महिमानमधिकृत्य लहरिमेकां अरचयत् । अस्यां लहर्यां कविः चक्रधरं हरिं स्तौति । लक्ष्म्याः चक्रस्पर्धिना स्तनयुगलेन वशः सदा ब्रह्मेन्द्रादिसुरगणवन्द्यः, नक्रात् गजपतिं यः अरक्षत् प्रसन्नास्यः करुणासागरः सः हरिः संसारभयं नाशयतु इति प्रार्थयति ।

गान्धिमहोदयेन आरब्धे असहकारसमरे (छon co-operation movement) शमदमादिगुणाः एव प्रमुखाः । तादृशे समरे चक्रमेतत् महाशस्त्रमासीत् बहुतीक्ष्णं च आसीत् । यत् शत्रुबलं नाशयित्वा हरेः करे लसत् तत् सर्वैः गृहीतव्यमिति जनान् आह्वयति कविः । चक्रमेतत् सदा चलनशीलनमपि नैव श्रान्तिमनुभवति । विदेशीयवणिजां शिरांसि विभ्रमणकारीणि कृत्वा स्वदेशे वेगेन चलति । दृढतर- पाशैः बद्धमपि कठोरं असह्यं दारिद्र्यनिगडं शिथिलयति । दीनेभ्यः नानाविधसुखानि च यच्छति । चलच्चक्रं मधुरशब्दं करोति । स शब्दः गुरुः प्रेम्णा निजशिष्यं मन्त्रोपदेशं कुर्वन्निव श्रमिणाम् भारतीयानां कर्णानन्दकरः । पीठे समारूढाः मुनयः यथा पवित्राणि ब्रह्मसूत्राणि वा व्याकरणसूत्राणि वा

न्यायसूत्राणि वा रचयन्ति स्म तादृशान् मुनीन् अनुकरोतीव चक्रमेतत् पवित्राणि सूत्राणि तन्तूनि रचयति ।

हतबलानां कृते कलियुगे चक्रं निजत्राणोपायम् शस्त्रमिव । यच्चक्रं द्वापरे असुरहननाय अस्त्रमासीत् तदेवेदानीं रिपुहननाय भारतीयानां शस्त्रमभूत् । यः धनाशारहितः चक्रस्य सङ्गीतनिनदं श्रुणोति दुःखेन कलुषितहृदयोऽपि मुदितो भवेत् । अन्यदेशीयधनिकानां कृते तु चक्रं गलपाशमिवाभवत् यतो हि स्वदेशवस्त्रधारणेन विदेशीयवस्त्राणां अवश्यकता एव नासीत् । अनेन विदेशीय आर्थिकव्यवस्था बधिता । स्वार्थं विहाय सर्वैः गृहीतव्यं, भारतमातुः पदतले नतमस्तकानां तिलकवत् चक्रम् । महात्मागान्धिना उपदिष्टं अहिंसामन्त्रम् मनसि निधाय उत्साहेन भारतमातुः सेवासक्ताः चक्रं गृहीत्वा युद्धं कुर्युः । स्वभावेनैव परकीयतां निरयतः , स्वेषां उद्धाराकाङ्क्षिणः अवमानं श्लथयति चक्रं । अन्ते कविः फलश्रुतिमपि श्रावयति यथा एषां लहरीं पठतां अविलम्बेन सुमतिं ददाति । आलस्यज्वरादिदोषान् निरासयति । परकैङ्कर्यमतिं हरतीति भावः ।

पञ्चदशश्लोकेषु निबद्धायां अस्यां लहर्यां चरकायाः वर्णनं तथा स्वातन्त्र्यसमरे तस्याः योगदानस्य वर्णनं च वर्तते । अनया लहर्या भारतीयान् स्वदेशवस्त्रधारणविषये तथा स्वदेशवस्त्रसीवनविषये जागृतान् करोति कविः । स्वदेशवस्त्रसिवनेन विदेशीयवणिजानां क्रयविक्रयः न्यूना बाधिता चाभूत् ।

बहिष्कारलहरी- अस्यां लहर्यां विदेशीयानां तथा विदेशीयवस्तुनां अवगुणवर्णनं तथा तेषां वस्तुनां बहिष्कारकरणे जनेषु जागृतिं जनयितुं प्रयत्नश्च दृश्यते । मुदितभारतः विदेशीयैः अपराधभारतः अर्थात् अपराधिभिः युतः भारतः कृतः । सर्वत्र व्यसनं , आहारस्य अभावः, वेदना च दृश्यते । भारतीयाः सुखविहारिणः निर्बलाश्च कृताः । यैः एतादृशकार्यं कृतं ते विदेशीयाः बहिष्कार्याः । प्रसिद्धभारतदेशस्य सम्पदं अपहार्य तं निरर्थं च कृत्वा ये मुमूर्षतामयच्छन् ते बहिष्कार्याः । विदेशीयैः जनानां दुःखपरिहारकारिणी तुरी (सीवने उपयुज्यमानमुपकरणम्) दूरीकृविदेशवस्त्रक्रयणेन भारतीयवस्त्रक्रयविक्रयः अल्पीकृतः , भारतीयवस्त्राणि अवमानितानि , कुविन्दवृन्दः भिन्नोभूत् । आलस्यकूपे अप्रयत्नशीलताकूपे

च विनिक्षिप्ताः भारतीयाः । भारतीयवस्त्रोद्यमोऽपि क्षपितः । तूलवस्त्रं भारतीयजनानां जननी । परमपावनी, अकुण्ठितश्रीः । सा विदेशीयैः लुण्ठिता । सुवर्णधरणीति प्रसिद्धः भारतदेशः भूदेव्याः ललाटे लसति । तस्याः भाग्यरेखां लोपयन्तः ते दरिद्रताम् ददौ । परालम्बननामके भयङ्करदरीमुखे , अत्यन्तोन्नतस्थानेविहरन्तं भारतदेशं अपातयन् । भारतदेशं सुराव्यसनिनं कृतवन्तः । भारतस्य सम्पदः अपहारकाः द्विजसमूहभेदकाः । परतन्त्रतां निष्कासनीया, स्वतन्त्रभारतप्राप्तिमार्गे जनाः आकर्षणीयाः , केवलबाह्यसौन्दर्यकारणात् आकर्षकं विदेश-वस्त्रप्रेम, विदेश-भूप्रेम च बहिष्करणीयम् । विदेशीयाः मृदुवाक्यैः भारतं प्रतारयन्ति । धवलद्युतियुतोऽपि निराशातमः वितनोति । भारतीयोद्यमानां हानिहेतुः विदेशीयसंस्था । एवं भारतीयान् सदा पारतन्त्र्ये स्थापयन्ति । एतादृशाः विदेशीयाः सर्वदा बहिष्कार्याः इति कविः अभिप्रैति ।

अत्र कवेः आङ्ग्लानां प्रति क्रोधः तु स्पष्टः । किन्तु तत्कालीनभारतीयानां दीनस्थितिः कीदृशी आसीदित्यपि ज्ञायते । भारतीयान् प्रति अङ्ग्लानां वैषम्यं भारतीयसम्पदः अपहरणं इत्यादि विषयाः अत्र मनोज्ञरीत्या वर्णिताः । स्वातन्त्र्यसमरे काव्यमिदं जनेषु जागृतिमजनयदित्यत्र न संशयः ।

एकादशश्लोकेषु निबद्धा लहरी विदेशीयानां दर्प- अहङ्कार-भेदनीतिरित्यादि अवगुणान् वर्णयति

कारागृहलहरी- अस्यां लहर्यां कारागृहे जातस्य कृष्णस्य स्तोत्रं करोति कविः । यस्य जन्म कारागृहेऽभूत् वासश्च वृन्दावने सहचारिणस्तु मुग्धाः गोपबालकाः तथापि यः त्रिलोकोद्धारणक्षमः सः कृष्णः अस्मान् पात्विति प्रार्थयति ।

कारागृहमिदं स्वार्थपराणां विदेशीयानां विरोधं शान्त्या असहकारमुखेन प्रदर्शयतां जटिलपरदास्यनरकात् उद्दधृतानां मुमुक्षूणां मोक्षस्थानम् । जन्मभूमेः सेवा तत्पराः देशभक्ताः अहमहमिति सेवाकाङ्क्षिणः पूताः अविकृतमनसा यदा कारागृहं प्रविशन्ति तदा तेषां कारावासः अपि विलयमुपयाति । अर्थात् देशभक्तिना कारावासः अपि

सुलभमिव भातीति अभिप्रायः । देशभक्ताः कारागृहं ईषदपि विकृतिरहिताः प्राविशन्निति भावः । कारागृहं स्वयमन्धकारयुतमपि देशभक्तानां स्वराज्याख्यं ज्योतिप्रकाशं दर्शयति । स्थानमेतत् स्तुत्यं पूज्यं सर्वैः अभिलषणीयं विमलं च । एतादृशं कारागृहं निर्मलमनसा निर्भयेन प्रवेशितव्यमिति अभिप्रैति कविः । भगवतः कृष्णस्य जन्मस्थानमिदम् । जगतः नाथः पुरुषश्रेष्ठः अखिलस्य विभुः सर्वतन्त्रस्वतन्त्रः स्वेच्छया भूमौ मानववेषेण जन्म धृतवान् । अत एव एतत् स्थानं पवित्रम् । एतत् देवकिवसुदेवयोरपि वासस्थानमासीत् । कुटिलप्रभावात् कंसेन निगडितपदौ शान्तमनसौ कृष्णस्य मातापितरौ बहुकालपर्यन्तमत्र वासमकुरुताम् । अतः एतत् मान्यम् । शिवाजिमहाराजोऽपि यस्य सम्पर्कात् दास्यविनाशने पटुरभवत् शुद्धाचलमनाः अभवत् तादृशं कारागृहं प्रवेष्टव्यम् । लोकमान्यबालगङ्गाधरतिलकमहोदयः त्रिवारं कारावासमनुभूतवन्तः । तथा स्वयमेव इतरनृणां कारागारप्रवेशाय पन्थानं सुलभमकरोत् । मान्यतिलकवर्यः कारागृहे एव 'वेदकालनिर्णयः' तथा ' गीतारहस्यम्' इति ग्रन्थद्वयममूल्यमरचयत् । तादृशं कारागृहं प्रवेष्टव्यम् । गान्धिवर्यः कारागारे कलत्रेण अन्यजनैस्सह उल्लासात् न्यवसत् सदा स्वर्गमपि परिजहास । अरविन्दमहोदयः मुकुन्दसक्तः युवापि दारागृहादिकं त्यक्त्वा वैराग्येण अत्र निश्चलं तपः तेपे । अत्र नेहरु, लालालजपतरायः, मान्यतिलकः अपि न्यवसत् । भारतीयानधीरान् कृत्वा भारतस्य विनाशाय यः प्रयत्नः अभूत् तस्य निरोधाय भारतभूमेः घोरदुःखपरिहाराय च स्ववृत्तिं विजहाय कारागृहं प्रवेष्टव्यम् । अन्ते कविः यदीयं लहरी धीरात्मनां मनः अपहरति चेत् मे प्रयत्नः सफलीभविष्यति । यदि मे केकारवः सहृदयमनोहारी तर्हि अस्य बर्हिणः प्रयत्नः सार्थकः इति कविः स्वप्रयत्नस्य मुख्योद्देश्यं वदति ।

आलङ्कारिकदृष्ट्याअध्ययनम्

काव्यमिदं सम्पूर्णतया शिखरिणी -वृत्ते निबद्धम् । रूपकस्य तत्रापि ताद्रूप्यरूपकस्य आधिक्यं दृश्यते । प्रथमलहर्यां स्वदेशीयोदञ्चद्वसनसुरधेनूं श्रय सदा इति प्रतिश्लोकस्य

अन्तिमपादे स्वदेशियखादिवस्त्रस्य तथा सुरधेनोः उपमानोपमेयभावं दर्शयति । अत्र तादृूप्यरूपकः दृश्यते ।

वसनसुरधेनुं वर्णयति कविः

तुरीं सास्नां रम्यां सुकृतकृतमूरीकृतवती ।
स्फुरद्धामा वेमाभिधरुचिरश्रृङ्गाच्छृतरुचिः ।
अभीष्टान्पर्याप्तान्वितरति सपर्यापरनृणां ।
स्वदेशीयोदञ्चवस्त्रसुरधेनुं श्रय सदा ॥[1]

इत्यत्र तुरीसास्नयोः उपमानोपमेयभावः । तुरी नाम वस्त्रसीवने उपयुज्यमानः दण्डः(fibrous stick) । तुर्या एव वस्त्रोत्पादनं सास्नया क्षीरोत्पादनं अतः तयोः सादृश्यम् । वेम अर्थात् यत्र वस्त्रं सीव्यते तत्स्थानम् ('मग्ग' इति कन्नडभाषया यदुच्यते)। तदेव वस्त्रधेनोः धाम इति वर्णितम् । सुरधेनुः सर्वानभीष्टान्वितरति । वस्त्रधेनुः अपि स्वदेशप्रेम जनयति, भारतस्य आर्थिकतां उद्धरति, निरुद्योगिभ्यः उद्योगं ददाति एवं स्वातन्त्र्यान्दोलने सर्वेषामभीष्टान् पूरयतीति भावः । तुरीसास्नयोः तथा वेमधाम्नोः अभेदः अतः अनुभयाभेदरूपकालङ्कारः ।

द्वितीयलहर्यां गान्धिटोपीं प्रावर्णयन्

शिरस्त्राणं किंवा वरदकमलापाणिकमलम् ।
स्वराज्यप्रासादप्रथममसृणश्रेणिरथवा ।
सुधावापी दास्यानलकवलितानां च किमियं ।
सदा गान्धीटोपी ज्वलतु हृदि पापीयसि नृणाम् ॥[2]

अत्र कविः गान्धीटोपीं शिरस्त्राणेन, कमलेन, सुधावापिना तथा सोपानेन सह तुलयन् सन्देहं प्रदर्शयति । अतः सन्देहालङ्कारः ।

---

[1] स्वदेशीयलहरी - श्लो. १२

[2] गान्धीटोपीलहरी-श्लो.१०

श्रीचक्रलहर्यां चक्रमेवं वर्णयति कविः

सवेगं स्वालम्बप्रगतिरथचक्रं दृढतरं ।

स्वदेशीये रम्ये सरसि विहरच्चक्रविहगम् ।

अलातं वा चक्रं परधनिदुराशाद्रुमवने ।

गृहाणेदं चक्रं हरिकरलसच्चक्रमहितम् ॥[3]

इत्यत्र चरखां रथचक्रं चक्रवाकपक्षी तथा विष्णोः चक्रवत् इति वर्णयति । विषयविषयिनोः ताद्रूप्यनिरूपणेन ताद्रूप्यरूपकः ।

चक्रलहर्यां मङ्गलपद्ये हरिम् स्तुवन् कविः

रमाचक्रस्पर्धीस्तनयुगलविक्रीतहृदयः इति वर्णयति । लक्ष्म्याः सौन्दर्येन वशः इति भावः । अत्र विक्रीतहृदयः इति शब्दः चमत्कारपूर्णः । तस्याः सौन्दर्यात् सम्पूर्णतया तस्याः अधीनः अभवदिति चमत्कारेण वदति कविः । अस्मिन् श्लोके तृतीयपादं विहाय प्रतिपादे चक्रशब्दस्यानुवर्तनं दृश्यते किन्तु चक्रशब्दः विविधार्थेषु प्रयुक्तः । सदा वेधःशक्रप्रमुखसुरचक्रेण विनुतः इत्यत्र चक्र शब्दः सुराणां समूहः इत्यर्थे प्रयुक्तः । अथ वा चक्राकारे स्थितसुरसमूहः इत्यपि ज्ञातुं शक्यते । एवं स्वराज्यलहरी ऐतिहासिककाव्यमपि अल्ङ्कारिकदृष्ट्यापि सुन्दरमिति वक्तुं शक्यते ।

ऐतिहासिकमहत्त्वं

काव्येऽस्मिन् कविः प्रत्येकलहरीषु प्रत्येकं विषयं स्वीकृत्य स्वातन्त्र्यान्दोलने भागं वोढुं भारतीयानाह्वयति । प्रथ्मलहर्यां खादीवस्त्रधारणे जागृतिं जनयति । एतदान्दोलनं भारतीयेषु स्वदेशप्रेमं सङ्घटनशक्तिं च अजनयत् । सम्पूर्णभारते खादि- वस्त्रसय जनप्रियता असीमा आसीत् ।

अटन्तीं कर्नाटे वसुजटिल-ललाटे पटुगतिं ।

---

[3] श्रीचक्रलहरी- श्लो. १३

कलिङ्गे रिङ्गन्तीं सरसतरवङ्गे द्रुतपदाम् ।
अभीप्सासन्दर्भाद्दतवरविदर्भामविरतम्।
स्वदेशीयोदञ्चद्वस्त्रसुरधेनुं श्रय सदा ॥[4]

तथा

महाराष्ट्रदेशेऽनवरतविहारातुरहृदम् ।
सदम्भां काम्भोजे विकसितमुखाम्भोजमनुजे ।
मुदा लोले चोले श्रमभवशुचो लेशविकलां ।
स्वदेशीयोदञ्चद्वस्त्रसुरधेनुं श्रय सदा ॥[5]

इत्यादिश्लोकैः कर्नाटकराज्ये, कलिङ्गे (ओडिशा), वङ्गे (बङ्गाल), विदर्भे (मध्यप्रदेशे), पञ्जाब् देशे, केरले, गुर्जरदेशे(गुजरात्), महाराष्ट्रे, काम्भोजे(ईशान्यभारते), चोले(आन्ध्रप्रदेशे), मद्रे(तमिळुनाडु), अवन्तीदेशे(मध्य तथा उत्तरभारतस्यभागः), नेपाले, गान्धारे (पाकिस्तान्) काश्मीरदेशे च स्वदेशवस्त्रप्रेम वर्धितम् इति ज्ञायते । समोहमाध्यमानां उपयोगः बहुविरलतया दृश्यते स्म । आधुनिकतन्त्रज्ञानस्य एकांशोऽपि तदा नासीत् । तथापि सम्पूर्णभारते स्वदेशवस्त्रं, स्वराज्यं, देशभक्तिरित्यादिविषयेषु जनजागृतिं जनयितवतां देशभक्तानां शक्तिसामर्थ्यादयः तथा स्वदेशप्रेमादिगुणाः तथा स्वराज्यार्थं कृतत्यागाः सर्वदा सर्वैः शंसितव्याः ।

प्रकृत्या गोमांसप्रणयभवनैर्वीरयवनै ।
र्निजां हिंसावृत्तिं झटिति विजहद्भिश्च सहजाम्।
विपद्धन्त्रीति द्राक्शरणमुपपन्नैरनुगताम् ।
स्वदेशीयोदञ्चवस्त्रसुरधेनुं श्रय सदा ॥[6]

---

[4] स्वदेशीयलहरी - श्लो. १४

[5] स्वदेशीयलहरी - श्लो. १६

[6]स्वदेशीयलहरी -श्लो.२६

इत्यत्र यवना अपि नायकैः प्रेरिताः देशभक्तियुताः गोमांसभक्षणादिकं त्यक्त्वा स्वदेशवस्त्रधारणे सक्तमनाः बभूवुः इति ज्ञायते ।

स्वराज्यान्दोलने स्वजीवनमर्पितवतामुल्लेखोऽपि अत्र वर्तते ।

अमुष्या लालाजिर्विमलगुणजालात्प्रमुमुदे ।
गतोदासोदासः स्वयमभृतिदासः समभवत् ।
समर्थाल्लीबन्धू प्रणयगुणवल्लीनिगडितौ ।
सवदेशीयोदञ्चद्वस्त्रसुरधेनुं श्रय सदा ॥[7]

इत्यत्र खादीवस्त्रान्दोलने भागमूढानां नामान्युल्लिखितानि । लालालजपतरायमहोदयः, गतोदासदासः इति शब्देन प्रायः चित्तरञ्जनदासमहाभागः, अल्लिबन्धू इति शब्देन अलिभ्रातारौ मौलाना शौकत् अलि, मौलाना मोहम्मद् अलि इति ग्राह्याः ।[8]

जयं यस्या मद्रे लषति विजयी राघवकृती ।
महाराष्ट्रे नेता भजति नरसिंहोऽपि किल याम् ।
समाधत्ते प्रेम्णा चतुरमदनो मोहन इमां ।
स्वदेशीयोदञ्चद्वस्त्रसुरधेनुं श्रय सदा ॥[9]

इत्यत्र नेता इति शब्देन प्रायः नेताजि सुभाषचन्द्रबोस् महाभागः नरसिंह शब्देन उल्ल्यालवाड नरसिंहरेड्डिमहोदयः ग्राह्यः इति भाति । एवं स्वातन्त्र्यसङ्ग्रामे ऊढभागानां नैकानि नामानि उल्लिखितानि ।

अस्मिन् काव्ये गान्धिटोपीलहरी इति प्रत्येकलहर्यां गन्धिटोपीमाहात्म्यं वर्णितम् । अनेन स्वातन्त्र्यसङ्ग्रामे टोप्याः महत्त्वं कीदृशमासीदिति ज्ञायते । तद्दिनेषु गान्धिटोपी बहुप्रसिद्धा आसीत् । १९१८ क्रिस्ताब्दतः १९२० क्रिस्ताब्दपर्यन्तं असहकारसङ्ग्रामः प्रचलति स्म ।

---

[7] स्वराज्यलहरी- श्लो.२७

[8]https:\\en.m.wikipedia.org

[9]स्वराज्यलहरी- श्लो. २८

तदा गान्धिटोपी बहुख्याताऽसीत् । स्वतः गान्धिमहोदयः टोपीं धरति स्म । एषा टोपी खादिवस्त्रेण निर्मितासीत् । एषा स्वदेशीचिह्नमासीत् । तद्दिनेषु सर्वे शिरस्सु पेटां वा पगडीं धरन्ति स्म । टोप्याः आविष्कारानन्तरं सर्वे देशभक्ताः गान्धिटोपीमेव धरन्ति स्म । टोपी देशप्रेम्णः चिह्नमासीत् जनप्रिया च आसीत् ।

इटालीयांल्लोकांस्त्रुटित- धनकूटान्विदधती[10] इत्यनेन इटलिदेशीया अपि

स्वराज्यान्दोलनेन त्रुटिताः बाधिताः बभूवुः इति ज्ञायते । भारतस्य सङ्घटनशक्तेः निदर्शनमिदम् ।

सैद्धान्तिकदृष्ट्याध्ययनम्

काव्यस्यास्य मुख्योद्देश्यं स्वातन्त्र्यसङ्ग्रामकालीनजागृतिजनकत्वम् । अत्र सैद्धान्तिकविषयानां अन्वेषणं अप्रस्तुतम् । तथापि तत्र तत्र उल्लिखितान् सैद्धान्तिक विषयान् सङ्गृह्य ऐतिहासिककाव्ये माध्वतत्वमार्गणप्रयत्नः क्रियते । प्रतिलहर्यां मङ्गलपद्यानि विष्णुपराणि ।

शुभानि श्रीजानिर्दिशतु दयया नीरदरुचिः ।
प्रपन्नां पाञ्चालीमविषहशुचालीढहृदयाम् ।
परित्रायंल्लीलाविसृमरदुकूलालिरचना-
कुविन्दो गोविन्दो विकसदरविन्दोपममुखः ॥[11]

अत्र लक्ष्मीपतिं विष्णुं स्तौति कविः । यः शरणागतां शुद्धहृदयां द्रौपदीं लीलया दुकूलप्रदानेनारक्षत् सः कुविन्दः गोविन्दः अस्माकं शुभानि ददातु इति प्रार्थयति । अत्र भगवतः भक्तपराधीनता तथा भक्तस्य गुणाः ग्राह्याः । वस्त्रापहरणसमये पाञ्चाली कृष्णं भक्त्या स्तौति । किन्तु यदा अनन्यशरणागता भूत्वा स्तौति तदा कृष्णः वस्त्रप्रदानेन तां

---

[10]गान्धीटोपीलहरी- श्लो.४

[11]स्वदेशीयलहरी- श्लो. १

अन्वगृह्णत् । भक्तस्य अवश्यकगुणः स एव । माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः स्नेहो भक्तिरिति प्रोक्ता तया मुक्तिर्नचान्यथा इति श्रीवादिराजगुरुसार्वभौमाः- भगवतः सर्वोत्तमत्वज्ञानं सर्वतोऽधिकस्नेहो नाम अनन्यशरणागतिः एतयोः मेलनं भक्तिः । एतादृशी भक्तिः कृष्णया प्रदर्शिता अत एव सा भगवदनुग्रहपात्रा बभूव । यदि भक्तः एवं भगवति शरणङ्गच्छति तर्हि भक्तपराधीनः देवः भक्तं अनुगृह्णति ।

जगन्नाथस्याहो परमपुरुषस्याखिलविभोः ।
स्वतन्त्रस्य स्वेच्छाधृतमनुजवेषस्य च पुरा ।
इदं जन्मस्थानं यदुकुलविधोः पावनतमम् ।
विशेत्कारागारं विभयमविकारास्पदहृदा ॥

जगन्नाथशब्देन कृष्णस्य नियामकत्वमुक्तम् । परमपुरुषशब्देन क्षराक्षरपुरुषाभ्यामुत्तमत्त्वं अनेन सर्वोत्तमत्वञ्चोक्तम् । स्वतन्त्रशब्देन भगवतः अनधीनत्त्वमुच्यते । कृष्णावतारः भगवाता स्वेच्छया स्वीकृतः । अर्थात् भगवान् कस्यापि वशे नास्ति । यत्तस्य सङ्कल्पः तदनुसारं कार्यं क्रियते इति ज्ञातव्यम् ।

एवं स्वातन्त्र्यकालीन-ऐतिहासिकलघुकाव्यमिदं जनेषु देशप्रेमवृद्ध्यर्थं देशभक्तान् सङ्घटयितुं रचितं स्वोद्देश्यं सफलमकरोत् ।

४.३. जयसिंहराजं प्रति श्रीमच्छत्रपतेः शिवप्रभोः पत्रम्

श्रीछत्रपतिशिवाजिमहाराजः भारतस्य प्रसिद्धनृपोत्तमेष्वन्यतमः । महाराष्ट्राप्रान्ते शासनमासीत्तस्य । हिन्दूजनान् मुघलानां आक्रमणात् संरक्ष्य हिन्दूरजपूतराजान् एकीकृत्य भारतस्य गरिमानं अवर्धयत् । 'पर्वतमूषकः' इत्येव प्रख्यातः सः मुघल् बादशाहानां कृते सिंहस्वप्नोऽभूत् । षष्टिश्लोकेषु निबद्धं लघुकाव्यमिदं छत्रपतिशिवाजिमहाराजेन यवनभाषया लिखितस्य पत्रस्य अक्षरशः अनुवादरूपम् । अत्र कवेः कल्पनालेशोऽपि न वर्तते ।

पत्रस्य सारांशः अत्र दीयते । तत्पूर्वं जयसिंहराजस्य परिचयः तथा पत्रलेखनस्य उद्देश्यस्य परिचय श्च अवश्यकः । जयसिंहराजः (१६११-१६६७) मुघलसाम्राज्यस्य सेनापतिः आसीत् । सः अम्बरप्रान्तस्य राजा आसीत् । भानुसिंहराजस्य पुत्रोऽयं मुघलबादशाह औरङ्गजेबस्य किङ्करो भूत्वा तस्य समस्तभारतवशीकरणकार्ये साहायोऽभूत् । सः शिवाजिमहाराजमपि कुटिलतया औरङ्गजेबस्य वशे अकरोत् । किन्तु शिवाजिः ततः कथञ्चित् मुक्तो भूत्वा स्वराज्यमगात् । किन्तु तत्र जयसिंहस्य सहाय्यं अवश्यं स्यादिति औरङ्गजेबः जयसिंहं कठिणस्वरूपं दण्डमयच्छत् ।

प्रथमश्लोके तं जयसिंहं राजाधिराज, वरमाण्डलीक इति सम्बोधयन् शिवाजिः जयसिंहराजस्य प्रभावात् सर्वे रजपूताः गर्वेण जीवन्ति । सः भारतवाट्याः रम्यपुष्पमिति वर्णयति । तदनु शिवाजि- महाराजेन यथा लिखितं तथैव सारांशोऽपि प्रदीयते ।

जयसिंह ! तव शौर्येणैव बाबरस्य राज्यलक्ष्मी प्रबलतमा तव साहाय्येनैव बाबरराज्यं भाग्यवत्। कुशाग्रबुद्धे मम प्रणामान् स्वीकुरु । भवन्तं जगज्जनकः कृष्णः पायात् यतो हि मया श्रुतं यत् भवता मम राज्यं तथा दक्षिणदिशा आक्रमिता भविष्यतीति । हिन्दूजनानां हृदये यदि रक्तधारासेचनं करोषि तर्हि रक्तमुखतां अर्थात् यशः प्राप्नोषीति चिन्तयसि किम् ? एतद्धि तव इच्छा किम् ? किन्तु तव कृत्येन तव वदनम् कज्जलांमिलितं भवेत् । भारतभूमिः तवैव जन्मभूमिः । तव कृत्या तस्याः विपत्तिः सञ्जायते इति त्वं न जानासि किं ? विचित्रमिदम् । क्षणं त्वं त्वदारब्धकर्मविषये तव अन्तस्साक्षीं पृच्छसि चेत् अनेन कर्मणा तवैव हानिः निश्चितः इति ज्ञायते । हे धीर ! यदि त्वं अनधीनो भूत्वा दक्षिणदेशम् जेतुं अगमिष्यः तर्हि अहम् नतमस्तकोऽभविष्यम् । अहमेव त्वामनुसृत्य दक्षिणदेशं नितान्तहर्षात् त्वदधीनमकरिष्यम् । त्वं धर्मद्रुहः सज्जनविध्वंसकस्य यवनराजस्य औरङ्गजेबस्य कपटजाले पतितः । अस्मानपि पातयितुमागतोऽसि । त्वया सह केन विधिना क्रीडामि ? अथवा त्वया सह मेलनेन कः पुरुषार्थलाभः । कोऽपि वीरपुरुषः अस्य औरङ्गजेबस्य सेवां न कुर्यात् यतो हि सिंहः कदापि श्रृगालवृत्तिं न भजते । यदि त्वां निवारयितुमहं खड्गम् उद्धरामि चेत् तर्हि उभयपक्षे हिन्दूजनानामेव हानिः । यवनान्

त्यक्त्वा आत्मीयानां रुधिरक्षरणे मम खड्गः उपयुक्त इति मम मनः अतीव सन्दूयते । यद्यस्माकं परिरक्षणार्थं त्वं स्वयमापतिष्यत् तर्हि नूनं शरव्यपदवीं अर्थात् नेतापदवीमभजिष्यत् । औरङ्गजेबः स्वार्थैकसाधनपरः , सदा परपीडारतः, करुणालेशोऽपि नास्ति , न्यायधर्मपथादवतीर्णः, एषः भूमौ नरराक्षस एव । अफजलखानस्य तथा शाहिस्तखानस्य पराक्रमः यदा व्यर्थोऽभूत् तदा त्वां प्रेषयति सः । अनेन ममाक्रमणं सोढुं स् समर्थो नास्तीति स्पष्टम् । तस्य रहस्यकपटं त्वया कुशाग्रबुद्ध्या कथं न ज्ञायते । तस्य ऐन्द्रजालिकप्रयोगात् त्वमपि भ्रान्त इति मे तर्कः ।

यथा उपवने कण्टकाः सुमानि मिलितानि तथैव तव जीवनेऽपि । भवान् लोके शुभानि अशुभानि च अनुभूतवन्तः । अस्माभिस्सह मित्रत्वेन भूयमानः इदानीं हिन्दूवंश्यानां शिरसां छेत्ता असि हन्त! पराक्रमेण तारुण्येन मत्तः त्वं विलासपरो मा भूः । सादिनाम्ना साधूत्तमेन गदितं साधुवाणीं स्मर । यदि तव खड्गे शक्तिरस्ति तव सैन्ये शक्तिरस्ति तर्हि धर्मद्रुहां निर्मूलनं कुरु । तदेव तव उचितं स्यात् । यदि दाराशिकोहः राजपदवीमभजिष्यत् तर्हि हिन्दवः सुखेन जीवितुं अशक्ष्यन् । किन्तु हिन्दूनां दुर्दैवमिदं सः दाराशिकोहः राजपदवीं नालञ्चकार । यदा त्वया पापरहितः जसवन्तसिंहः प्रतारितः तदा उचितानुचितविवेचनं न कृतं त्वया? यदि मया सह युद्धसाहसं करोषि तर्हि सिंहेन सह युद्ध्मानस्य श्रृगालस्य गतिं प्राप्नोषि । स्वबन्धून् विहाय विधर्मिराजस्य सेवां कुर्वतः तव कः लाभः ? ऐश्वर्यस्य -मानस्य-उत्तमपदस्य च लाभः सर्वः मृगतृष्णा इव । कुमारछत्रसालनृपतिं परितः यथा विपदः उद्भाविताः तथैव हिन्दुषु अपि महाविपत्तिः सम्प्रापिता । तेन यः विवाहसम्बन्धः त्वया सह घटितः सोऽपि कुटिलतया एव । अत एव विख्यातमात्मकुलगौरवं त्वया अद्य विनाशितम् । यद्बन्धनं त्वया सह अस्ति तत् नरराक्षसस्य कृते तुच्छमेव यतो हि रक्तसम्बन्धमपि तेन न गणितम् । औरङ्गजेबः स्वपितुः इच्छामगणयन् स्वभ्रातरं हत्वा राजपदवीमलञ्चकार । यदि त्वं राजभक्तिव्याजात् आत्मानं निर्दोषं मन्यसे , त्वया क्रियमाणमवनञ्च , शहजहानस्य समीपे तव वृत्तिः कीदृगासीदिति किञ्चित् स्मर । यदि त्वयि काचन बुद्धिरस्ति तर्हि जन्मभूमिपीडनेन तप्तं तव खड्गं परपीडनेन बाष्पसिक्तं

कुरुष्व । समयोऽयं मिथो योद्धुं न समुचितः । अस्मासु कार्यभारो वर्तते । अधुना देशे , कोशे, पण्डितवलये, तथा देवालये विपदस्सन्ति । यदि कुकृत्यमेतत् एवमेव प्रचलिष्यति तर्हि हिन्दूकुललक्ष्मापि नावशिष्यात् । केवल- मुष्टिमेयाः अल्पसङ्ख्याकाः यवनाः अस्मान् शासन्तीति खेदकरो हि विषयः । एषः औरङ्गजेबः अस्माकं दृढशृङ्खलया अस्माकं चरणमेव बध्नाति । अस्मदीयैः खड्गैः अस्माकमेव शिरांसि छिनत्ति । अतः सपदि वयं हिन्दूजनस्य हिन्दूधर्मस्य रक्षणार्थमत्युच्चप्रयत्नं एकीभूत्वा करवाम । अस्माभिः नैके उपायाः अपि योज्याः । देशस्य रक्षणार्थं यत्किमपि अवश्यकं तत्सर्वं वीरः कुर्यात् ।

यदि त्वं जस्वन्तसिंहेन तथा राजासिंहराणेन सह सङ्गच्छसे तर्हि महत्कार्यं भविष्यति । आशु सकलदिक्षु रभसात् युद्धस्व । तथा दुष्टसर्पस्य औरङ्गजेबस्य शिरः शिलाभिः विच्छिन्धि । तदा सः स्वकृतेर्विपाकं भजेत् । अनेन दक्षिणे तस्य कपटजालं सरितुं न शक्येत । दक्षिणदेशस्य वीरैस्सह अहं क्रकचवत् विजयपुरादिलशाहं तथा गोलकाण्डसुल्तानं प्रसभं समूलं निपातयामि । यदि तव सहकारः अस्ति तर्हि वयं सर्वदिक्षु युद्ध्यामहे तस्य औरङ्गजेबस्य समराङ्गणमेव सङ्कोचयामः । दिल्लीं गत्वा शत्रुसदनं सेनालहर्यां स्नापयामः । यदि तस्य सिंहासनमेव नास्ति तर्हि सः औरङ्गजेबः कथं कथ्यते । अर्थात् औरङ्गः नाम सिंहासनं जेबः नाम शोभः –यः सिम्हसने सोभते स औरङ्गजेब इति । तं पराजय्य सिंहासनवशाननतरं औरङ्गजेबः केवल जेबः भवति अर्थात् विनष्टशोभः भविष्यति इति । तस्य खड्गः लीनो भवेत् तस्य कपटजालमुत्सादितं स्यात् । रक्तनदीं वाहयामः तस्य पितृनपि तर्पयामः । यदि वयं मिथः सहकारं कुर्मश्चेत् जगत्सवितुः सूर्यस्य प्रसादात् खलान् नाशयामः । यदि आवां मिलावश्चेत् उत्तुङ्गगिरिमपि पाटयावः अपारजलनिधिमपि शोषयावः । बहवः विषयास्सन्ति यदहं पत्रमुखेन वक्तुं न शक्नोमि । अहं त्वया सह प्रत्यक्षतः मिलितुमीहे । प्रायः मम श्रमः व्यर्थो न स्यात् इति आशासे । तव समक्षं सर्वं वक्तुमिच्छामि तथा यत्त्वया उच्यते तदपि शान्तमनसा श्रोष्यामि ।

मम खड्गस्य , तुरङ्गस्य, देशस्य, धर्मस्य शपथम् । तव काचिदपि आपत्तिः न भवेत् । शहस्तखानस्य पत्रं रहसि त्वां दर्शयामि यतः तव सुखमोहनिद्रा दूरीभविष्यति । निजानां

प्रेम अपि जायते । तव स्वप्नस्य वास्तवफलं दर्शयिष्ये तथा उत्तरमपि पृक्ष्यामि । यदि त्वं नाङ्गीकरोषि तर्हि तव सैन्यं मम खड्गेन नाशो भवेत् । श्वः सूर्योदये तव नेत्रयोः यदाच्छादनमस्ति तस्यापि नाशो भवेत् । तदा मम खड्गं निरावरणो भवेत् । तव मङ्गलानि भवन्तु ।

आलङ्कारिकदृष्ट्याध्ययनम्

षष्टिश्लोकात्मकं लघुकाव्यमिदं वीररसप्रधानम् प्रासादगुणोपेतम् च । अत्र कवेः कल्पनादिकं नास्ति तथापि अलङ्कारदृष्ट्या उत्तमं काव्यम् । सम्पूर्णकाव्ये सर्वे श्लोकाः वसन्ततिलकावृत्ते निबद्धाः ।

राजाधिराज ! वरमाण्डलीकप्रणेतः ।
रम्यस्थितिप्रसव ! भारतपुष्पवाट्याः ।
श्रीरामचन्द्रमहितांश ! तव प्रभावात् ।
नूनं समुन्नतशिरा रजपूतजातिः ॥१॥
उक्ता वसन्ततिलका तभजाजगौगः इति लक्षणात् ।

अर्थालङ्कारः

<u>अप्रस्तुतप्रशंसालङ्कारः</u>

शिवाजिमहाराजस्य कविप्रतिभाऽपि अत्र श्लाघनीया । यद्यपि तेन लिखितं पत्रं छन्दोबद्धकाव्यरूपं नासीत् तथापि अर्थालङ्काराणां प्रयोगे तस्य प्रतिभा अप्रतिमा । काव्येऽस्मिन् अप्रस्तुतप्रशंसालङ्कारस्य आधिक्यं दृश्यते ।

सर्वस्थलेषु तुरगो न हि चोदनीयः ।
कुर्यात्पलायनमपास्तफलः प्रसङ्गे ।
व्याघ्रो मृगादिषु निदर्शयति स्वभावम् ।
सिंहेन नैव कुरुते गृहयुद्धमेषः ॥२२॥

अत्र जयसिंहं शिवाजिमहाराजः राजनीतिमुपदिशति । औरङ्गजेबस्य सेवको भूत्वा स्वजनेषु वैरत्वं न करणीयमिति सूक्तदृष्टान्तमुखेन कथयति । यद्यपि वाच्यमानं व्याघ्रादिवृत्तान्तमत्र अप्रस्तुतं , स्वसामर्थ्यं सर्वत्र न प्रदर्शनीयं उपयोक्तव्यञ्च इति विषयः अत्र बोध्यते । यदि सामर्थ्यप्रदर्शनस्य आवश्यकता वर्तते तदैव तस्य उपयोगः करणीयः इति व्यङ्ग्यार्थः अत्र व्यज्यते । अतः अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया इति लक्षणात् अप्रस्तुतप्रशंशाल्ङ्कारः ।

<u>उपमालङ्कारः</u>

वीरैर्युतः क्रकचवत् दृढभल्लहस्तै ।
र्निपातयाम्यहमिह प्रसभं समूलम् ।

इत्यत्र शिवाजिमहाराजः क्रकचसादृश्येन वर्णितः । तयोः उपमानोपमेयभावः । अतः उपमालङ्कारः ।

ऐतिहासिकदृष्ट्या अध्ययनम्

काव्यमिदं ऐतिहासिकदृष्ट्या महत्त्वं भजते यतो हि शिवाजिमहाराजस्य आन्तर्यमत्र स्फुटम् । तथा औरङ्गजेबस्य शासनविषये जयसिंहराजस्य विवेक- शून्यत्वमित्यादिविषये स्पष्टचित्रणं लभ्यते ।

शिवाजिमहाराजः शहाजिभोंसले- जीजाबायिदम्पत्योः १६३० तमे वर्षे फ़ेब्रुवरिमासस्य एकोनविंशतितमे दिनाङ्के महाराष्ट्रस्य शिवनेरिदुर्गे जन्म लेभे । बाल्यादेव वीरः पराक्रमी देवभक्तः शिवाजिः मातुः सकाशात् रामायणभारतपुराणेतिहासादिकथाः भूयः श्रुत्वा हृदि देशप्रेम्णः बीजाङ्कुरं अधरत्, तस्य वर्धनेऽपि उत्सुकोऽभूत् । १६४०तमे वर्षे सयिबाय्या सह तस्य विवाहोऽभूत् । १६७४ तमे वर्षे मोघलानां वशे विद्यमानान् पुरन्दरादिप्रदेशान् वशे कृतवान् । तदनन्तरं तस्य राज्याभिषेकमहोत्सवः । ततः द्वादशदिनान्तरे तस्य माता इहलोकजीवनं समाप्य यशश्शरीरा अभवत् । ततःपश्चात् नैकदुर्गान् जित्वा स्वतन्त्रराज्यं

निर्माय मोघलराजानां विरुद्धं समरघोषं कृत्वा मोघलानामाक्रमणेन बहुतप्तायाः भारतमातुः मोचने कङ्कणबद्धोऽभूत् [12]।

प्रस्तुतलघुकाव्यस्य पूर्वपीठिका - औरङ्गजेबः मोघलबादशाहः इति प्रथितः समस्तभरतखण्डं

वशे कर्तुमुद्युक्तः सर्वहिन्दूराजान् जेतुं प्रायतत । किन्तु हिन्दूसंस्कृतेः रक्षकः, देशभक्तः,

चाणाक्षश्च शिवाजिः औरङ्गजेबस्य वशे न विवेश । तथा तमेव जेतुं उपायान् आयोजयत् ।

जयसिंहराजः (१६११-१६६७) मोघलसाम्राज्यस्य प्रधानसेनाधिपतिरासीत् तथा अम्बरराज्यस्याधिपतिस्चासीत् । भानुसिंहराजस्य पुत्रोऽयं औरङ्गजेबस्य बलम् आसीत् । शिवाजिमहाराजं जेतुं औरङ्गजेबः जयसिंहस्य साहाय्यं अपेक्षत । तदा दक्षिणदेशान् प्रति आक्रमणोद्युक्तं जयसिंहं प्रति शिवाजिमहाराजः पत्रमलिखत् । पत्रमुखेन जयसिंहस्य मनः परिवर्तनं तस्योद्देश्यमासीत् [13]। फारसीभाषायांलिखिते पत्रेऽस्मिन् शिवाजेः नीतिनिपुणता दरीदृश्यते । पत्रमिदं संवत्सरशतपर्यन्तं पटना साहबस्य गुरुद्वारे सुरक्षितमासीत् । ततः बाबु जगन्नाथदासमहोदयः तस्य हिन्दी अनुवादं काशीपत्रिकायां प्रकाशितमकरोत् [14]।

पत्रमुखेन नैकरहस्यानि तथा प्रसिद्धविषयांश्च प्रकटयति शिवाजिः । औरङ्गजेबः दुष्टशासकः आसीदिति स्पष्टतया दृश्यते पत्रे

स्वार्थैकसाधनपरः परहिंसनार्थे ।
बद्धादरश्च करुणाकणिकविहीनः ।
न्यायाच्च धर्मसुपथादवरङ्गजेबः ।
भ्रष्टो भृशं क्षितितले नरराक्षसोऽसौ ॥

---

[12] http:// en. M. Wikipedia.org

[13] http:// en.m. Wikipedia.org

[14] https:\\ www. Scribd.com

यस्मात्तवैव जननावनिभारतेऽस्मिन् ।
धर्मे च पावनतमे महती विपत्तिः ।
सञ्जायते स्म बत ते ह्यनया च कुख्या ।
जानासि नैव तदिदं परमं विचित्रम् ॥

इति जयसिंहस्य देशभक्तिं जागरितुं प्रायतत ।

अन्तर्दशा यदि विचारयसि क्षणं त्वमिति तस्य अन्तस्साक्षिमपि जगरितुं प्रायतत ।

अफजलखानः तथा शाहिस्तखानः शिवाजिं वशं कर्तुं प्रयत्नं कृत्वा विफलौ बभूवतुः ।

व्यर्थो यदपझुलखानपराक्रमोऽभूत् ।
शाहिस्तखानबलमप्यफलं यदासीत् ।
योद्धुं भवानिह तदा प्रहितोऽस्ति नूनं।
सोढुं क्षमो नहि मदाक्रमणं स भीरुः ॥

श्लोकेनानेन शिवाजिमहाराजस्य शक्तिपराक्रमैः औरङ्गजेबोऽपि भीत आसीत् इति ज्ञायते तथा स्वयं युद्धभूमिं अनागत्य अन्यान् प्रेषितवान् इति ज्ञायते । तेन प्रेषितं खानद्वयं पराजित्य स्वस्याप्रतिमशक्तेः प्रदर्शनमकरोत् ।

औरङ्गजेबः शहाजहानस्य पुत्रः । वस्तुतः शहाजहानस्य पुत्रस्य दाराशिकोहस्य राज्याभिषेके राज्ञः रुचिरासीत् । किन्तु कपटतया तस्य वधं कृत्वा शहजहानस्य सम्मतिमपि अस्वीकृत्य स्वयं राजा अभवत् । दाराशिकोहः हिन्दूसंस्कृतेः आदरमकरोत्[15] । संस्कृतभाषायां न केवलं आदरः किन्तु स्वयं संस्कृताध्ययनमपि कृत्वा नैकासां उपनिषदां पर्शियाभाषानुवादञ्च अकरोत् । अतः शिवाजिमहारजोऽपि तं श्लाघयति उदारचेताः इति यथा

दाराशिकोहनृपतेरुदारचेता ।

---

[15] http:// en.m. Wikipedia.org

देशस्यराजपदवीमभजिष्यदस्य ।

तर्हि प्रजासहजसर्वसुखान्यलप्स्यत्।

दुर्दैविहिन्दुजनता सुचिराय नूनम् ॥

अत्र तु स्पष्टं यत् शिवाजेः अनङ्गीकारः केवलं औरङ्गजेबस्य दुष्टशासने आसीत् धर्मविषये वा अन्यमोघलबादशाहानां विषये न इति ।

त्वं राजभक्तिमिषतो यदि दोषशून्य

मात्मानमत्र हि समर्थयसि प्रकामम् ।

तर्हि स्मर क्षणमये ! तव कीदृगासीत् ।

वृत्तिर्बत क्षितिपतौ च शहजहाने ॥

इति जयसिंहस्य राजभक्तिः न न्याययुता, व्याजमात्रमेव इति दर्शयति ।

शिवाजेः देशभक्तिः तथा हिन्दुजनानां कृते तस्य प्रेम च अत्र स्फुटम् ।

तस्माद्वयं सपदि हिन्दुजनस्य हिन्दु ।

धर्मस्य हिन्दुविषयस्य च रक्षणार्थम् ।

काष्ठां परां प्रयतनस्य सहैकमत्या ।

वीरेश ! साम्प्रतमये करवाम धैर्यात् ॥

इत्यत्र यदि सर्वे वीराः मिलित्वा युद्धं कुर्याम चेत् अस्मत्प्रजानां रक्षणं भवतीति भावं प्रकटयति ।

झुञ्झारसिंहस्य विषये तथा कुमारछत्रसालराजस्य विषयेऽपि उल्लेखोऽत्र लभ्यते ।

नीचस्य तस्य नृपतेः कपटानुकम्पां ।

किं वा स्तवीषि जयसिंह ! विमुग्धचेताः ।

जुञ्झारसिंहकृतसर्वसहायतायाः ।

किं वा फलं समभवत्त्वमवैषि सर्वम् ॥

इति जुञ्झारसिंहं स्मारयति शिवाजिः । जुञ्झारसिंहः(१६६४-१७३०) नवाबानां सेनापतिरासीत् । रजपूतैस्सह नवाबान् जित्वा रजपूतानां अधिपतिरभूत् । किन्तु रजपूतैः एव तस्य संहारः अभूत् [16]।

श्रीछत्रसालनृपतिं परितः कुमारम् ।
उद्भाविताश्च विपदः खलशेखरेण ।
अन्येषु हिन्दुषु तथा महतीं विपत्तिं ।
सम्प्रापितं किमु न वेत्ति भवान्प्रसिद्धाम् ॥

कुमारछत्रसालः (१६४९-१७३१) चम्पतरायस्य पुत्रः छत्रपतिशिवाजिमहाराजेण प्रेरितः स्फूर्तिं प्राप्य च मोघलानां विरुद्धं समरं कृत्वा नैकान् मोघलसेनापतीन् जित्वा मराठैस्सह मिलित्वा औरङ्गजेबस्य दमने सहायमकरोत् । बुन्देलखण्डस्य राजा च आसीत् [17]।

एवं ऐतिहासिकलघुकाव्यमिदं भारतमातुः तस्य पुत्राणां च दयनीयस्थितिं तथा तन्मोचने शिवाजिना कृतानां प्रयत्नानां दर्शने दर्पणीभूतम् ।

४.४. सुमतीन्द्रतीर्थाणां देशकालकृतयः

अखण्डदक्षिणभारतस्य सार्वभौमस्य विद्यापक्षपातिनः , काव्यसरस्वत्याराधकस्य श्रीकृष्णदेवरायस्य आस्थाने कृष्णाचार्य इति विद्वत्तल्लजो आसीत् । सः आस्थानपण्डितः संस्कृतविद्यापीठे अध्यापकश्च आसीत् । तस्य पुत्रः कनकाचलाचार्यो नाम विद्वन्मणिः । तस्य पुत्रः तिम्मण्णभट्टः रङ्गराजस्य आस्थाने दिवादीपभाजनोऽभूत् (हगलु दीवटिगे इति कन्नडभाषया यदुच्यते) । वीणातिम्मण्णभट्ट इत्येव प्रसिद्धस्य तस्य ज्येष्ठपुत्रः गुरुराजः, पुत्री वेङ्कटाम्बिका, द्वितीयः पुत्रः वेङ्कटनाथः यः संन्यासाश्रमं स्वीकृत्य श्रीराघवेन्द्रगुरुसार्वभौमाः इति जगतीतले ख्यातः बभूव । गुरुराजस्य धर्मपत्नी कमलादेवी नाम्नी । गुरुराज- कमलादम्पत्योः पुत्रः वेङ्कटनारायणः । तयोः पञ्चपुत्ररत्नाः आसन् । ज्येष्ठः

[16]http:// en.m. Wikipedia.org
[17] http:// en.m. Wikipedia.org

वेङ्कण्णः, द्वितीयः वासुदेवः तृतीयः मुद्दुवेङ्कटकृष्णः चतुर्थः विजयीन्द्रः, पञ्चमः गरुडवाहनलक्ष्मीनारायणः ।

मुद्दुवेङ्कटकृष्णः बाल्यादेव अनितरसाधारणकविप्रतिभासम्पन्नः आसीत् । बाल्ये पितुः सकाशात् काव्यनाटकालङ्कारसाहित्यशास्त्रमधीत्य तदनु श्रीराघवेन्द्रश्रीपादेभ्यः षड्दर्शनान्यधीत्य सर्वशास्त्रविशारदो श्रीराघवेन्द्रतीर्थश्रीपादानामनुग्रहं प्राप्तवान् । श्रीराघवेन्द्रतीर्थपादानां पूर्वाश्रमस्य स्वपौत्रे मुद्दुवेङ्कटकृष्णे अतिशयवात्सल्यमासीत् । अत एव उडुपीक्षेत्रे न्यायमुक्तावली तन्त्रदीपिकादिग्रन्थान् विरचय्य भावीसुमतीन्द्रतीर्थेषु अनुग्रहं चक्रुः ।

मुद्दुवेङ्कटकृष्णः गृहस्थाश्रमं प्रविश्य तञ्जापुर्यां आस्थानविद्वांसपदमलञ्चकार । ज्येष्ठः वासुदेवाचार्यः संन्यासाश्रमं स्वीकृत्य श्रीसूरीन्द्रतीर्थाभिधा वेदान्तसाम्राज्याधीशपदमलञ्चकार । श्रीसूरिन्द्रतीर्थकरकमलसञ्जातः वेदान्तसाम्राज्येऽभिषिक्तः मुद्दुवेङ्कटकृष्णः श्रीसुमतीन्द्रतीर्थाः इति विख्याताः । सदा श्रीरघुपति पादासक्ताः, सच्छास्त्रनिरताः, दुर्वादिखण्डनपराः, सकलभूपतिभिः सम्मानिताः वेदव्याससेवापराः विद्वत्समूहकुमुदचन्द्रः, त्रयंस्त्रिशद्वत्सरेषु (क्रि. श. १६९२-१७२३) वेदान्तसाम्राज्यसिंहासनाधिरूढाः शिष्यानपालयन् । नैकाः दिग्विजययात्राः कृत्वा मध्वमतदुंदुभिघोषाञ्चक्रुः । साङ्ख्यार्हतसौगततार्किकशैवादिवादाअन्निरस्य कीर्तिभाजनाः बभूवुः ।

मधुराराज्याधीश्वर्या राणीमङ्गम्मा नाम्न्या राज्ञ्या सम्मानिताः विलत्तूरुमण्ड्लस्य 'आयिर्धर्म' नामकं सम्पद्भरितं ग्रामं तथा श्रेष्ठमेकं मठम् कनकाभरणादिकञ्च सम्मानरूपेण स्वीचक्रुः । श्रीपादानां अलौकिककविप्रतिभया हृष्टान्तःकरणा सा स्वभाण्डारात् नीलादेवीकरार्चितां अनर्घमणिखचितां

श्रीभूदुर्गासमेतशेषशय्याविलसितवैकुण्ठवासुदेवस्यप्रतिमां समर्प्य धन्या बभूव । श्रीपादान् उन्नतपीठे प्रतिष्ठाप्य कनकाभिषेकं कृत्वा कृतार्था बभूव ।[18]

अनर्घ्यमणिमय्यर्चा श्रीभूदुर्गासमन्विता ।
पाण्ड्यभूपतिभिर्दत्ता सुमतीन्द्रयतीशितुः ॥[19]

तदनु श्रीपादाः आरणीराज्यं जग्मुः । तद्देशपालकः सुभानुरायः व्याकरणशास्त्रे काव्यरचनायाञ्च निपुण आसीत् । अतिलौकिककविप्रतिभासम्पन्नान् श्रीपादान् दृष्ट्वा हृष्टः राजा व्याकरणशास्त्रे पूर्वपक्षं कृत्वा तैः पराजितः । तेन कुपितः सः श्रीपादानां कविप्रतिभां परीक्षितुं भवतां साहित्यशास्त्रे प्रवेशोऽस्ति वा यत्किञ्चिदपि कवनग्रथने परिचयोऽस्ति वा ? पप्रच्छ । तस्य कुहकमगणयन्तः झटिति कवितामुखेन उदतरन्

अनाराध्य कालीमनास्वाद्य चोलीम्
विना मन्त्रतन्त्रै ऋते शब्दचौर्यात् ।
प्रपञ्चप्रसिद्धप्रबन्धं विधातुम् ।
विरिञ्चप्रपञ्चे मदन्यः कविः कः ?

काल्याऽऽराधनेन वा चोलीतैलस्य (ज्योतिष्मती) आस्वादनेन वा नाहं कविप्रतिभां प्राप्तवान् । मन्त्रतन्त्रैः अथवा अन्येषां काव्येभ्यः शब्दचौर्यं कृत्वा काव्यग्रथनं न कृतम् । गुरुकरुणया प्राप्तकविप्रितिभासम्पन्नात् मदन्यः कविः कः अस्तीति राज्ञः चोलीतैलप्रभावेण प्राप्तां कविप्रतिभां निराचकार । श्रीपादानां काव्यचमत्कारं ज्ञानं च दृष्ट्वा लज्जितः राजा नतमस्तको भूत्वा तान्

प्रतिमठमुदरंभरयो यतयो बहवो हन्त वर्तन्ताम् ।
सुमतियते विततमते भवता समतां कः पुमानीयेत ॥

---

[18] Madras Arch. Report; संस्कृतपत्रिकाजालम्

[19] श्रीराघवेन्द्रमठगतार्चागतिः

इति स्तुवन् साष्टाङ्गं प्रणम्य मामनुग्रह्णन्त्विति व्यजिज्ञपत् । तान् भद्रपीठे संस्थाप्य राहुकेतुवाद्य- चित्रासनद्वय- छत्रचामर-बिरुदावलीनवरत्नाभरणाद्यर्पणेन संसेव्य कृतार्थोऽभूत् ।

मैसूरुमहाराजेनापि सम्मानिताः बेङ्गलूरुनगरस्थचिक्कपेटे इति प्रदेशे श्रीमदाञ्जनेयप्रतिमां

श्रीराघवेन्द्रयतीनां वृन्दावनञ्च प्रतिष्ठाप्य तदनु चित्रदुर्गे श्रीराघवेन्द्रतीर्थाः वेङ्कण्णाय मोक्षं यत्र प्रददुः तत्स्थले पाण्डवार्चितप्राणदेवविग्रहं प्रत्यष्ठापयन् ।

सुमतीन्द्रतीर्थानं कृतयः

श्रीपादाः प्रायः सर्वशास्त्रसम्बद्धग्रन्थानरचयन् । अत एव द्वितीय विजयीन्द्रतीर्थाः इत्येव विद्वद्भिः स्तूयमानाः अद्यापि । तेषु ग्रन्थेषु प्रकाशिताः नाममात्रश्रुताश्च अत्र दत्ताः ।

१.	ऋग्भाष्यटीकाभावरत्नकोशः	१७.	ब्रह्मसूत्रभाष्यतत्त्वप्रकाशिकाभावरत्नकोशः
२.	गीताभाष्यप्रमेयदीपिकाभावरत्नकोशः	१८.	सव्याख्यः मन्त्ररत्नकोशः
३.	अलङ्कारमञ्जरीव्याख्या मधुधारा	१९.	सुभद्रापरिणयनाटकव्याख्यानम्
४.	उषाहरणकाव्यव्याख्यानम्	२०.	सव्याख्या श्रीरामतारावलिः
५.	सव्याख्यः श्रीरामदण्डकः	२१.	सव्याख्या श्रीयोगीन्द्रतारावलिः
६.	सव्याख्या बिरुदावलिः	२२.	सव्याख्या बिरुदावलिः
७.	सव्याख्यः शाहुराजविजयः	२३.	सव्याख्या जयघोषणा
८.	सव्याख्यः शाहुराजप्रसङ्गः	२४.	सव्याख्यः चक्रवालप्रबन्धः
९.	सव्याख्यः नारायणीयगाथाप्रबन्धः	२५.	सव्याख्या देवराजस्तुतिः

१०.	श्रीनृसिंहस्तुतिव्याख्या एकावलिः	२६.	संस्कृतपत्रिकाजालम्
११.	विरोधोद्धारः	२७.	श्रीव्यासराजविजयव्याख्यानम्
१२.	श्रीराघवेन्द्रविजयव्याख्यानम्	२८.	श्रीविजयीन्द्रतीर्थविरचित-श्रीनृसिंहाष्टकव्याख्यानम्
१३.	श्रीराघवेन्द्रस्तोत्रव्याख्यानम्	२९.	वादावलीटिप्पणी
१४.	भेदोज्जीवनटिप्पणी	३०.	चन्द्रिकाटिप्पणी
१५	न्यायामृतभूषणम्	३१.	न्यायसुधाटिप्पणी (परिमळानुसारिणी)
१६.	प्रमाणपद्धतिव्याख्यानम् इत्यादीनि		

एवं ज्ञानभक्तिवैराग्यशमदमादिगुणपूर्णाः, शिष्यवात्सल्यभरिताः श्रीसुमतीन्द्रतीर्थयतिवर्याः ग्रन्थमुखेन वृन्दावनमुखेन च अद्यापि भक्तान् अनुग्रह्णन्तः विराजन्ते ।

४.५. जयघोषणा

काव्यमिदं चम्पूशैल्या विरचितम् । वस्तुतः चम्पूकाव्यविभागे स्वीकर्तव्यमासीत् किन्तु शाहुराजस्य विजयगाथां वर्णयत्काव्यमिदं ऐतिहासिकमहत्त्वं भजते इति ऐतिहासिककाव्यविभागे स्वीकृतम् । अलङ्कारिकदृष्ट्या ऐतिहासिकदृष्ट्यापि उत्तमं काव्यम् ।

आलङ्कारिकदृष्ट्याध्ययनम्

त्रयोदशश्लोकाः सन्ति । विविधवृत्तेषु निबद्धाः श्लोकाः शाहुराजस्य प्रतापवर्णनपराः ।

<u>स्रग्धरा</u>

नैकध्यङ्कारमारात्स्वमिह जनपदे स्वे नटन्यास्तटिन्या-
स्सह्यं सह्यं चयित्वा गुरुममलपटैरायशोभी यशोभिः ।
विद्विट्कल्पान्तकर्णे जपतपनोत्थानमस्ताचलाग्रे ।
धाम्ना निस्सीमभूम्ना रचयति तिमिरात्साहने शाहभूपः ॥[20]

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा इति लक्षणात् ।

<u>शार्दूलविक्रीडितम्</u>

जैत्रश्रीरधिकाधिरोहतु भुजाखट्वामखट्वासिकां ।
श्रीशाहावनिभर्तुरुल्लसदसि स्वार्होपबर्होज्ज्वलाम् ।
दोस्तेजोऽस्तसमस्तवैरितिमिरे जामीवभूमीसखी ।
खेलन्ती वसुधावरोधसदने सालाभवेलाचले ॥[21]

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् इति लक्षणात् ।

गद्ये तथा श्लोके छेकवृत्ति -लाटयमकालङ्काराः बहुधा दृश्यन्ते । ओजगुणप्रधानं काव्यमिदम् ।

अत्र वर्णानां आवृत्तिरपि चमत्कारयुता यथा

तदनुवेलातटपथानुवेलाद्दतप्रचक्रेण-मन्थर गतिमद सिन्धुरसमुदय-सिन्धुजवरचयबन्धुर-रथगणसुभटनटपटलनिबिडसमटकपटनटनकरलटह-पटहपटुरटनघटित-विकटनिजबलपदपुटघटनचटचटितस्थ-पुटितनिकटधरणिकटकविघटमान-मलिनपिछटाभरजछटाभरजर्जरितदक्षिणपारावर पुरोदन्वद्विराजदभिनवोदारसेतुना-तपोमयतेजोभर........

[20] जयघोषणा ४ श्लो
[21] जयघोषणा मङ्गलाचरणश्लोक

इत्यत्र भटानां प्रचक्रस्य (सेना कवायतु इति कन्नडभाषया यदुच्यते, marching)तस्य वर्णनं दृश्यते । प्रचक्रसमये पादानां घट्टनेन चटचट इत्यादिशब्दाः श्रूयन्ते । अतः कविः अस्य वर्णने टकारस्य आवृत्तिपूर्वकप्रयोगेन सेनाचलनं सहृदयानां दृग्गोचरं यथा भवेत्तथा करोति । सेनाचलनं प्रेक्षकेभ्यः कथं दृश्यते इति मनोज्ञतया वर्णितम् । मदसिन्धुरमन्थरगतिः इत्यनेन चलनस्य गाम्भीर्यं, समुदयसिन्धुज इत्यनेन उद्यच्चन्द्रमसः सादृश्यं दत्त्वा चलनसौन्दर्यं, सुभटनट इत्यनेन भटानां सैनिकानां पौरुषं, पुटितनिकटधरणिकटकविघटमानमलिन-पिछटाभरजछ्छटाभरजर्जरितदक्षिणपारावार... इत्यनेन चलनसमये दक्षिणसमुद्रतीरे उद्भूतधूलीत्यादिकस्वाभाविकदृश्यं सहृदयस्य मनः लोकान्तरं प्रापयति ।

ताद्रूप्याभेदरूपकालङ्कारस्य आधिक्यं दृश्यते । उदात्त परिणामार्थान्तरन्यासादयोऽपि दृश्यन्ते ।

परिणामालङ्कारः

स्याद्भूषाघोषणावश्श्रुतिततिषु मया भाषिता भीषितारि-
क्षोणीशश्रेणिचूडामणितरणिघृणिस्मेरपादारविन्दः ।
श्रीशाहक्ष्मातुराषाडति लसति नृपान्पुण्यभूमेव भूमे-
रेको लोकोत्तरश्रीरितिजगति जना घुष्यतां घुष्यतां भोः ॥[22]

इत्यत्र अन्यक्षोणीशानां चूडामणयः एव तरणिः अर्थात् सूर्यः तेन विकसितपादारविन्दौ यस्य सः इति उपमानस्य सूर्यस्य पद्मविकसनकार्यं उपमेये चूडामणौ आरोपितत्वात् **परिणामालङ्कारः** । पुण्यभूम इव इत्यनेन उपमालङ्कारः ।

उदात्तालङ्कारः

नर्मक्ष्मापालपालीमणिमकुटपुटास्फोटजव्यातिराटी

---

[22] जयघोषणा ६ श्लो

वाचाटस्वाङ्घ्रिपीठे पुनरभिहित सद्वन्दिसन्दोहवाचे ।
श्रीशाहक्षोणिनृपतिषु भुवि कस्तिष्ठते पृष्ठतेजः ।
पुष्णालोष्णालुरित्थं ननु जगति जना घुष्यतां घुष्यतां भो ॥[23]

अत्र शाहभूपालस्य प्रतापस्य सूर्यस्य तेजसा सह सादृश्यमुक्तम् । पुनरभिहितसद्वन्दि-सन्दोहवाचे ... इत्यनेन **उदात्तालङ्कारः** 'उदात्तमृद्धेश्वरितं श्लाघ्यं वान्योपलक्षणम्' इति लक्षणात् ।

गद्यभागे **श्लेषालङ्कारः**

चपलतरनिखिलक्षोणिभृत्पक्ष-क्षपणदक्षे,समुज्वलहेतिजालावलीढगहनपरबले, दुष्कृतपरजनदण्डधारिणी, पालितसकलपुण्यजने, गभीरहृदयनिभृतसत्वभरे, रयभरनिरस्तसमुद्धतपरागे, सकलजगदुपजीव्यभवे, विमलविपुलवृषविहारनिरते...इत्यनेन अष्टदिक्पालकैस्सह शाहराजस्य सादृश्यमुक्तम् । अत्र क्षोणिभृत् शब्देन पर्वतः ग्राह्यः । पर्वतानां पक्षक्षपणदक्षः इति इन्द्रपक्षे , शत्रुराजानां पक्षो नाम सैन्यं तस्य क्षपणदक्षः इति शाहराजपक्षे ज्ञेयः । समुज्वलहेतिजालावलीढगहनपरबले इति अग्निसादृश्यम् वर्णितम् आयुधजालैः प्रबलशत्रूणाम् अवलीढत्वात् । दुर्जनान् दण्डयतीति यमधर्मराजस्य सादृश्यम् । पुण्यजनान् पालयतीति निर्ऋतेः सादृश्यम् । गभीरहृदयः मत्स्यादिसत्वभरान् पोषयतीति वरुणपक्षे सत्वगुणयुतान् पोषयतीति राज्ञः पक्षे एवं वरुणसादृश्यमुक्तम् । रयभरनिरस्तसमस्तपरागे इत्यत्र वेगेन निरस्ताः परागाः धूलीकणाः इति वायुपक्षे राज्ञः पक्षे पराः अर्थात् शत्रवः अगाः वृक्षाः राज्ञा वेगेन प्रतापेन च निरस्ताः शत्रवः तत्रत्याः वृक्षाश्च समुद्धताः इति ज्ञेयः । सकलजगतः वैभवस्य वशीकृतत्वात् कुबेरसादृश्यं वृषविहारनिरते अर्थात् नन्दिनामकवृषभोपरि विहारनिरतः इति रुद्रपक्षे वृषो नाम धर्मः धर्मनिरतः इति राज्ञः पक्षे । एवं अष्टदिक्पालानां सादृश्यमुक्तम् । एवं श्लेषालङ्कारे वर्णनं कृतम् ।

काव्यस्य प्रधानरसः वीररसः भीभत्सरसप्रतीतिरपि अतिशयेन दृश्यते यथा

---
[23]जयघोषणा ९ श्लो

रिपुनरपतिबलपरिमरविरचन-सरभससमदितजहिमतङ्गज-जहितुरङ्गमभटसङ्घ-भयङ्करनिजबलकठिनहेतिजाल-हठलुठित-पदमथित-करटिखण्डतुरगरुण्ड-नरकरङ्कपिचण्डमस्तकगलपृष्ठ-पदष्ठीवनिष्ठ्यूतनवडिण्डीरपूरभरितान्त्रकालखण्डमेदोमुख-पललजालपङ्किलतल-विसारिजानुदघ्नरुधिरझरदुस्सञ्चर-समरधरणिनटदमन्धरकबन्धवृन्द-नतनालोकनसकौतुकनाकिनीनिकरमध्यागत-देवभूतरिपुभटपटलप्रशस्यमानयशस्यवीर्यस्य इति ।

अत्र रणाङ्गणस्य भीकरदृश्यस्य वर्णनं वर्तते । मृतमातङ्गान् मृततुरङ्गान् जहीति वदन्तः भ्रान्ताः भटाः, गजानां हयानाञ्च खण्डरुण्डाः, पादमथनेन उद्भूतः फेनः, मांसादीनां मथनेन उद्भूतः रुधिरझरःइत्यादिवर्णनं सहृदयानां मनसि हेयभावं जुगुप्सां च जनयित्वा भीभत्सप्रतीतिकारणं भवति ।

ऐतिहासिकदृष्ट्याध्ययनम्

काव्येस्मिन् प्रथमशाहुजिमहाराजस्य प्रतापवर्णनमस्ति । शाहुमहाराजः वेङ्कोजिमहाराजस्य ज्येष्ठपुत्रः । १६८२ तमे क्रिस्ताब्दे जातः शाहुमहाराजः द्वादशेवर्षे एव सिंहासनमधिरूढः एकचत्वारिंशत्संवत्सरपर्यन्तं राज्यं पर्यपालयत् । तस्य शासनकाले मुघलराजैः भारतस्य प्रमुखभागे आक्रमणं प्रारब्धम् । दक्षिण-भारतस्य कोरमण्डलभागे तथा तिरुचिरापल्लि-भागेऽपि मुघलानां आक्रमणमभूत् । तदा स्व-पराक्रमेण युद्ध्यमानोऽपि पराजयमनुभूय सामन्त-राजोऽभूत् ।

पट्टुकोट्टायि शिलाशासने शाहुमहाराजस्य पराक्रमस्य प्रशंसा दरीदृश्यते । पम्बण तथा पडुकोट्टायिप्रदेशानां मध्ये सर्वप्रदेशानां जयः तत्र बाबाजि नामकस्य अपारसहाय्यं इत्यादि ऐतिहासिकविषयानामुल्लेखो लभ्यते । तस्य काल एव उन्नतः दुर्गः निर्मितः । १७०० तमे क्रिस्ताब्दे बाबाजिवर्यस्य सहाय्येन तिरुचिरापल्लिप्रदेशं स्वकीयमकरोत् । तदा

रामनाडस्य राज्ञः सेतुपतेः सहाय्यं स्वीकृतवान् इति इतिहास उपलभ्यते । तस्य उल्लेखः काव्येऽस्मिन्नपि लभ्यते ।

जर्जरितदक्षिणपारावारपुरोदन्वद्विराजदभिनवोदारसेतुना......[24]

किन्तु पराजयभयेन शहुमहाराजः मङ्गम्मायाः पक्षे युद्धमकरोत् । अनेन कुपितो रामनाडराजः १७०९ क्रिस्ताब्दे अरन्तङ्गिप्रदेशं वशे अकरोत्[25]।

युद्धस्य वर्णने दक्षिणदेशं प्रति आक्रमणमभूदिति ज्ञायते । वेलातटपथः इत्यनेन समुद्रतीरः इति अवगम्यते । अतः प्रायः पम्बण पदुकोट्टायि मध्यगतदेशं प्रति आक्रमणस्य वर्णनं स्यादिति वक्तुं शक्यते । **पाशभृदाशावल्लभान्तःकरण......**[26] इत्यादि वाक्यान्यपि अत्र प्रमाणम् ।

शाहुमहाराजस्य वैभवम्

शाहुमहाराजः नैकान् प्रदेशान् वशिकृत्य स्वपराक्रमेण चक्रवर्ती इव व्यराजत ।

आगौरिगुरुसर्वमाचमलयादापूर्वपश्चाद्गिरं
सर्वौघप्रकटाभिषेणनयुजा श्रीशाहभूमीभुजा ।
आक्रान्तं नृपमौलिभिस्सह महाभद्रासनं सन्मणी ।
जुष्टं धृष्टमिति स्फुटं ननु जना भो घुष्यतां घुष्यताम् ॥[27]

इत्यत्र आहिमालयात् दक्षिणपर्यन्तं आपूर्वाद्पश्चिमगिरिपर्यन्तं सर्वे राजानः अस्य पदतले स्वसिंहासनकिरीटादीन् समर्प्य तस्याधीनाः बभूवुः इति वर्णितम् । किन्तु इतिहासे अस्य प्रमाणं न लब्धम् । तथापि सः पराक्रमी इत्यत्र तु न सन्देहः ।

---

[24] जयघोषणा- पु सं ६

[25]https:\\en.m. Wikipedia. org

[26] जयघोषणा- पु सं ९

[27] जयघोषणा- श्लो. सं ८

वसुमतीचक्रे साम्राज्यभद्रासनाधिरूढे दृश्यतामितो नमतिनेपालभूपाल इतस्सकलभरविराजिकलभकुलमुपहरति जोनकपतिरितः कीर्तिसारानिव हारानुपमण्डयति पाण्ड्यभूपतिरितः , प्रतीक्षते द्वारिवारितपारसीकविभुरितो महाराजनिजपुरगमनाय समनुजिज्ञा सति भवदाज्ञया केरलाधिप इति सेवाकाल हेवाकार वाञ्चितकञ्चुकीनिवेदित-तत्तद्राजसमाजसमुचित-कार्यसद्दक्षकटाक्षभाषिणि-सकलजनपदमोदहेतौ-पालितधर्मसेतौ-कविबुधजनजीवातौ वसुमतीमनुशास्ति[28] इत्यादिवाक्यैः शाहुमहाराजस्य कीर्तिः वैभवं च अनुपमं आसीदित्यवगम्यते । अत्र नेपालराजस्य, पाण्ड्यभूपतेः(तमिळुनाडु तथा आन्ध्रस्य भूभागः पाण्ड्यदेश इति प्रसिद्ध आसीत्), पारसीकराजस्य (पर्शिया), केरलराजस्य च उल्लेखो वर्तते ।

शाहुमहाराजस्य मन्त्रिमण्डलम्

शाहुमहाराजस्य मन्त्रिमण्डलस्य निष्ठा, तन्त्रं , मन्त्रालोचनमित्यादिविषयकोल्लेखोऽपि अत्र लभ्यते ।

सकलसुजन-शुभाशुभविभाग-सुभगंभावुक-दण्डनीतिकाण्डचर्यानिश्चायक-सचिववर-निचयरचित-कर्मोपक्रममुखाङ्ग-पञ्चदक्षीणाषडक्षीण-सन्धिमुख-षाड्गुण्यगोचर-मन्त्रतन्त्रणयन्त्रित-स्वपरत्रिवर्गवेदनसमुदितशक्तित्रयसमृद्धि-समसमारम्भ-सर्वकर्मीणफलोपलम्भसम्भवदकम्पसंपदमितं-पचविनयविलुप्त-सप्तव्यसमसमेधमान-कोशराशिसमुदित-निजनीवृदीतिशान्तिमुदित-पुत्रपौत्रीणविबुधवृद्धविहित-निरन्तराशीराशीहित-समुन्निद्रभद्रपारम्परीकम्[29] अत्र सचिवनिचयस्य गुणलक्षणानि तन्त्रालोचनं शक्तित्रयस्य वर्धनमित्यादि राजनीतिविषयाः चर्चिताः । शुभाशुभविभागसुभगंभावुक इत्यनेन सचिववराः न्यायान्यायविषये विवेचनशीलाः आसन्निति ज्ञायते । दण्डनीतिकाण्डचर्या इत्यनेन तेषां दण्डनीति राजनीतिज्ञानं उत्तममासीदिति ग्राह्यते । पञ्चदक्षीणाशडक्षीण इत्यनेन तृतीयपुरुषेभ्यः संगोप्य तन्त्रादीनां

---

[28]जयघोषणा- पु सं २९

[29] जयघोषणा – पु सं १८

चर्चा भवति स्म इति अवगम्यते [30]। सन्धिमुख षाड्गुण्यगोचरमन्त्रतन्त्र.. इत्यादिना सन्धि, विग्रह, आसन, यान, संस्राय, द्वैधीभावानां षड्गुणानां ज्ञानं तथा कस्य उपयोगः कदा कस्मिन् सन्दर्भे करणीय इति समीचीनं ज्ञानमासीदिति वेद्यते ।

षड्गुणानां संक्षिप्तचर्चा (कौटिल्यस्य अर्थशास्त्रानुगुणम्)[31]

सन्धिः - बलिष्ठशत्रुभिस्सहस्नेहवर्धनं सन्धिः । यदि शत्रुः बलिष्ठः तर्हि वैरो न करणीयः पराजयसम्भवत्वात् । अतः वैवाहिकसम्बन्धादिना स्नेह उचितः ।

विग्रहः- बलहीनशत्रुभिस्सह युद्धः करणीयः । तथा बलहीनस्य राज्यं वशे कृत्वा साम्राज्यं विस्तरणीयम् ।

आसनम्- तूष्णीं भावेन शत्रूणां तन्त्रादीनां निरीक्षणम् आसनमिति कथ्यते । कदाचित् शत्रुः समबलः स्यात् वा बलिष्ठोऽपि सन्धिना स्नेहो न समुदितस्स्यात् । तदा राज्ञा किमपि न करणीयमिति शास्त्रे । केवलं शत्रोः मन्त्रतन्त्रादिविषये चारैः सङ्गृह्य निरीक्षणं करणीयम् । उचितसमये आक्रमणं कृत्वा वा अन्योपायैः शत्रुः जेयः ।

यानम्- यदि जयः निश्चयः तर्हि सपदि आक्रमणं कृत्वा शत्रुः वशे करणीयः इत्येतत् यानमिति प्रथितम् ।

संश्रयः- शत्रूणां आक्रमणस्य ज्ञानं वर्तते चेत् अन्यबलिष्ठराजस्य सहाय्येन शत्रोः जयः संश्रय इति । चारैः शत्रोः आक्रमणस्य वार्ता लब्धा चेत् शत्रोः शत्रुं अथवा स्वेन सह स्नेहभावं प्रदर्शयता राज्ञा सह समालोचनं कृत्वा शत्रुः निरसनीयः ।

द्वैधीभावः- एकेन सह सन्धिः अपरेण सह विग्रहः द्वैधीभाव इति कथ्यते । यदा शत्रुः बलिष्ट इति ज्ञायते तदा अपरैस्सह सन्धिं कृत्वा स्वयं बलिष्ठशत्रुराज्यं आक्रम्य वशे करणीयम् ।

एवं षाड्गुण्यानां साधने सामदानभेददण्डोपायाः आश्रयणीयाः इति कौटिल्यः ।

---

[30] जयघोषणा – पु सं १९

[31] https:\\www.gktoday.in

स्वपरत्रिवर्गवेदनं नाम स्वेषां अपरेषां च क्षयस्थानवृद्धीनाञ्च ज्ञानमासीत् मन्त्रिनिचयस्य । तेन ज्ञानेन समुदितशक्तित्रितयं अर्थात् उत्साहजनितशक्तिः ,प्राभावजनितशक्तिः, मन्त्रजनितशक्तिः इति । एवं सुदृढमन्त्रालोचनेन तन्त्रैः तथा सम्यक् ज्ञानेन शाहुमहाराजस्य मन्त्रिसमूहः अद्वितीय आसीत् । अतः अकम्पसम्पत् अर्थात् अविनाशमापन्ना सम्पदासीदिति वर्णितम् । एवं तत्कालीन ऐतिहासिकविषयान् ज्ञात्वा अद्यतनीनकालेऽपि परिपालमानानि राजनीतितन्त्राण्यधिगम्य स्वस्थं राजकीयभविष्यं निरीक्षितुं काव्यमिदं मार्गदर्शकम् ।

शाहुमहाराजस्य संस्कृतसाहित्यप्रेम

शाहुमहाराजः स्वयं संस्कृतज्ञः साहित्यासक्तश्च आसीदिति उक्तम् । काव्येऽस्मिन्नपि तस्य साहित्यरुचिः उल्लिखिता ।

अतुलनिजबलशमित -शत्रुगन्धसन्धुक्षित- मतिविकासमुदित-सचिववरहस्तविन्यस्तसमस्त वसुन्धराधुरावरोपणविहित- चिन्ताविरहसन्तानित- सङ्गीतसाहितिकलाविलाससन्तोषित- कविबुधजननवीकृतानुदिन- विलासिनिजसरसगोष्ठीविनोद प्रियाकृतसहृदयहृदयात्[32] इत्यादि वर्णनेन कलासङ्गीतसाहित्यादिविषये तस्य सुरुचिः कविपण्डितान् प्रति गौरवेत्यादिश्लाघनीय-गुणाः बुध्यन्ते ।

एवं शहुमहाराजस्य जयं घोषयत् काव्यमिदं साहित्य- दृष्ट्या तथा ऐतिहासिक- दृष्ट्याऽपि उत्तमम् ।

४.६. चक्रवालप्रबन्धः

श्रीमत्सुमतीन्द्रतीर्थविरचितः चक्रवालप्रबन्धः ऐतिहासिकलघुकाव्यम् चम्पूशैल्या रचितमिदं काव्यं तत्कालीनस्य रङ्गकृष्ण इत्याभिदस्य कस्यचन राज्ञः वर्णनपरम् । मङ्गलाचरणे श्रीरङ्गनाथं स्तुवन् कविः रङ्गकृष्णराजस्यापि श्रेयः प्रार्थयति –

---

[32] जयघोषणा – पु सं २५

श्रीलश्रीरङ्गनाथस्वरसविसृमरापाङ्गवीक्षाप्रतीक्ष ।
प्रत्यक्षश्रीविलास प्रकटितविभवप्राच्यसाम्राज्यपूज्य ।
कीर्तिस्ते रङ्गकृष्णक्षितिरमणमणे जानकीजानिकिर्ते-
रालीगाढाङ्गपाली सुरभिलतनुराहेलितारालिजीयात् ॥[33]

आलङ्कारिकदृशाध्ययनम्- काव्येऽस्मिन् स्रग्धरा शार्दूलविक्रीडितादि वृत्तानां प्रयोगः दृश्यते । मङ्गलश्लोकः तथा प्राञ्चत्.....इति प्रतापवर्णनश्लोकश्च स्रग्धरायां निबद्धौ । विद्वत्संसदजस्रं.....इति श्लोकः शार्दूलविक्रीडिते निबद्धः । अर्थालङ्कारा अपि मनोज्ञाः यथा **तुलनातीतयशोमहिमहिमकरविकसित-सितकुवलय** इत्यत्र राज्ञः यशः चन्द्रेण सह तुलितम् । ताद्रूप्यरूपकः दृश्यते । पुण्यशालिजनानां नयनान्येव चकोराः तानि चन्द्रवत् तोषयति राजा इतिरूपकप्रयोगेण वर्णयति ।

अस्मिन् काव्ये कलिका, मेलका इति द्विविध काव्यप्रकारस्य प्रयोगोऽपि दृश्यते । यथा

सुखङ्गर सङ्गर सादर सादरमानसमानस हितपर
तपरभसा हिमसाहिमहारिपुहारि पुरोहित सुमहः
सुमहितकारण कारण भावित भावित तीरित तीरित पुरवर
पुरवरजालय तामर तामरसोदर सोदर भवनभ
वनभरदाहव दाहवशातनशातनतावरतावर परहित ।
रहितपराजय राजयमाभरमाभरतासि सभासिस दिननुत ।
ननु तव कोऽपि नकोऽपि नरोहितरोहित रोधिविरोधिविगमधुर ।
मधुरशिरासनिरास निरामय रामयशोभिविशोभि विभवतर ।इति । एषः कश्चित् काव्यप्रकारः यत्र शब्दानां वर्णानां आवर्तनं दृश्यते । प्रायः श्लेषालङ्कारः ।

ऐतिहासिकदृशाऽध्ययनम्- रङ्गकृष्णराजस्य विषये इतिहासे बहवः विषयाः न लभ्यन्ते । तथापि अन्तर्जालमध्ये यदा पौनःपुन्येन अन्वेषणं कृतं तदा सङ्गृहीताः एते विषयाः । अस्य राज्ञः पूर्णनाम मुद्दुवीररङ्गकृष्णराज इति । शिवाजिमहाराजस्य शासनकाले एषोऽपि

---
[33] चक्रवालप्रबन्धः-श्लो १

कश्चित् सामन्तराजः स्यात् यतो हि 'तिल्लान' इति कश्चित् सङ्गीतप्रकार् कर्नाटकसङ्गीते प्रसिद्धः वर्तते । शिवाजेः शासनकाले कर्नाटकसङ्गीतशास्त्रज्ञाः राजसभायां राज्ञः वर्णनपराणि तिल्लानानि गायन्ति स्म । तेषु एकस्य साहित्यं एवमस्ति-

राग – यमुना ताल- आदि
पराक्रमविक्रमजित रणरङ्ग अर्जुनसमान ।
काममूरुत विमलकिरात सुभसकलजनतसुजन ।
रङ्गकृष्णमुद्दुवीरनन्दन सुविजय रङ्ग चक्कोनाथ ।
महिपति चिरञ्जीवु राजते प्रमाण ...॥ इति

अस्मिन् रङ्गकृष्णस्य वर्णनम् स्फुटं दृश्यते । इदं शिवाजिशासनकाले रचितमिति ज्ञायते [34]. तस्य पराक्रमविषये युद्धकौशलविषयेऽपि अत्र उल्लेखाः लभ्यन्ते ।

काव्येऽपि तस्य औदार्यादिसद्गुणानां , पराक्रमस्य च वर्णनं दृश्यते । तस्य पराक्रमविषये एवं कथितं वर्तते काव्ये- **विभासुर सुरगुरु धीरण रणपटुधीर, धीरसरसकृतिवरनृप, नृपशुरिपूदर दर –भरणोचित-चित-तृणकावयवायमनकृत कृप** इति ।

प्राञ्चत्वद्धाटिघोटीखुरपुटकलुष-क्ष्मातलोद्दामनिर्य
द्धूलीपालीकरालाम्बुदघनपटले रोदसोरन्तरालम् ।
रन्थानेखड्गविद्युद्रिपुनृपनेत्रसज्जज्जलानां

वृष्टिं क्लीबभाव्यं रणभुवि भवतो रङ्गकृष्णक्षितीश ॥

अत्र रणरङ्गे राज्ञः हयस्य खुरपुटादुद्भूतधूलिना निर्मिताम्बोदाः, खड्गचलनेन विद्युतः निर्माणं, रिपुस्त्रीणां अश्रूण्येव वृष्टिरिति वर्णयति कविः । अत्र प्रयुक्ताः शब्दाः अपि रौद्ररसव्यञ्जकाः येन कविप्रतिभा स्फुटतया भाति ।

राज्ञा श्रीरङ्गनाथस्य पूजाकैङ्कर्यं अनुस्थीयते स्म । तस्य वर्णनं एवं वर्तते - **वनजभव - करविरचित-रङ्गेशपदसपर्या-पर्याय-करण-प्रकटितनैपुण्य, इति । पुण्यशाली-जन-नयन-चकोर-कोरकित-स्मित-चन्द्रिकोज्ज्वल-मुख-हिमकर,इति जनचकोराणां कृते राजा**

[34] Shodhaganga.inflibnet.ac.in

चन्द्रसदृश आसीदिति राज्ञः प्रजासु स्नेहौदार्यादिगुणानां, मकरालय-गभीर-निजहृदय-दयनीय-नरपति-पालित- समस्त-विपुल,इति राज्ञः करुणापूरितहृदयस्य, विपुल-महमहर्धिदर्शनापतदवनिपति-निकर-कर-विश्राणितविविधि-विभव इति अन्यमहीभृद्भिः नतः, सामन्तराजभिः नैकप्रकारकविभवान्करोदित्यादिपराक्रमादिगुणानां,भवभीतिकर-विषय-विमुख-मुखज-बुध-रक्षण-विचक्षण इति आध्यात्मविद्याविचक्षणेषु राज्ञः गौरावादिसमर्पणभावः तथा तेषां रक्षणे तस्य बद्धतादीनां, क्षणदाकर-रुचिर-वदन-विलासी-विलासिनी-जन-मदनावतार इति तस्य सौन्दर्यप्रज्ञायाः, तारकारि-कारित-बहुमान-निजहेति-विदारित-समस्त-समुन्नद्ध-महीभृत-सङ्घातसऔद्धत्यवतां भूभृतानां विषये अस्य विक्रमस्य, घातुक-जन-विनाशकर-करवाल-परिष्कृत-करकमलकलित-साधुजनाभय इति साधुजनानं अभयप्रदानस्य च वर्णनं क्रियतेऽत्र । तथा तस्य नैकसद्गुणैराकृष्टः कवि तं -समेधस्व ! इति आशीर्वचनेन शंसति ।

पुनः तुलनातीत-यशोमहिम-हिमकर-विकसित-सितकुवलय, लयकालाहचर-समिदुज्वल-ज्वलन-निजनिजमहोवृद्धिकर-रिपुरुधिराज्याधार, धारणासमिद्धति-मतिमत्प्रकर-करविसृष्टदानाम्बु-तटिनी-समालिङ्गित-सागरारावसंस्तुतांहते, हतेतरनिवासानन्द-लक्ष्मीसदनसदनघमुखाम्बुज-मकरन्द-सुन्दरकरुणावलोकन, कम्रकगिरिस्थेमगर्व-सर्वंकष-धैर्यविभव-भवन-मानसधूत-समस्तविकार, कारणसामग्र्यसम्पादित-समस्त-मस्तकस्थापित-निजशासन-कोटीरभार, भारतीविलासभवानायित-मुखविधुविधुत-लसत्सरोजकाननशोभ, शोभमान-साम्राज्यलक्ष्मीविहार-डोलाविराजमान-माननीय-विपुल-भुजान्तरालविजेषीष्ठाः श्रीरङ्गकृष्ण मुद्दुवीरनृपालस्य चक्रवालपतेः ..... इति भूरि प्रशंसां करोति कविः । चक्रवालाख्यस्य प्रदेशस्य राजा एष इत्यनेन हेतुना अस्य राज्ञः वर्णनपरं काव्यं चक्रवालप्रबन्ध इति नाम्ना प्रसिद्धमस्ति।

पञ्चमोऽध्यायः

५.यतिपुङ्गवानां जीवनचरिताधारित-लघ्काव्यानामध्ययनम्

५.१. श्रीजयतीर्थविजयः

श्रीमन्मध्वसिद्धान्तवारिधेः श्रीमन्न्यायसुधाख्यां सुधां भूसुरेभ्यो वितन्वन् अज्ञानतमोनाशकश्च श्रीजयतीर्थचन्द्रमाः सर्वमाध्वमनसां नित्यमनोहरः । द्वैतसिद्धान्तप्रतिपादकग्रन्थेषु गरिष्ठां कीर्तिं भजद्ग्रन्थरत्नं श्रीमन्न्यायसुधाख्यम् । परवादिखण्डने सिद्धान्तस्य समीचीनज्ञानसञ्चयने च ग्रन्थादस्मात् उत्तमः कोऽन्यः ग्रन्थः ? अस्य मेरुग्रन्थस्य रचयितारः विद्यारण्यादि प्रकाण्डपण्डितान् पराजय्य परमतीयैरपि संस्तूयमानाः श्रीमज्जयतीर्थश्रीमच्चरणाः स्वरचितविशिष्टटीकाभिः श्रीमट्टीकाकृत्पादाः इत्येव प्रख्याताः । तेषां जननादि-ग्रन्थरचनादिकथाः सद्भक्तान् तोषयन्तीत्यत्र न कापि संशीतिः । अत एव नैकैः कविभिः विजयकाव्यानि रचितानि । ते च

१)श्रीव्यासतीर्थकृत-पञ्चसर्गात्मक-अणुजयतीर्थविजयः

२)श्रीव्य़ासतीर्थकृत-चतुस्त्रिंशच्छ्लोकात्मक-अणुजयतीर्थविजयः

३) छलारिसङ्कर्षणाचार्यविरचित-जयतीर्थविजयः

४) करिकेहळ्ळिश्रीनिवासाचार्यविरचित-जयीन्द्रोदयः

५) कृष्णाचार्यकृत-जयतीर्थविजयाब्धिः

६) कोल्लापुर अरकाड नृसिंहाचार्यकृत-जयतीर्थगुणार्णवः

७) श्रीरघुदान्ततीर्थविरचित- जयतीर्थविजयः

८) श्रीरघुशान्तदासविरचित- जयतीर्थगुणरत्नमाला [1]

---

[1] जयतीर्थविजयः – पु सं xix

तदेतेषु काव्येषु अस्मिन् शोधलेखे श्रीछलारीसङ्कर्षणाचार्यविरचितस्य जयतीर्थविजयाख्यस्य लघुकाव्यस्य ऐतिहासिक-आलङ्कारिक-सैद्धान्तिकदृष्ट्या अध्ययनं विधास्यते। पञ्चसर्गयुतस्यास्य काव्यस्य सङ्क्षिप्तकथा अत्र निरूप्यते।

प्रथमसर्गस्य कथासारः-प्रथमसर्गे मङ्गलमाचरन् कविः हरेः रामरूपं स्तौति । विष्णोः लक्ष्म्याः प्रत्येकतया नमनस्य अविहितत्त्वात् रमासंश्लिष्टतनुरिति विशेषणेन रमया सहितं हरिं स्तौति।

रमासंश्लिष्टतनुः स माऽव्यादव्यं सदव्याजकृपाकटाक्षः।
दशेक्षहृत्तामरसाग्र्यवासो हरिर्दशस्यन्दननन्दनाग्र्यः॥

अत्र रमासंश्लिष्टतनुरित्यनेन रमयाऽलिङ्गितस्य हरेः प्रसन्नता तथा तया स्वाभीष्टप्राप्तिः सूचिता । प्रसन्नतयैवावस्थितस्य स्वामिनः स्वाभीष्टाशासनं कार्यकारी इत्यभिप्रेत्यापि इदं विशेषणमिति व्याख्यातम् [2]। ततः मोक्षप्रदायकग्रन्थकर्तॄन् श्रीमन्मध्वाचार्यान् नमति । दुर्वादितमिस्रसमूहं स्वगोमण्डलैः वाक्यैः यः आखण्डयत् स जयतीर्थसूर्यः मम हृदि प्रकाशमानः भवतु अनुग्रह्णात्विति काव्यनायकं जयतीर्थश्रीपादान् स्तौति ।तदनु श्रीसत्यनिधितीर्थान्, श्री सत्यनाथतीर्थान् तथा श्रीसत्याभिनवतीर्थान् स्तौति कविः । विद्यागुरून् पितृपादान् छलारिशेषाचार्यानपि ग्रन्थारम्भे नमति । काव्यरचनायाः उद्देश्यं वक्ति - उत्तमश्लोकानां चरितानुवादः मुक्तेः बीजम् । अतः जयार्यकथा प्रारब्धा सफली स्यादिति काव्यप्रयोजनं निर्दिशति । सुमध्वविजयस्य कथां निरूपयति कविः । नवसु श्लोकेषु भगवतः वेदव्यासरूपस्य वर्णनं करोति । श्रीमदाचार्याणां शिष्याणां च उल्लेखः अत्र विद्यते।

द्वितीये सर्गे श्रीमदक्षोभ्यतीर्थाणां महिमावर्णनम् । रङ्गण्णधामण्णेति विप्रयोः ब्रह्महत्यादोषं शङ्खोदकप्रोक्षणेन परिहृत्य तौ अन्वगृह्णत् । कदाचित् श्रीमदक्षोभ्यतीर्थाणां स्वप्ने साक्षात् हरिरभ्युपेत्य कारुप्रधानात् अर्थात् कस्माच्चित् स्वर्णकारात् सुन्दरलक्षणोपेतं विठ्ठलमूर्तिं भिक्षार्थं स्वीकुरु इत्युवाच । तथा हि स्वर्णकारस्य स्वप्नेऽपि सल्लक्षणोपेतां विठ्ठलप्रतिमां

---
[2] जयतीर्थविजयप्रकाशिका– छलारिसङ्कर्षणाचार्यविरचिता

अक्षोभ्यतीर्थेभ्यः भिक्षारूपेण देहीति आज्ञापयामास । तदा सः कारुः यतीशमुपेत्य स्वप्नवृत्तान्तं कथयित्वा गृहमागत्य प्रतिमां स्वीकुर्वन्त्विति प्रार्थयामास । अक्षोभ्यतीर्थानां स्वप्नेऽपि एषा एव सूचना प्राप्ता इति ज्ञात्वा विस्मितः कारुप्रवेकः मूर्तेः आसनादि कर्माणि असमाप्य एव तां प्रतिमां समार्पयत् । एवं प्रसन्नेन हरिणा प्रेरितेन कारुणा दत्तामर्चां आवाहनादिभिः प्रतिष्ठितां कृत्वा चतुर्मुखब्रह्मकरार्चित –मूलरामादिविग्रहैस्सह श्रीमदान्दतीर्था एव तस्मिन् दिने समपूजयन्[3]।

कश्चिद्विद्वान् सर्वविद्याप्रवीणः परवादिनः अज्ञानिव कृत्वा गजाधिप इव आसीत् । तदा दुर्वादिगजविदारणे दक्षः श्रीमदक्षोभ्यतीर्थगुरुराट् तत्त्वमसि इति श्रुतिवाक्येन जीवात्मनोः भेदं प्रत्यपादयत् ।नैकान् विदुषः मध्वमतदीक्षाबद्धान् विष्णुभक्तान् चकार । सर्वत्र सञ्चरन् कदाचित् भीमरथीतीरमगमत् । तत्र स्नात्वा पाण्डुरङ्गस्य दर्शनञ्च प्राप्य तत्र रामपूजां कृत्वा पाण्डुरङ्गं सम्प्रीणयामास । तत्रैव वासोचितप्रदेशे पाण्डुरङ्गपदसारसे चञ्चरीकवत् उवास । तदा यतिवरस्य मनसि मध्वसिद्धान्तस्य पूज्यराज्ये कमभिषिक्तं करिष्यामीति चिन्ता समुत्पन्ना । तदा हरिः स्वप्ने श्वः कश्चिदैश्वर्यशाली अश्वारूढः पुरुषैस्सह इमां नदीमागमिष्यति । त्वमविचार्य तस्मै पुरुषाय यौव्वराज्यं देहि । पितृकुलशोभः शुभलक्षणोपेतस्स अश्वारूढः अन्यैः पुरुषैस्सह इमां नदीं प्रविश्य आस्येन जलं पास्यति । तदा शमदमादिगुणोपेतं तमाकार्य आशु चरमाश्रमं देहि । मत्प्रसादात् सः नूनं विततकीर्तिकरः भविष्यति इत्याह । प्रातः काले आश्चर्यसागरे निमग्नः यतिवरः स्वगुरुकारुण्यं भूयो भूयः स्मरन्नुवास । तदनु भीमरथीमेत्य तत्रावगाहनस्नान-जप-निर्जरपूजेत्यादि- स्वकर्मानुष्ठानं समापयत् । तदा कश्चिदश्वारूढः शिरोवेष्टनवसनं कवचं शुभ्रवस्त्रं हारमाला-मुक्तामणिमालाश्च धरन् सः मनोहररूपः यथेच्छं चरन् मध्याह्नकाले श्रान्तः तृषया अश्वस्थः एव नद्यां प्रविश्य गोवत् जलमपिबत् । तं दृष्ट्वा यतिराट् स्वप्नोक्तरीत्यैव मम युवराजः प्राप्तः इत्याननन्द ।

---

[3] अद्यापि प्रसन्नविठ्ठलेति प्रसिद्धः विग्रहः उत्तरादिमठसंस्थाने नित्यं पूज्यते ।

तृतीयसर्गस्य कथासारः - श्रीमदक्षोभ्यमुनिवरेणाहूतः सः अश्वारूढः स्ववरूथिनीं तत्रैवापहाय कल्पवृक्षोपमस्य अक्षोभ्यतीर्थस्य पादाववाप्य भक्त्या ननाम । यतितल्लजः प्रणमन्तं तं नरश्रेष्ठमवलोक्य मुमोद चारूक्तिभिः तं सममानयच्च । स्वप्नसूचनां स्मरद्भिः श्रीपादैः अभाणि हे पुरुषश्रेष्ठ श्रीरामः तव हस्ताभ्यां पूजामीहते । तव कीर्तिः दिक्षु वितता भविष्यति । अतः कामितार्थकरं रामदेवप्रियं श्रीमदाचार्याणां पूर्णानुग्रहास्पदं संन्यासाश्रमं स्वीकुरुष्व इति । सनरश्रेष्ठः पुनः यतिं प्रणम्य कलिताञ्जलिर्भूत्वा उवाच क्वाहमनधिकारी, क्व रामार्चिकाः? किं ब्रवीमि ? अतिशयेनानधिकारी अहं कथं रामपूजार्हः ? इत्यपृच्छत् । पुनः संन्यासं स्वीकुर्विति उक्तः सः यद्येवं तर्हि यद्भवते रोचते तदेव स्यात् । यदि मम स्वप्नेऽपि एतद्विषयकसूचना लप्स्यते तर्हि यथा भवन्तः आज्ञापयन्ति ततहैव करिष्यामि इति अवोचत् । स्वसैन्यं प्रति अहमत्रैव निवसामीत्युक्त्वा सैन्यं ततरैव निधाय श्रीपादानामाज्ञानुसारं रामाय निवेदितमन्नं भुङ्क्त्वा तत्रावसत् । स्वप्ने महत्वं वीक्ष्य नानासम्पच्छाली अपि धैर्यशाली भूत्वा लौकिक आशाः त्यक्त्वा त्यक्त्वा हरावेव मनः न्यधत्त । गुरोराज्ञानुसारं संन्यासाश्रमपूर्वभाविनीं दीक्षां आह्नीकादिकान् स्वसैन्यं कथञ्चित् वञ्चयित्वा समापयत् । अथ यतिराट् तं पारमहंस्यमाश्रमं दत्वा परं ब्रह्म उपादिशत् । तस्य आकलिताञ्जलेः शिरसि स्वकरकमलं निधाय व्यलसत् । अनन्तवेदशास्त्रैः पूरितहृदयस्य पूर्णप्रज्ञस्य शास्त्रगृहस्य कुवादिचोरेभ्यः रक्षणाय दण्डं धृत्वा स्वगुरोराज्ञानुसारं संन्यासं स्वीचकार । जयतीर्थ इति अस्य मुनिवरस्य नाम चकार । एतदन्वर्थनाम एवाभवत् । सर्वेषां जयकारी टीकाव्याख्यानादिरचनया अशेषविद्वज्जनानां उत्कृष्टपात्रं भूत्वा जयतीर्थ इति नाम अन्वर्थञ्चकार । जयकरं तीर्थं शास्त्रं यस्य सः इति विग्रहः । अत्यन्तरक्तं काषायवस्त्ररूपेण स्वानुरागं गुरुः अक्षोभ्यतीर्थः अदात् । आभरणादिरहितोऽपि जयतीर्थमुनिः स्वतेजसा सूर्य इवाशोभत । गुरोरञ्जसा अत्यन्तश्रेष्ठसंन्यासाश्रमस्वीकारेण धन्योऽस्मीति मनसा चिन्तयन् गुरुं साष्टाङ्गं प्राणमत् । सम्पद्युते मातापितृबान्धवे विद्यमानेऽपि पत्निद्वये विद्यमानेऽपि तारुण्ये विद्यमानेऽपि तत्र विरक्तिं प्राप्य संन्यासं स्वीचकार । एषा एव विरक्तिर्ननु ?[4] तदनु एतज्ज्ञात्वा आश्चर्यचकिताः तस्य सैनिकाः गृहं

---

[4] अत्र सुमध्वविजयस्य "प्रेष्ठो न रामस्य....ननु सा विरक्तिः"(१, २४) इति श्लोकस्य भावः वर्तते ।

गत्वा तस्य पितरं वृत्तान्तमकथयन् । सः रोषाग्निना युतः अक्षोभ्यमुनिमाक्षेपितुं तत्र आगच्छत् । अत्यन्तदुःखितहृदयः गलितज्ञानः स अक्षोभ्यमुनिमनिन्दत् त्वं प्रसभं मम पुत्राय संन्यासाश्रमं दत्तवानिति । तदा जयतीर्थमुनिः प्रसभं न दत्तं स्वप्ने पञ्चजनाः कोमलवाण्या संन्यासाश्रमस्वीकारेण कल्याणं ते भविष्यति अन्यथा अनर्थः स्यादिति अवोचन् । अतः अहमेव स्वीकृतवानित्यवदत् । तथापि पिता अन्यायः कृतः इति पुत्रं गृहं नीत्वा शय्यागृहे सम्प्रेष्य तत्पत्नीमपि प्रेषयामास । तदा भीषणसर्पाकारेण स्वात्मानं प्रदर्शयित्वा संन्यास एव तस्य उचितः इति सिद्धमकरोत् । पिता स्वप्ने सूचनां प्राप्य पुत्रविरहेण तप्तोऽपि अक्षोभ्यमुनिं क्षमां अयाचत् ।

चतुर्थसर्गस्य कथासारः - श्रिमदक्षोभ्यमुनेः गुरूपसत्तिं मध्वः वेदव्यासस्य इवाकरोत् । गुर्वनुग्रहेण परमपाण्डित्यं प्राप्य दुर्वादिविजये अप्रतिमोऽभूत् । तेन गुरुः भृशमानन्द । दिग्विजयकाले स्वपादरजोभिः भक्तान् पवित्रीकृतवान्, स्वप्रवचनैः दुर्वादिभयङ्करोऽभूत् । कलियुगे जना अल्पबुद्धयः । अतः आननदतीर्थाणां गभीरार्थयुतान् ग्रन्थानवगन्तुं न शक्नुवन्तीति श्रीमदाचार्याणां शिष्याः चिन्तिताः आसन् । तदा श्रीमदाचार्यः मम ग्रन्थानां व्याख्यां करोति एष गोराडिति अभयं प्रादात् । स गोराडेव जयतीर्थमुनिरूपेण सर्वमूलग्रन्थानां टीकाः अरचयत् । कदाचित् भीमरथीतटे सन्ध्यावलीनामके ग्रामे हरिवाय्वोः प्रीतये तपस्तेपे । प्रसन्ना सरस्वती एततस्पर्शेन लिखितस्य ग्रन्थस्य शोधनं कुरु इति घण्टां क्रमुकञ्च ददौ । ततः यरगोलगुहामगच्छत् । तत्र पूर्वं शङ्खनामकमुनिः किरातमुपादिशत् । तत्र गुरोः अक्षोभ्यमुनेः आलिङ्गनरूपाशीर्वादं प्राप्य माध्वकृतेः प्रवचनं कृत्वा कागिणीतीरे कस्मिंश्चित् महाबिले गुहायामवसत् । मार्गशीर्षकृष्णपञ्चम्यां श्रीमदक्षोभ्यतीर्थमुनिः श्रीरामपादसंस्मरणेन वृन्दावनस्थोऽभूत् ।

पञ्चमसर्गस्य कथासारः - यरगोळगुहायां नैकाः टीकाः व्यरचि श्रीजयतीर्थमुनिना । गुरुकरुणासूत्रेण आवृतः धीमन्दरपर्वतः । तेन जयतीर्थदुग्धाम्बुधिः यादा मथितः तदा तत्त्वप्रकाशिकालक्ष्मीः, प्रमेयदीपिकाचन्द्रः, श्रीमन्न्यायसुधा, न्यायदीपिकाकऔस्तुभः,

न्यायकल्पलतादिअप्सरसः, मायावादिखण्डनाद्यायुधाः, ऋग्भाष्यटीका ऐरावतः, न्यायविवरणटिका उच्चैश्रवः, कर्मनिर्णयटिकावज्रायुधः, विष्णुतत्त्वविनिर्णयटिकापारिजातः, षट्पर्श्नोपनिषद् टीकाकल्पवृक्षः, ईशावास्योपनिषत् टीकासन्तानवृक्षः , प्रमाणपद्धतिमन्दारः, वादवालिहरिचन्दनः एवं बहुविध ग्रन्थाः जाताः । विद्यारण्ययतिः जयतीर्थमुनेः विद्वत्पूर्णाद्भुतटीकाग्रन्थान् दृष्ट्वा प्राहर्षत् । अनेन तत्कालीन समाजे विद्यापक्षपातः उत्तुङ्गशिखरमस्पर्शदिति ज्ञायते । गजारोहणादिना विद्यारण्यः जयतीर्थमुनिं सममानयत् । केनचित् राज्ञा सरोवरनिर्माणं कारयित्वा अद्यापि तत्रस्थान् अनुगृह्णाति श्रीमज्जयतीर्थश्रीपादः । श्रीविद्याधिराजतीर्थाय साम्राज्यमादिशत् । आषाढकृष्णपञ्चम्यां श्रीरामपादसेवासक्ताः वृन्दावनस्था अभूवन् ।

आलङ्कारिकदृष्ट्या अध्ययनम्

काव्यारम्भे गुरुनमनं कुर्वन् कविः गुरोर्नाम न गृह्णीयात् शिष्यो भार्या पतेरपि इति सूत्रभाष्योद्धृतप्रमाणवचनात् पितृपादस्य शेषाचार्यस्य नाम 'श्रीकान्तकान्तासननामवन्तम्' इति चमत्कारपूर्वकं उल्लिखति ।

वेदव्यासरूपवर्णनम् - भगवतः वेदव्यासरूपवर्णनं तथा बदरीक्षेत्रस्य निसर्गसौन्दर्यवर्णञ्च हृन्मनोहारि वर्तते । शाखोपशाखपल्लवपर्णैर्युत-नैकवृक्षाणां मध्ये पिकशुककोकिलादि-पक्षिभिस्सहिते तस्मिन् प्रदेशे , प्रत्येकऋतुषु जायमानफलपुष्पादिभिः युगपत् संयुतानां वृक्षाणां छायया सूर्यस्य प्रकाशः हृत आसीत् । फलपत्रसंयुतस्य सुविद्रुमस्य बदरीवृक्षस्य अधः दर्पणवत् विस्तीर्णायां सुन्दरायां वेदिकायां उपस्थितः श्रीवेदव्यासः । विचित्रासने योगमुद्रायां स्थितं वज्राङ्कुशरेखायुत-रक्तवर्णपादतलयुतं , लक्ष्म्या सेव्यमानजङ्घम्, उत्तमजानुभ्यां सहितं, अनुपमकटौ मौञ्जीबन्धनयुतं, वलित्रयसहितनाभियुतं, तनूदरं , श्रेष्टवक्षस्थलयुतं, शङ्खवत्कण्ठं, बृहद्भुजं, पीवरांसं, अनन्तवेदानुद्गिरन्तं, रक्तकमलवच्छोभायमान्- अभयमुद्रायुतं, कुन्दवत् धवलदन्तोपेतं, सुवदनं, कमलनेत्रं मनोहरकपोलयुग्मसहितं, तिलकसहितललाटं, सुष्टुभ्रूविलसितमन्दस्मितवदनं, शिरसि लसत् जटाकलापं, श्यामलवर्णं, एणचर्मधरं, सुगुणं , दोषरहितं, तत्रत्यानां ऋषीणां प्रश्नानां

उत्तरं ददन्तं, सुरमुनीन्द्रैः सेवितं, महाभारतस्य ब्रह्मसूत्राणाञ्च कर्तारमीशं देवानां देवं वेदव्यासं श्रीमध्वः ददर्श इति वर्णयति कविः ।

तृतीयसर्गः नानावृत्तमयः इन्द्रवज्रोपेन्द्रवज्रा- भुजङ्गप्रायातः, पथ्यावक्त्र,विद्युन्माला, स्रग्विणी, प्रमिताक्षरा, प्रहर्षिणी, प्रामाणिका, शालिनी, पुष्पिताग्रा, रुचिरा, मालिनी, स्वागतेत्यादिवृत्तैः निबद्धाः श्लोकाः कवेः काव्यरचनाचातुर्याः प्रतिबिम्बसदृशाः

अर्थालङ्काराः

<u>श्लेषालङ्कारः</u>

अक्षोभ्यतीर्थ उरुहंसकुलावतंसः । संक्षोभिताखिलकुपक्षिगणोऽञ्जसा सः ॥
अक्षीणपक्ष इह कौ दशबोधदासः । प्रक्षीणकाममुखदोषकुलो ललास ॥[5]

परमहंसाश्रमश्रेष्ठः श्रीमदक्षोभ्यतीर्थः कुपक्षिगणं कुवादिगणं संक्षोभितं कृत्वा स्वपक्षे स्वसिद्धान्ते माध्वसिद्धान्ते अक्षीणतां प्रदर्श्य मध्वदासः कामादिदोषरहितः भुवि ललास इति अक्षोभ्यतीर्थपक्षे । हंसपक्षे तु हंसश्रेष्ठः काकादिकुपक्षिगणं संक्षोभितं कृत्वा अक्षीणपक्षोपेतः भावीचतुर्मुखस्य वाहनत्वेन दासः दोषरहितः भुवि ललासेति । क्ष व्यञ्जनस्य आवर्तनेन वृत्त्यनुप्रासः ।

<u>अर्थान्तरन्यासालङ्कारः</u>

समिद्धरोषातिशयाशुशुक्षणिः । सोऽक्षोभ्यतीर्थेन्द्रतपोम्बुधिं ततः ॥
दग्धुं समायात्किलसेनया ह्यमा शोकाभिभूतस्य कुतो विवेकिता ॥[6]

सः धोण्डोपन्थस्य पिता रोषाग्निना अक्षोभ्यतीर्थतपोसमुद्रं दग्धुमिव तत्र समायातः । शोकाभिभूतस्य विवेकिता कुत्र भवतीति । अत्र ताद्रूप्यस्य तथा अर्थान्तरन्यासस्य च प्रयोगः । शोकाभिभूतस्य विवेकिता कुत्र इति सामान्योक्तिना पित्रा क्रियमाणं कार्यमपि

---

[5]जयतीर्थविजयः– २ स, १ श्लो

[6] जयतीर्थविजयः– ३ स, २६ श्लो

अविवेकस्य परमावधिरिति कविः । अग्निना अम्बुधिः दह्यते किम् ? एवं विवेकशून्यस्य पितुः प्रयत्नोऽपि व्यर्थः इति ध्वनिः । उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोरिति लक्षणात् अर्थान्तरन्यासः ।

<u>**ताद्रूप्यरूपकालङ्कारः**</u>

सुखमुनिजनसाधुधेनुवृन्दावनमनसेव बभार दण्डमग्र्यम् ।
कुमतविपिनगोत्रचारिवादिव्रजकुमृगावलिभीषकं स एषः ॥[7]

श्रीमदानन्दतीर्थाणां शास्त्रमनुसरन्तः निजजनाः साधुधेनुवत् सौम्याः । तान् रक्षितुमुत्सुकः कुमतारण्ये चरन् अयं जयतीर्थमुनिः कुवादिमृगावलिभीषकं दण्डं धृतवान् । अत्र निजजनानां तथा धेनोः सादृश्यमुक्तं विषयिविषययोः ताद्रूप्यमुक्तत्वात् ताद्रूप्यरूपकालङ्कारः । तथैव कुवादिमृग इत्यत्रापि ज्ञेयः ।

अत्र अरण्ये चरन्तैः व्याघ्रादिभिः गां रक्षतीति भावः स्फुटः । अनेन कृष्णसादृश्यमुक्तम् । कृष्णोऽपि गोपालकः जयतीर्थमुनिस्तु गो अर्थात् शास्त्राणां पालकः इति ध्वन्यते ।

<u>**विभावनालङ्कारः**</u>

उदितमिहिरधामा सान्ध्यजीमूतवासाः । विलसितकटिसूत्राधारकौपीनशाली ॥
पितृमुनिसुरसद्माषाढपाणिस्तदाभा द्विवरवसनसूनाकल्पकोऽप्येष चित्रम् ॥[8]

जयतीर्थमुनिवरः विना वस्त्राभरणपुष्पादिभिः केवलं कटिसूत्रदण्डकौपीनधारी उद्यत्सूर्यस्य एवं सन्ध्याकालमेघस्य आरुण्येन शुशोभ । कारणं विना कार्योत्पत्तिरूपविभावनालङ्कारः । विभावना विनापि स्यात् कारणं कार्य जन्म चेत् । अप्यलाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम् ॥ इति लक्षणात् । आभरणादयः पुरुषस्य कान्तिवर्धकाः । किन्तु

---

[7] जयतीर्थविजयः– २ स, १८ श्लो
[8] जयतीर्थविजयः– ३ स, २१ श्लो

आभरणादिविभूषणानामभावेऽपि मुनिवरः शुशोभ इत्यनेन कारणं विना कर्यस्य जन्म उक्तत्वात् विभावनालङ्कारः ।

<u>उत्प्रेक्षोल्लासालङ्कारौ</u>

नदीवर्णनम् - द्वतीयसर्गे भीमरथीनदीवर्णनं मनोज्ञम् ।

श्रीभीमरथ्यभिमुखप्रसरत्तरङ्गहस्तैस्स्वघोषवचसाऽऽह्वायतीव रेजे ।

आश्वाहि मज्ज मयि रामसमर्चनेन । मां त्वं पुनीहि यतिपेति तपस्विराजम् ॥[9]

मुक्ताफलोपमपृषत्प्रकरोपहारं । श्रीभीमरथ्युरुतरङ्गकरैस्तदा सा ॥

अक्षोभ्यतीर्थयतिपार्चितदेवतार्चावृन्दाग्रतोऽर्पितवतीव समुल्ललास ॥

श्रीपुण्डरीकनयनं वरपाण्डुरङ्गं । सत्पुण्डरीकवरदं निजतीरवासम् ॥

स्तोतीवघोषवचसा परिनृत्यतीव योल्लोलकैरतिचलैर्हिसरित्सु धन्या ॥[10]

त्रिभिश्श्लोकैः नदीवर्णनं कृतम् । सा भीमरथी स्वतरङ्गहस्तैः यतिवरं मयि मज्जनं कृत्वा रामार्चनेन च मां पुनीतां कुरु इति आह्वयतीव रेजे इति यतिवरस्य पावित्र्यादि गुणैः स्वस्यामपि गुणोत्कर्षः उक्त इत्यनेन अन्यगुणेन तदन्यस्य गुणोत्पत्तिवर्णनरूपः उल्लासालङ्कारः । पुनः मुक्ताफलोपमबिन्दुभिः उरुतरङ्गैश्च अक्षोभ्यतीर्थकरार्चितप्रतिमानां उपहार इव समर्पयत् इत्यत्र नद्याः स्वाभाविक जलबिन्दोः सेचनादीन् उपहार इति कल्पितत्वात् उत्प्रेक्षालङ्कारः । सा नदी स्वघोषवचसा पुण्डरीकनयनं, पुण्डरीकवरदं पाण्डुरङ्गं स्तौतीव परिनृत्यतीव भातीति उत्प्रेक्षयति कविः ।

काव्येऽस्मिन् बहुत्र सुमध्वविजयमहाकाव्यस्य सादृश्यं दृश्यते । यथा प्रथमसर्गस्य द्वितीयश्लोकः

यत्तीर्थसेवनतोऽभवार्हाः सर्वेऽभवा वैभवतो वसन्ति ।

सदाभवं प्राप्यहरिं समीरं आनन्दतीर्थं सततं भजेऽहम् ॥

श्लोकोऽयं - **महानन्दतीर्थस्य ये भाष्यभावं मनोवाग्भिरावर्तयन्ते स्वशक्त्या ।**

---

[9] जयतीर्थविजयः – २ स, २६ श्लो

[10] जयतीर्थविजयः – २ स, २७,२८ श्लो

सुराद्या नरान्ता मुकुन्दप्रसादादिमं मोक्षमेते भजन्ते सदेति ॥ [11]

इति सुमध्वविजयस्य भावमेव निरूपयति ।

ऐतिहासिकदृष्ट्या अध्ययनम्

प्रथमसर्गे श्रीमदाचार्याणां शोभनभट्टेन सह मेलनं कथितम् । श्लोकत्रयेण गोदावरीतीरे शोभनभट्टनामकविप्रं वादे जित्वा शिष्यरूपेन स्वीचकार, तस्य परिचर्यया सन्तुष्टः तं विद्यामुपादिश्य पद्मनाभतीर्थाभिधा वेदान्तसाम्राज्येऽभ्यषिञ्चदित्यादि इतिहासः निरूपितः[12] । तथा श्रीमदाचार्यारब्धा परम्परा अपि उल्लिखिता । पद्मनाभतीर्थे साम्राज्यं संस्थाप्य श्रीमदाचार्याः बदरिकाश्रमं विवेश । ततः नरहरितीर्थः वेदान्तराज्यमपालयत् । ततः माधवतीर्थः ततः श्रीमदक्षोभ्यतीर्थः वेदान्तराज्येऽभिषिक्तः [13]।

द्वितीयसर्गे रङ्गण्णधामण्णनामक विप्रयोः वृत्तान्तः वर्णितः[14] । तौ द्विजवरौ ईर्ष्यया कलहं कृत्वा ब्रह्महत्यादोषं प्राप्य सर्वैः बहिष्कृतौ[15] । तदा तावुभौअक्षोभ्यतीर्थगुरुवरं समुपेत्य नत्वा शापानुग्रहशक्ताः भवन्तः अस्माकं दुरितस्य परिहारं वद्न्विति प्रार्थयामासुः । तौ परीक्षितुमिच्छुः शास्त्रेषु देहान्तात् कोऽप्यन्योपायः नोक्तः अतः देहान्तः एव अस्य निष्कृतिरिति उवाच । तच्छ्रुत्वा तौ तत्रत्यमत्युन्नतवृक्षमेकमारुह्य देहान्तं कर्तुमुद्युक्तौ । वृक्षस्योपरि स्थित्वा आज्ञार्थं ययाचतुः । सन्तुष्टः मुनिवरः युवाभ्यां दृढसङ्कल्पं परीक्षितुमेवमाज्ञापितम् । इदानीमवरुह्य आगच्छातामिति आज्ञापयामास । शापानुग्रहशक्तः श्रीमदक्षोभ्यतीर्थः शङ्खोदकं संप्रोक्ष्य ब्रह्महत्यादोषात् तौ मोचयामास । किन्तु केचन अल्पज्ञाः शङ्खोदकप्रोक्षणमात्रेण ब्रह्महत्यादोषः कथं निवारित इति

---

[11] सुमध्वविजयः– ११ स, ७९ श्लो

[11] जयतीर्थविजयः– १ स, ४०,४१ श्लो

[12] सुमध्वविजयः– ११ स, ७९ श्लो

[12] जयतीर्थविजयः– १ स, ४०,४१ श्लो

[13]जयतीर्थविजयः– १ स, ४७,५० श्लो

[14] जयतीर्थविजयः– २ स, २–१६ श्लो

[15] श्रीव्यासतीर्थकृतजयतीर्थविजयेऽपि अस्य वृत्तान्तस्य उल्लेखो वर्तते ।

उपहासपूर्वकं तौ निन्दयामासुः । ताभ्यां एतां वार्तां श्रुत्वा मनिवरः सर्वेषां समक्षमे महिमानं दर्शयितुं दध्यौ । पामरजनान् आह्वापयित्वा मम कार्ये यदि सन्देहः तर्हि रजकालयात् शुभ्रं वस्त्रं समानयत इति आज्ञापयामास । जनाः रजकालयात् शुभ्रं वस्त्रमानीय भल्लातकस्य तैलस्य (केरेण्णे इति कन्नडभाषया उच्यते) विलिम्पनेन मलिनं वितेनुः । जनाः कञ्चित् द्विजवरं भल्लातकतैलमयं नीलपटं सर्वतीर्थेषु निमज्जयित्वा पुनः शुभ्रं कृत्वा आनेतुं प्रेषयामासुः । सः तं नीलतमं पटं सर्वतीर्थेषु प्रक्षालयित्वाऽपि तस्य मालिन्यं नैल्यं नापगतम् । सं तं नीलपटं समदर्शयत् । तदा अक्षोभ्यतीर्थमुनिवरः शङ्खोदकप्रोक्षणेन तं नीलपटं पूर्ववत् परमशुभ्रं चक्रे । प्रत्यक्षसिद्धं महामहिम्नं दृष्ट्वा सर्वे जनाः क्षाम्यन्त्विति मुनिवरं प्रार्थयामासुः । तथा तौ द्विजवरौ दोषमुक्ताविति स्वीचक्रुः । वृत्तान्तस्यास्य उल्लेखः शासनेष्वपि लभ्यते शा. श.१२५९(१३३७ ए, डि)[16] ।

अक्षोभ्यतीर्थमुनिना विद्यारण्यमुनेः पराजयः नैकेषु विशिष्टाद्वैतग्रन्थेषु उल्लिखितः । तत्त्ववादियान अक्षोभ्यमुनिक्कुं मायावादियान विद्यारण्यमुनिक्कुं वेदान्ततिलवादं प्रवृत्तमाह । इवरोहळोडेय अभिप्रायत्तियं राजपत्रिका मूलमाह । वेदान्तदेशिकर सन्निधिक्के अनुधवै । यथार्थत्तै अरिं दुहुरक्कु वेणुमन्नु अनुप्पमैक्क वेदान्तदेशिकर

असिना तत्त्वमसिना परजीवप्रभेदिना ।
विद्यारण्यमहारण्यमक्षोभ्यमुनिरच्छिनत् ।
इति पद्येन विद्योतयामास । इति ब्रह्मतन्त्रस्वतन्त्रजीयर(१३९४-१४०६) कृत-गुरुपरम्पराप्रभावाख्ये विशिष्टाद्वैतग्रन्थे ।

कदाचिदक्षोभ्यमुनेश्च विद्यारण्यस्य जातं बहुलं विवादं ।
विलिख्य भूपो विबुधाय यस्मै सम्प्रेषयामास तमाश्रयेऽहम् ॥
तत्त्वमसिनासिना तं विद्यारण्यं मुनिस्तदक्षोभ्यः ।
अच्छिनदित्यवदद्यस्तं सेवे तत्त्वनिर्णये चतुरम् ॥- इति दोड्डय्याचार्यकृत-वेदान्तदेशिकवैभवाख्याग्रन्थे ।

---

[16] तत्त्ववादः १९६८ नवेम्बर्, डिसेम्बर् मासस्य

अशिना तत्त्वमसिना पाजीवप्रभेदिना.........॥ इति पद्येन विद्योतयामास । वाणीमादाय तां सूरेः क्षोणीपरिवृढप्रियाः शिरसा क्लप्तनतयः तरसा स्वां पुरीं ययुः । (५-५३)

अथ वसुधातलजिदाचार्यसविधात् आयातैः तैः विनिवेदितं कथावहजयापजयसूचकं कर्णेजपं श्लोकमाकर्ण्य जृम्भितहर्षः स्तम्भितविपक्षपक्षं अक्षोभ्यमुनिं मध्येसभं भृशं प्रशंस ।
- इति कवितार्किकसिंह- वेदान्ताचार्यक्त- वेदान्तदेशिकाचार्यविजयचम्पूग्रन्थे ।

सैद्धान्तिकदृष्ट्याऽध्ययनम्

मङ्गलाचरणश्लोके लक्ष्म्याः देशतः कालतः व्याप्तत्त्वं अवियोगश्च ज्ञेयौ । हरेः स्वातन्त्र्यमपि अत्र प्रतिपादितम् सदव्याजकृपाकटाक्षः इत्यस्मात् प्रयोजनराहित्येऽपि भक्तान् कृपाकटाक्षादिभिः अनुग्रह्णातीति भगवतः स्वातन्त्र्यमुक्तम् [17]। भक्ताभीष्टप्रदानेन भगवतः क्लेशादयः सन्ति किमित्युक्ते लीलया सृष्ट्यादिकार्याणि करोतीति 'अनन्तवीर्यामितविक्रमस्त्वम्'[18] इत्यादि गीतावाक्यानि प्रमाणमत्र ।

५.२. कट्टीकेशवाचार्याणां देशकालकृतीनां परिचयः –

कविवर्यः कर्णाटकराज्यस्य बादामीक्षेत्रे दशोत्तरेकोनविंशतिशततमे जून् मासस्य अष्टमे दिनाङ्के श्रीनिवासाचार्य-सुभद्राबायी दम्पत्योः शिशुत्वेन जन्म लेभे । पितृपादादेव साहित्य-व्याकरण शास्त्रानधीतवान् न्याय-वेदान्तादि शास्त्रांश्च मलगीवेदव्यासाचार्यमुखेन । बाम्बेविश्वविद्यालयतः अभियन्तृपदवीं प्राप्य बागलकोटमण्डले[1] अभियन्तारूपेण कार्यमकरोत् । श्रीसत्यप्रमोदतीर्थाणां परमशिष्योऽयं नैकग्रन्थरचनेन गुरुं तोषयामास । न्यायसुधामण्दनप्रकाशः, श्रीजयतीर्थचरित्रे, श्रीमज्जयतीर्थसुप्रभातम्, श्रीमट्टीकाकृत्पादगद्यम्, श्रीरघूत्तमतीर्थस्तोत्रम्, श्रीसत्यध्यानपादसेवा, श्रीवादिराजमहात्मे, श्रीसत्यबोधतीर्थस्तोत्रम्, श्रीसत्यध्यानविजयः, श्रीसत्याभिज्ञविजयः, श्रीसत्यप्रमोदविजयः,

---

[17]न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानवाप्तमव्याप्तम्...... इति गीतायाम्–३ अ, २२ श्लो

[18] भगवद्गीता– ११ अ ४० श्लो

गुरुवारद हाडुगळु, श्रीमदुत्तरादिमठपरम्परेय हाडुगळु इत्यादि संस्कृत तथा कन्नड भाषया विरचिताः कृतयः अस्य प्रतिभां प्रदर्शयन्त्यः अद्यापि सहृदयानां भक्तानां मनांसि तोषयन्ति उद्बोधयन्ति च ।

५.३. सत्यध्यानविजय-लघुकाव्यम्

माध्वसिद्धान्तसाम्राज्यसिंहासने विराजितेषु यतिपुङ्गवेषु श्रीसत्यध्यानतीर्थयतितल्लजोऽपि अन्यतमः । अष्टादशे शतके मध्वमतसाम्राज्याधिपत्यम् स्वीकृत्य दुर्वादिनां सिंहस्वप्नोऽभूत् । वेदन्तज्योतिष्येत्यादिसर्वशास्त्रेषु अनितरसाधारणपटुत्वमस्य काव्येऽस्मिन् सुष्टु वर्णितम् । कट्टिकेशवाचार्यविरचिते सत्यध्यानविजयाख्ये लघुकाव्ये यतिवरस्य जननादिवृत्तान्ताः तथा परवादिनिरासः दिग्विजयाश्च अत्र वर्णिताः ।

प्रथमतया अस्य काव्यस्य कथासारविषये किञ्चित् पश्यामः ।

प्रथमसर्गे मङ्गलाचरणं कुर्वन् कविः स्वकुलस्वामिनं रङ्गनाथं स्तौति । तत्पश्चात् मध्वमुनिं नत्वा कथानायकं सत्यध्यानतीर्थयतिवर्यञ्च प्रणम्य काव्यारम्भं करोति । कण्ठपल्लि इति ग्रामे द्वैतद्युमणिकारस्य श्रीनाथाचार्यस्य (श्रीपत्याचार्यस्य) दौहित्रवंशे जयरामनामा कश्चन विप्रोऽवसत् । तस्य भार्या कृष्णाऽभिधा साध्वी धर्मेषु सहायभूता आसीत् । गुरोः प्रसादात् सा गर्भवती बभूव । शके चतुर्नवत्युत्तर -सप्तदशशततमे १७९४ आङ्गिरनामसंवत्सरस्य मार्गशीर्षनवम्यां भौमवासरे शोभने मुहूर्ते बालचन्द्रमसो जननमभवत् । पिता आसेतु प्रतीपान् निर्जित्य धर्मसेतुं असौ पास्यतीति तस्य बालस्य नाम सेतुराम इति कृतवान् । लोकोत्तरप्रतिभासम्पन्नस्य तस्य बालस्य उपनयनमहोत्सवेन पिता तथा बन्धवः आमोदयन् । दैवानुग्रहोपेतस्य बालकस्य विद्याप्रारम्भोऽभूत् । अल्पेनैव कालेन स विद्यां वशीकृतवान् । षट्शास्त्रविशारदः एषः परस्त्रीविमुखः न्यायसुधारतः कृष्णे निहितमनाः चन्द्रमपि जिगाय ।

अथ जयरामार्यः संन्यासाश्रमं स्वीकृत्य सत्यधीरतीर्थः इति प्रथितो बभूव । तदाप्रभृति सेतुरामोऽपि मठे एव उवास । शस्त्रार्थविलोडने स्वयं सहाय्यो भूत्वा युक्त्या विरोधिनः निरस्य द्विजेभ्यः ज्ञानामृतं अयच्छत् । शस्त्रार्थबोधने अस्य वाङ्गहिमा अध्ययने श्रद्धा भाषारीतिसंसिद्धिवृत्तेत्यादिविषयेषु चातुर्यं शिष्यवात्सल्येत्यादि गुणाः अत्यन्तश्लाघनीयाः । सत्यधीरतीर्थः गङ्गूरुवंशस्थं जयाभिधं वेदान्तसाम्राज्ये अभिषिच्य सत्यज्ञानतीर्थ इति आश्रमनाम चकार ।

द्वितीयसर्गस्य कथासारः- मळखेडक्षेत्रे श्रीजयतीर्थसन्निधौ ज्ञानसत्रस्यायोजनं कृतम् । तत्र मध्वमतालोडनेन मथितेऽग्नौ गुरुचरणाज्येन प्रदीप्ते भ्रमसंशयादितृणान् ध्वंसयति वैश्वानरे बुधजनाः स्वपापान् जहुवुः इति सभायाः श्रेष्ठतां वर्णयति कविः । तत्त्वविमर्शेन प्रसन्नात् गुरुकरपद्मात् दक्षिणाः अमृतमिव स्रवन्ति स्म । एवमेषा सभा देवेन्द्रसभामपि पराजित्य अमृतत्त्वहेतुकमभूदिति सभायाः महिमानं वर्णयति कविः । एवं प्रकारेण श्रीसत्यधीरतीर्थयतिवरः सत्यज्ञानसेतुरामार्याभ्यां सह यथा भीमसेनार्जुनाभ्यां साकं धर्मराजः यथा कृष्णबलरामाभ्यां सह वसुदेवः तथैव शुशुभे ।

मळखेडतः आतकूरुग्रामं प्राप्तवान् स यतिवरः । ततः पश्चात् वेङ्कटाद्रिं रौप्यपीठं च जिगमिषुः वृद्धाप्येन गन्तुं न प्राभवत् । स्वशिष्यं क्षेत्रद्वयस्य यात्रां कर्तुमादिदेश । स सत्यधीरयतिश्रेष्ठः वृन्दावनस्थोऽभूत् [19]।

गुरोराज्ञानुसारेण वेङ्कटाद्रिं गतः स सत्यज्ञानयतिवरः मूलसीतारामप्रतिमां स्वयं धृत्वा अणुभाष्यं पठन् पादचारी अद्रिमारुरोह । तत्र भगवद्दर्शनोत्कण्ठं यतिवरं अवारयन् जयविजयौ सनकादीनिव । तदा स्वभक्तनिन्दामसहमानः श्रीनिवासः अर्चकैरर्पितं तिलकं प्रयत्नशतेनापि न धृतवान् । बहुवारं यत्नतोऽपि यदा न दध्रे तदा अर्चकाः कोऽप्यपराधः कृतः इति मत्वा तस्मिन् पृच्छति सति यतिवर एषः यदि मम प्रवेशः दीयते तर्हि श्रीनिवासः तिलकं धरतीति उक्तवान् । तथैव तस्य प्रवेशानन्तरं श्रीनिवासः तिलकं धृतवान् [20]। अनेन

[19] आतकूरुप्रदेशे, ज्येष्ठकृष्णनवमी
[20] कन्नडभाषायां दासरपद इति गीतायां एषा घटना निरूपिता

वृत्तान्तेन तारतम्यसहितं स्वसर्वोत्तमत्त्वप्रतिपादकाः मम तिलकवत् प्रधानाः इति निजहार्दं आविश्चकार भगवान् वेङ्कटेशः । तिलकधारणेन वेङ्कटेशः वर्ण- त्रयं आवेदयत् । जीवपरमात्मनोः भेदः , स्वमुखादुत्पन्नेषु विप्रेषु संन्यासिनां तिलकत्वं प्राधान्यं तथा अतिथिसत्कारे गृहिधर्ममावेदयत् ।

ततः वेङ्कटाद्रेः आगत्य तत्र तत्र पाठशालासु पण्डितान् न्ययुङ्क्त । कदाचित् पूजाकाले आगतं सर्पं दृष्ट्वाऽपि अविकारचित्तः शेषशायिनं श्रीरामदेवं पूजयामास । कदाचित् मुद्राधारणसमये स्त्रियमेकां दृष्ट्वा त्वमशुचिरित्युक्तवान् । पश्चात् तथैवाभूदिति व्तान्तेन यतिवर एषः त्रिकालज्ञानी इति ज्ञायते । कश्चन अधिकारी व्रतीन्द्रमेनं मन्दधीरिति अनिन्दयत् । सपदि स रोगी भूत्वा मृत्युमेवाप ।

कोरवारप्रदेशे यत्प्राणदेवस्य सेवामकरोत् तत्सेवां अखिलजनसमक्षं स्वीचकार । ततः स रौप्यपीठं जगाम । तत्रत्याः योग्यमादरं न विदधुः तदा कृष्णरथोत्सवसमये रथः गजैराकृष्यमाणोऽपि लेशमपि नाचलत् । यदा सत्यज्ञानयतिवरः कृष्णं ययाचे तदा रथः चालितोऽभूत् । अनेन तत्रत्याः संन्यासिनः पश्चात्तापेन अपगतासूयाः बभूवुः । स कृष्णपादे प्रचुरतरं धनं समर्प्य पाजकक्षेत्रं गत्वा मध्वं नतवान् । एवं अल्पकाल एव अपूर्वसिद्धिं प्राप्तवान् श्रीसत्यधीरतीर्थयतिश्रेष्ठः रामस्याज्ञां प्राप्य सेतुरामार्यं वेदान्तसाम्राज्यपीठे न्ययुङ्क्त ।

तृतीयसर्गस्य कथासारः- सज्ञानतीर्थकरकमलसञ्जातस्य सेतुरामार्यस्य आश्रमनाम सत्यध्यानतीर्थ इति अभूत् । सदा सर्वोत्तमस्य हरेः मुखाङ्गानि आनन्देन ध्यायन्नेषः अन्वर्थनामाऽभूत् ।

राजमहेन्द्रीपुरे सत्यज्ञानतीर्थः वृन्दावनस्थोऽभूत्[21] । तत्समये द्विजेभ्यः द्रव्यराशिं यच्छन्तं तं दृष्टुं स्वयं सुरेशादयः मेघपथमाययुः ।

---

[21] माघशुक्लएकादश्यां

ततः पश्चात् वारणासीं गत्वा तत्र मायामतशून्यमतयोः भेदो नास्तीत्यगर्जयत् । शिवकुमार इति कश्चन अद्वैतविद्वान् गुरुणा सह वादार्थमागतः । तं स्ववचनविरोधहेतोः निरासञ्चकार । काश्यामपि अद्वैतमतं निरस्य प्रशस्तिं स्वीचकार । प्रत्यर्थिविदुषामपि अग्र्यं वित्तं ददाति स्म न तु स्नेहेन किन्तु तान् प्रतिभटनोद्युक्तान् कर्तुम् ।

लोकमान्यटिळकमपि वादे निरासाञ्चकार । ततः पश्चात् श्रीमुष्णम् प्राप्य वादिनिग्रहं कृतवान् । ततः बेळगाविप्रदेशमगच्छत् । बेळगांवप्रदेशे मायामतं नैव नूतनम् । पूर्वं यद्बौद्धमते प्रतिपादितं स एव वादः अत्रापि वर्तत इति प्रत्यपादयत् । ततः मैसुरुप्रदेशमेत्य गीतायाः भेदपरार्थं शिष्यान् अबोधयत् ।

एवं यतिराजे राजति सति मायिनः एकोनविंशतिमठेषु सत्स्वपि मिथ्यामतमपाकृतमिति धिगस्मानिति च व्यलपन्तः आसन् । अत्रान्तरे रामसुब्बो नाम मायी व्यासतीर्थविरचितचन्द्रिकायाः खण्डनग्रन्थमेकमरचयत् । तदा तं खण्डयितुं सद्य एव धियं कृतवान् । दुर्वादिनः कपटधिय इति सन्दर्शयन् सः चन्द्रिकायाः निजार्थं प्रकटयामास । एवं रामसुब्बस्य ग्रन्थस्य खण्डनं रचयित्वा तं वादार्थमाह्वयत् । किन्तु सः भयकातरः गुरोः सम्मुखे स्थातुं न शक्तवान् ।

वाद्यैः सह गजादिभिस्सह समुन्नतमनोज्ञगजेन्द्रपीठे चन्द्रिकाग्रन्थं न्यधत्त । पवनसूनुरिव अयं वायुभक्तः चन्द्रिकाम्बां सीतां तव दूतोऽहमित्युक्त्वा तव विरुद्धमशेषकुलं नाशयामीति प्रतिज्ञामकरोत् ।

चतुर्थसर्गस्य कथासारः- अस्मिन् सर्गेऽपि सत्यध्यानतीर्थयतिवरस्य दिग्विजयवर्णनं वर्तते । कुम्भकोणप्रदेशे पुनः दुर्वादिनः प्रलयाग्निना पतङ्गा इव मिलिताः । क्षेत्रज्ञ इति शब्दस्य ईशपरत्वं गीतावाक्यप्रमाणेनैव साधय इत्युक्तम् । तदा तेभ्यः पूर्वाचार्योक्तरीत्या एव व्याख्यानं दर्शयन्नीशपरत्वं साधयामास । गीतावाक्यं प्रमाणत्वेन नोक्तमिति आक्षेपं श्रुत्वा दाचार्येणैव अस्मदुक्तरीत्या व्याख्यातमिति उक्त्वा तं अनन्तकृष्ण पराजितवान् । स

अनन्तः दूरे कलकत्ता नगरे सौगन्ध्यविमर्शाख्यं खण्डनग्रन्थमरचयत् । तं प्रबन्धं अत्यसारं निर्दलं मत्वा तस्य खण्डनाय नैव प्रायतत ।

आश्रमवर्णानां पद्धतिं खण्डयन्तं महात्मा इति प्रथितं वादिनं वादार्थमाहूतवान् । किन्तु सः स्वकिर्तेः क्षतिं चिन्तयन् नागतवान् । मधुरानगरे गुहाभिधेन सह विजयपुर्यां नृसिंहसुब्बेन सह वादं कृत्वा विजयी अभूत् ।

अथ समयागमकोविदः पञ्चाङ्गनिर्णय इति ग्रन्थमरचयत् । गयायां कस्यांश्चित् पत्रिकायां विष्णुसर्वोत्तमत्वप्रतिपादकाः माध्वाः शिवनिन्दकाः इति वादं निरस्य, शिवः वैष्णवाग्रणिः किन्तु न सर्वोत्तमः इति प्रत्यपादयत् । यदि जगन्मिथ्यात्वं , ईशस्य निर्गुणत्वमङ्गीक्रियते तर्हि शिवस्य जगत्पतित्वं कथं स्यादिति निरास । तन्निरासप्रबन्धं गदाधरस्य विष्णोः पदतले न्यवेदयत् । एवं यत्र यत्र गतवान् तत्र विजयी भूत्वा मध्वमतपताकं स्थापयामास ।

पञ्चमसर्गस्य कथासारः- अस्मिन् सर्गे यतिवरस्य शमदमादिगुणाः वर्णिताः । सूर्योदयानन्तरं करिष्यमाणं कृत्यं प्रभातपूर्वमेवाकरोत् । अतः सूर्य एषः । सदा स्वाध्याये प्रवचने एव रतः आसीत् । प्रभाते शिष्यान् श्रुतिवाक्यानां भेदपरत्वं बोधयामास । ईशस्य दासोऽहमिति भाव एव मुक्तिप्रदायकमित्युक्तवान् । सुप्रवचनेन तथा तप्तमुद्राधारणेन भक्तान् व्यमोचयत । तन्त्रसारोक्तरीत्या रामं रमया सह वज्रमण्टपे पूजयामास । निर्माल्यधारणेन शोभमानः सः कदापि स्वप्रशंसां नासहत । स्वकीयं वा परकीयं वा यत्किञ्चिद्वाक्यं कस्मिन् पृष्ठे कस्यां पङ्क्तौ इति वक्तुं समर्थ आसीत् । सदा शास्त्रविमर्शे ग्रन्थरचने एव रतः । निशासमये शिष्यान् स्वग्रन्थाध्ययने आदधे । शिष्यहिते कामुकः कुवादे क्रोधी हरिप्रीतिनिबद्धलोभः हरौ मोहः एवं गुणोज्झितोऽप्येषः दोषाश्रय अभूत् ।

प्रतिवर्षं सभामायोज्य मध्वमतवर्धनं कृतवान् । स्वशिष्यैर्विरचितं सुकाव्यं श्रुत्वा आमोदयत् । मुक्तोऽपि परमात्मनः भिन्नः इति प्रतिपादयितुं क्वचित् स्वयं बालैस्सह क्रीडति

स्म । अष्टसिद्धिं प्राप्यापि ऋषभदेवचरितं अनुसृत्य नाभ्यनन्दत् । मोहमयिपुरे व्याधिमहरत् । एवं सर्वत्र भक्तोद्धारकार्यं कृत्वा भीमरथितटे पण्ढरपुर्यां वृन्दावनस्थोऽभूत् ।

अन्ते कविः अहङ्कारखण्डनपूर्वकं गुरुनमनरूपं मङ्गलमाचरति ।

मन्दाग्रण्या मयाऽहो व्यरचि कृतुरियं यत्कृपालेशमात्रात् ।
किंब्रूयाम् ततकृपाया अघटितघटनापाटवस्य प्रकर्षम् ।
तस्मै कृत्वा प्रणामान् क्षितिगतनिखिलाङ्गैर्मुहुः प्रार्थयेऽहम् ।
निष्ठां श्रीमध्वशास्त्रे हरिगुरुचरणाब्जेषु योग्यां सुभक्तिम् ॥[22]

श्रीविष्णोर्दयितैः शुभैरघहरैः कर्णावतंसैः सतां ।
मालेयं तुअलसीदलैरिव गुरोश्चारित्र्यरत्नैर्मया ।
मन्देन ग्रथिताऽपि रङ्गपतिसत्पादे च भक्त्यार्पिता ।
शुद्धां ये हृदि धारयन्ति परमे सद्यो लभन्ते रतिम् ॥[23] अत्र गुरोश्चारित्र्यरत्नैर्मया मन्देन ग्रथिताऽपि... इत्यत्र सुमध्वविजयस्य मालाकृतस्तच्चरिताख्यरत्नैरसूक्ष्मदृष्टैस्सकुतूहलैश्च....इति श्लोकस्य भाव एव दृश्यते ।

आलङ्कारिकदृष्ट्याऽध्ययनम्

पञ्चसर्गात्मकमिदं लघुकाव्यं प्रासादगुणोपेतः । वीराद्भुतरसयुतेऽस्मिन् काव्ये सप्ताशित्यित्तरद्विशतश्लोकाः सन्ति । प्रथम सर्गः उपजाति- मालिनी -मन्दाक्रान्तवृत्तोपेतः । द्वितीये मालिनी, शिखरिणी, शार्दूलविक्रीडितवृत्तानि सन्ति । तृतीयः वसन्ततिलका- मालिनीवृत्तोपेतः । चतुर्थे चन्द्रिका शिखरिणी हरिणीवृत्तानि दरीदृश्यन्ते । पञ्चमः सर्गः नैकवृत्तोपेतः ।

उपमोत्प्रेक्षेत्याद्यर्थालङ्काराः दृश्यन्ते ।

---

[22]सत्यध्यानविजयः ५ स, ६२ श्लो

[23] सत्यध्यानविजयः ५ स, ६३ श्लो

उपमा-

अथ भरत इवायं रामसामीप्यकामो गुरुपदयुगधूलिधूसरः श्रीजयार्यः ।
रघुपतिपदपूजाभाग्यदानक्षमेण चिरभृततपसा श्रीरामचन्द्रं सिषेवे ॥[24] इत्यत्र उपमानं भरतः उपमेयो जयार्यः, उपमावाचकः इव शब्दः समानधर्मस्तु रामसेवायां रतिः ।अतः उपमा ।

उत्प्रेक्षा-

यं वै गुणौघो गुरुभक्तिपूर्वः पूर्वेऽहमित्याश्रयते निकामं ।
कामाद्यनाविद्धसुधीः सदैव दैवीं श्रियं खल्वभिजात एषः ॥[25]

अत्र गुणाः जडाः । त अहम् अहमिति अस्मिन् आश्रयं प्रापुः इति सम्भावना कृता । सम्भावना स्यादुत्प्रेक्षा इति लक्षणात् उत्प्रेक्षा ।

व्यतिरेकालङ्कारः-

सुरसदसि सुरेशे देववृन्दावनस्थे ।
क्षणिकसुखनिदानं नो सभां वर्णयामः।
भरतभुवितु तस्मिन्नत्र वृन्दावनस्थे ।
सद इदममृतत्वप्राप्तिहेतुं स्तुवीमः ॥[26]

अत्र गन्धर्वगाननृत्यादिभिः क्षणिकसुखनिदानं सुरेन्द्रसभा न श्रेष्ठतमा । अपि तु जयमुनिसन्निधौ या सभा आसीत् सा अमृतत्वहेतुकमिति देवसभायाः अपि श्रेष्ठतमा इति उपमेयाधिक्यपर्यवसायिव्यतिरेकालङ्कारः । परिसङ्ख्या निषिद्ध्यैकमेकस्मिन्वस्तुयन्त्रणम् इति लक्षणात् न वर्णयामः इति प्रयोगेन परिसङ्ख्यालङ्कारः ।

रूपक-

दशमतिमतमेयालोचनालोडनाप्ते । गुरुचरणदयाम्बुप्राज्यधारप्रदीप्ते

---

[24]सत्यध्यानविजयः - १स, ५५ श्लो
[25] सत्यध्यानविजयः १ स, श्लो ५१
[26] सत्यध्यानविजयः २ स, १८ श्लो

जहुवुरघकुलौघान् ज्ञानवैश्वानरे ते । भ्रमविशयपलालध्वंसनार्चिःपरीते ॥[27] अत्र ज्ञानसत्रस्य वर्णनम् दृश्यते । विषय्यभेदताद्रूप्यरंजनं विषयस्य यत् इति लक्षणेन ताद्रूप्यरूपकम् ।

परिणामालङ्कारः

मेघो यदि पूज्यं स्वात्तं त्वभिवर्षन् । क्षुद्र समयेनैवान्नप्रदमम्भः ॥
सद्योऽर्पितमीशे मुक्तिप्रदमन्नं । वर्षन् गुरुमेघः पूज्यो भृशमेव ॥[28]

श्रीबन्धे रचितः श्लोकः

रूढं समीरसमयं खलु सन्मनस्सु । सद्यः स सुष्टु सुरसुष्टुतिगोचरं वै ।
वैरं स्थिरं च कुमते विदुधद्विरागी। योगी स्वगीर्भिरखिलान् सत उद्दधार । [29],[30]

एवं असङ्गति- समासोक्ति- अतिशयोक्ति- सहोक्त्यादयोऽलङ्काराः दृश्यन्ते । तथा छेक- वृत्यनुप्रासादि शब्दालङ्काराः एकाक्षरीश्लोकः बन्ध- निबद्धाः श्लोकाः कवेः प्रतिभां दर्शयन्ति ।

ऐतिहासिकदृष्ट्याऽध्ययनम्

काव्येऽस्मिन् बहवः ऐतिहासिकदृष्ट्या प्रमुखाः कथाः वर्णिताः । यतिवरस्य दिग्विजयवर्णनमेव कवेः ऐतिहासिकप्रज्ञायाः निदर्शनम् । कोरलहल्लि इत्यादि ग्रामवाचीशब्दानां संस्कृतभाषान्तरः कण्ठपल्लीति सुष्टुरूपेण कृतः । सत्यज्ञानतीर्थस्य तिरुपतिदेवालयप्रवेशो वा रौप्यपीठे रथवृत्तान्तो वा यदपि भवतु इतिहासमेव वदति । काश्याम् अद्वैतमतं निरस्यते यतीन्द्राय " वादे च सार्धं न हि तेन कोऽपि शक्तो बुधः स्यात् " इति प्रशस्तिपत्रिकां ददुः प्रतिभासम्पन्नाः विद्वांसः।

लोकमान्यटिळकविरचितस्य गीतारहस्य-ग्रन्थस्य ऐक्यपरत्वं तत्काले एव सभां आयुज्य निरासञ्चकार । अभिनव- शङ्करालये यः विजयः प्राप्तः स क्रिस्ताब्दे १९३० त्रिंशदधिक- नवदशशततमे वर्षे अभवत् । । यत्र यत्र परवादिनिग्रहः कृतः तत्प्रदेशस्य

---

[27] सत्यध्यानविजयः २ स, १६ श्लो
[28] सत्यध्यानविजयः ५ स, २१ श्लो
[29] सत्यध्यानविजयः ५ स, ५७ श्लो
[30] परिशिष्ट-२

तत्रत्य- वादिनाञ्च नामेत्यादिविषयाः स्पष्टतया उल्लिखिताः । किन्तु कालक्रमानुसारेण न सन्ति ।

सैद्धान्तिकदृष्ट्याध्ययनम्

मध्वसिद्धान्तः सर्वत्र काव्ये विराजते । द्वितिये सर्गे सत्यधीरतीर्थः सत्यज्ञानसेतुरामार्याभ्यां शुशोभ इति वर्णयन् कविः भीमसेनार्जुनाभ्यां सह धर्मराजेव इति वर्णयति । अत्र भीमसेनार्जुनाभ्यां इति कथं 'अल्पाच्तरमिति पाणिनीयसूत्रोक्तप्रकारेण अर्जुनभीमसेनाभ्यां इति स्यात् । किन्तु पाणिनिना एव वासुदेवार्जुनाभ्यामिति प्रयोगः कृतः वासुदेवस्य अर्जुनाद् उत्तमत्वकारणेन । अत्रापि स एव समाधानः ।अनेन प्रयोगेण भीमस्य नाम वाय्वतारस्य अर्जुनात् इन्द्रावतारात् उत्तमत्वमुक्तम् ।

क्षेत्रज्ञ- शब्दस्य ईशपरत्वम् - अद्वैतिनः क्षेत्रशब्दार्थं परिदृश्यमानं शरीरमेवेति प्रतिपादयन्ति "महाभूतान्यहङ्कारोबुद्धिरित्यादिना निरुक्तोक्तप्रमाणेन । यदि क्षेत्रज्ञशब्दस्य ईश्वरपरत्वमुक्तं चेत् उद्देश्यतावच्छेदकविधेयोरैक्यत्वात् " क्षेत्रज्ञं मां विद्धि" इति वाक्यं अबोधकः स्यात् घटो घट इतिवत् इति पूर्वपक्षः । अत्र गीरेषा घटो घट इति वाक्येन न तुल्या । अत्र उद्देश्यतावच्छेदक्विधेययोर्भेद एव उक्त्ः रामं सीतापतिं विद्धि इतिवत् इति समाधानः ।

"यज्ज्ञात्वाऽमृतमश्नुते" इत्यादिवाक्यैः ईश्वरस्य मोक्षप्रदायकमुक्तम् । जीवेश्वरयोरभेदत्वात् जीवस्यापि मोक्षप्रदायकत्वं स्यादित्युक्ते न तथा जीवे तल्लिङ्गानुभवबाधितत्वात् इति क्षेत्रज्ञ शब्दस्य ईशपरत्वं प्रतिपादितम् । एवमेव तत्त्वमसि नेहनानास्ति किञ्चनेत्यादि वाक्यानां भेदपरत्वं विष्णुसर्वोत्तमत्वं च अस्मिन् काव्ये सुष्टु प्रतिपादितम् ।

अतः अलङ्कारिकदृष्ट्या ऐतिहासिकदृष्ट्या सैधान्तिकदृष्ट्या वा काव्यमिदम् वैशिष्ट्य -पूर्णम् ।

५.४. श्रीसत्याभिज्ञविजय-लघुकाव्यम्

कट्टिकेश्वाचार्य-विरचित-लघुकाव्यरअयेऽन्यतमम् श्रीसत्याभिज्ञविजयलघुकाव्यम् । विजयकाव्यमिदं श्रीपादानां वर्णनपरम् । बाल्य-संन्यास-दिग्विजयादीनां वर्णनं यथाक्रमं सैतिहासं निरूपितम् ।

प्रथमसर्गे स्वकुलदेवतास्तवनेन मङ्गलमाचर्य गुरुनमनं विधधाति कविः । वरदानदीतीरस्थे कुसनूरु इति ग्रामे गोविन्दाचार्याभिदः कश्चित् विरक्तो ब्राह्मण आसीत् । सभार्यस्सः श्रीनिवासस्य सेवां कृत्वा ततप्रसादेन सुतं लेभे । वेङ्कटेशस्य प्रसादात् लब्धस्य सुतस्य नाम वेङ्कटेश इति चकार । उपनयनादिसंस्कारान् संपूर्य श्रीसद्ध्यानतीर्थश्रीपादेभ्यः समार्पयत् । शास्त्राध्ययनं समाप्य हुच्चाचार्यस्य पुत्रीं परिणीतवान् । तस्य राम इति पुत्रः पुत्री च अजायताम् । श्रीसत्प्रज्ञतीर्थाः साम्राज्येऽभिषिक्ताः । श्रीसत्यध्यानतीर्थाः पण्ढरापुरे वृन्दावनस्थाः बभूवुः । गुरोराराधनं समाप्य साम्राज्योचितशिष्यं मार्गयन्तः चच्रुः । रायचूरुक्षेत्रे द्वितीयखण्डस्य अनुवादः । ततः वेङ्कटेशाचार्येण मेलनम् । तस्य सुधानुवादं श्रुत्वा अतिमोदिताः श्रीपादाः तमन्वग्रह्णत् । वृष्टिखेड (मळखेड) क्षेत्रे सुधामङ्गलमातनोत् ततः आतकूरुप्रदेशं ययौ । स्वस्य साधनस्य समाप्तिं ज्ञात्वा वेदान्तसाम्राज्यपालकः कः भवितुमर्हः इति चिन्तितोऽभूत् । वेङ्कटेशाचार्यस्य वैराग्यादिगुणैः परिचितः स एव अर्हः इति मत्वा साम्राज्यपीठे अभ्यषिञ्चत ।

द्वितीयसर्गस्य कथा - गुरोः महासमाराधनं समाप्य सिद्धान्तविवृद्धकारिसभां प्रारभत । पूर्वं श्रीसत्यधीरतीर्थाणां काले प्रारब्धा सभेयं तत्पुत्रपौत्रादिभिः उन्नतिं प्राप्य अशोभत । आतकूरुक्षेत्रे कृष्णानद्यां निमग्नाः रामपूजादिसन्दर्शनेन धन्या बभूवुः । ततः श्रीसत्यस्ध्यानतीर्थानां आराधनमहोत्सवः प्रचलितः । पौनःपुन्येन हरिभक्तिं प्रदर्शयन्तोऽपि हरिप्रीतिकार्ये अतृप्तिरासीत् यतः वायोः वंशजानां गुण एष एव । वायुरपि सदैव हरिप्रीतिकार्ये रतोऽपि तृप्तिं न लभते । एवं प्रकारेण नित्यं न्यायामृत- सुधा- चन्द्रिकादि उद्ग्रन्थानां पठने पाठने रतः शिष्यानपि सौख्यसागरे निमग्नानकरोत् । कविवरेण

विरचितस्य सत्यध्यानविजयलघुकाव्यस्य श्रवणमपि अभूत् । काव्येऽस्मिन् सङ्कुच्य सर्वकर्माणि इति कश्चन श्लोकः । अत्र 'सङ्कुच्य' इति पदं न युक्तं 'सम्पूर्य' इति भवीदिति गुरुभक्तिं तथा अऔचित्यज्ञानं निदर्शयामास यतिवरः । यथा रथ्याजलं गङ्गाप्रवहमेलनेन पावित्र्यं प्राप्नोति तथा अनेन शोधनेन काव्यं पवित्रमभूदिति कविरभिप्रैति । गङ्गासङ्गेन नैर्मल्यं रथाभिर्लभ्यते यथा वाचो विशुद्धिसिद्ध्यर्थं सङ्गम्यन्ते गुरोर्गिरः इति वाक्यस्य सादृश्यं दृश्यते ।

तृतीयसर्गस्य कथासारः- सर्गेऽस्मिन् उत्तरादिमठस्य गरिमानं वर्णयन् कविः हंसनामकभगवतः परम्परा एषा अतः उत्तरनामकः आदौ यस्य स मठः उत्तरादिमठः इति विग्रहं करोति । तथा उत्तरशब्दवाच्यः वायुः आदिः यस्य स इति । तदनु उत्तरस्य मध्वागमस्य संस्थापने आदिः मठः उत्तरादिमठः इत्यादिरूपेण मठस्य गरिमानं वर्णयति । जनाः यथार्थस्य जिज्ञासवः मठमेत्य तीर्थपादं दोषकलुषितं अस्माकं स्थानानि पवित्रीकरोत्विति प्रार्थयामासुः । तेषां मनोरथं पूरयितुं दक्षिणदिशं प्रति प्रस्थिताः श्रीपादाः । तिरुपतिक्षेत्रमागताः तत्र पद्मावतिसन्नधानमेत्य पद्म सरोवरे न्यमज्जत् । ततः रामानुजीयैः सह वाक्यार्थे व्याहति दोषं दर्शयित्वा तान् पराजितानकरोत् । अस्य पाण्डुत्यं दृष्ट्वा विमतीया अपि स्तुतिभिः अस्य पूजां विदधुः ।सत्यध्यानतीर्थान् संस्मरन्तः जनाः अस्य वादपद्धतिः गुरोरनुसारिणीति शशंसुः । गोविन्दराज्पत्तनतः जनाः आगत्य अभिनन्दनपूर्वकं नेमुः । गोविन्दराजपत्तने उत्तरादिमठाधीशानां कृते गौरवसमर्पणं कृतम् । तत्र गिरिस्थं वेङ्कटेशं नत्वा तत्र सत्यज्ञानतीर्थाणांचरितं समस्मरत ।[31] तत्र ब्रह्मरथोत्सवार्थं बहुवित्तं समर्पयामास । तदानीं ध्यान्यसङ्ग्रहणादिकं निषेधितमासीत् । तथापि धीरचित्तः सः यत्नेन शालिराशिं सङ्गृह्य अन्नकूटमहोत्सवेन भक्तान् तोषयामास । तत्र ग्रामान् गत्वा तत्रत्यान जनान् अनुगृहीत्वा तान् पूतयामास । यत्र यत्र गच्छन्ति स्म तत्र तत्र सुधापाठेन शिष्यान् तथा पुरस्थान् आमोदयत् । नाचारकोयिलिति प्रान्तं प्राप्य तत्र सत्याभिनवतीर्थं ननाम । तत्र रामाचार्येति कस्यचिद्विप्रस्य भार्या विभ्रममयं रोगं निवार्य दृष्टिमात्रात् शन्तिमापयद् ।

[31] सत्यज्ञानतईर्थैः प्रार्थितः वेङ्कटेशः तिलकं धृतवानिति वृत्तान्तं- सत्यध्यानविजयः-२ स, २५-२९ श्लो

भवरोगभेषजस्यास्य कृतिः नाश्चर्यकरी । ततः तिन्नलूपुरु इत्याख्यम् ग्रामं गत्वाअन्याय्येन परवशगतं भूमिं स्ववशीकृतवान् ।

चतुर्थसर्गस्य कथासारः – श्रीरङ्गक्षेत्रमाप्य् तत्र श्रीरङ्गनाथं नत्वा कावेरीनद्यां कृतावगाहः कुम्भकोणं जगाम । तत्र जयतीर्थविरचितस्य तत्त्वप्रकाशिकायाः मङ्गलमहोत्सवमकरोत् । ततः वेलपुरं गत्वा दुर्गादिवीं ननाम । मानामधुरीमागत्य सत्यप्रियतीरथान् प्रणम्य रामेश्वरं जगाम । तत्र रामप्रतिष्ठापितं रुद्रं नत्वा समुद्रस्थं रामपूजितं नवग्रहमन्दिरं दर्भशयनं कोटितीर्थं सन्दर्शयामास । तत्र शिष्यैस्सह समुद्रस्नानं कृत्वा विरजायामपि एतैस्सह स्नास्यामीति शिष्यान् मोक्षं नेष्यामीति समकल्पयत् । स्नानानन्तरं समुद्रः क्षोभमाप । ऊर्मिभिश्च पवनैश्च ताडिता नौका दुर्दशामाप । एतद्दृष्ट्वा सर्वे भयेनाकम्पन्त । किन्तु निर्भयः यतिराट् हरिपदं मनसि ध्यात्वा निश्चिन्तोऽभूत् । सेतुबन्धनसमये रामस्य दृष्टिमात्रेण भीतः समुद्रः यथा शान्तोऽभूत् तथैव मूलरामोपासकस्य मम नमस्कारान् स्वीकुर्विति प्रार्थयामास । तदा समुद्रः शान्तोऽभूत् । तत्र सर्वविभवैः रामं सम्पूजयामास ।

पञ्चमसर्गस्य कथासारः – रामेश्वरात् कन्याकुमारी गत्वा तत्र कन्यारूपिणीं लक्ष्मीं नत्वा पुनह् मानामध्रीमागत्य सत्यप्रियेभ्यः सेतुदर्शनसुकृतं समर्पयामास । ततः तिरुकोयिलूरुपुरमेत्य भावबोधकारं रघूत्तममूनीनमत् । वीरचोळपुरे सत्यनाथतीर्थाननमत् । ततः अनन्तशयनं गत्वा अनन्तशायिनं प्रणम्य श्रीमुष्णं जगाम् । तत्र उत्तरादिमठाधीशान् विशेषगोरवेण पूजयन्ति । एष सम्प्रदायः । तत्र पूजितः तोताद्रिमागतः विष्णुं नत्वा कान्चीपुरमागतवान् । एवं दिग्विजयं कृत्वा रामं तोषयामास । अस्मिन् सर्गे यतिवर्स्य दिनचर्यां वर्णयति कविः । ब्राह्मे मुहूर्ते उत्थाय नित्यकर्म समाप्य हृदि सदैव रामं स्मरन् सुतीर्थेषु कृतावगाहः शङ्खचक्रादिवैष्णावचिह्नैः भूषितः निर्माल्यं विसृज्य प्रभातकाले नतान् जनान् पादधूलिभिः दृष्ट्या च पावयति स्म । तदनु सुधादिपाठैः शिष्यान् अमृतधारादिभिरिव तोषयति स्म । ततः स्वाध्यायं स्माप्य मूलरामपूजां बाह्यां आन्तरिकीञ्च विधाय़ रामाय भीमेन पूर्णप्रज्ञेन च निवेदितमन्नं भुङ्क्त्वा पुनः मध्वशास्त्रस्य प्रवचनं करोति स्म । ढोलोत्सवञ्च विधाय सत्कथाभिः प्रत्यग्रपाठैः गहनोपदेशैः स्वान् तोषयति स्म इति

वर्णयति कविः । राणीबेन्नूरुक्षेत्रमेत्य तत्र विद्याधीशगुरुं सेवयामास । गुत्तलवंशस्य गुरुराजनामा पीठस्योत्तरधिकारी इति निश्चित्य तं पीठे अभिषिच्य रणिबेन्नुरुक्षेत्रे वृन्दावनस्थोऽभूत् ।

आलङ्कारिकदृशाऽध्ययनम्

प्रथमसर्गः पथ्यावक्रवृत्ते निबद्धः । द्वितीयः सर्गः इन्द्रवज्रा उपजातिवृत्ते निबद्धः । तृतीयस्तु वसन्ततिलकावृत्ते । चतुर्थः रथोद्धता वृत्ते पञ्चमसर्गः नानावृत्तमयः । अस्मिन् सर्गे आर्या, सुन्दरी, चन्द्रिका, भुजङ्गप्रायातः, तोटक, मञ्जुभाषिणी, प्रमिताक्षरा, स्वागता, दोधकं , द्रुतविलम्बितम्, प्रहर्षिणी, शिखरिणी, माणवकं, माणिमाला, प्रमाणिका, वातोर्मीविद्युन्माला, इन्द्रोपेन्द्रवज्रा, उपजाति, वसन्ततिलका, शार्दूलविक्रीडितेत्यादि नानावृत्तेषु निबद्धाः श्लोकाः मनोहराः । वृत्ति, छेकानुप्रासादि शब्दालङ्काराः अपि बहुसुन्दराः ।

द्वितीयसर्गे श्रीसत्यप्रज्ञतीर्थाणां महासमाराधनस्य उत्सवस्य वर्णनं दृश्यते ।

मुक्तेर्जनित्री परमान्नभुक्तिर्ह्यत्राभवच्चेन्द्रियसौख्यकर्त्री ।
प्राधान्यतो मोक्षफलाऽपि दृष्टिर्विष्णोर्यथैवान्यपुमर्थदात्री ॥
इति उत्सवस्य दर्शनादिभिः ऐहिकपारत्रिकसुखानुभूतिरिति कविः ।
अक्षणां द्विजा उत्सवदर्शनेन श्रुत्यागमानां श्रवणेन्द्रियाणाम् ।[32]

साफल्यमापुः शतजन्मनां च धन्याः प्रणामैर्गुरुपादमूले ॥ इति सर्वेन्द्रियाणां सार्थकता प्राप्ता इति कविः उत्सवस्य गरिमानं वर्णयति । एवं उत्सवस्य वैभवोऽपि सुष्टु वर्णितः ।

गोविन्दराजपत्तनपुरप्रवेशोत्सवस्य वर्णनमेवं वर्तते –

कुम्भीन्द्रपीठमधिरुह्य तदा यतीन्द्रो । गम्भीरमन्दगमनो गुरुभक्तिसान्द्रः ।
सम्भासितं बहुविधं कदलीक्षुपूर्ण-कुम्भादिभिः पुरवरं प्रविवेश मान्यः ॥[33]

---

[32] सत्याभिज्ञविजयः २ स, २९,३० श्लो

नारीजनैः स रचितैः कुसुमप्रवर्षैः-र्नीराजनैः प्रतिगृहं च शुभप्रकाशैः ।
आराधितोऽयमिति राजपथेषु गच्छन् राराजते स्म नितरां निगमाधिराजः ॥[34]

विवाहमहोत्सवस्य वर्णनम् – तृतीयसर्गे विवाहवर्णनम् चमत्कारपूर्वम् ।

कन्या सुधा जयमुनेस्तनयाऽनुभाष्य-ग्रन्थो वरो बहुलबोधसुतोऽथ दिव्यः ।
इत्येतयोः शुभविवाहमहे बभूव । कल्याणमण्टपवरो गुरुणानुवादः ॥[35]
विष्णोः समुद्रसुतया हि सुरा विवाहे । पीत्वाऽमृतं विजयिनः किल तत्तथास्तु ।
क्षोणीसुरास्त्विह निपीय मुदा सुधाग्र्यं । संसारदुःखजयिनः सुधियो बभूवुः ॥
सर्वाङ्गमङ्गलमनङ्गपितात्र रामो । माङ्गल्यदेववनिजा गुरुपुङ्गवश्च ।
सन्न्यायमङ्गलसुधाऽऽगममङ्गलञ्च । किं किं न मङ्गलमहो सुमहोत्सवेऽस्मिन् ॥[36]

कन्या जयमुनिसुता न्यायसुधाख्या वरः पूर्णबोधसुतः अनुव्याख्यानाख्यः । एतयोः विवाहमहोत्सवस्य कल्याणमण्टप गुरुणा कृतः अनुवादः इति । विष्णोः विवाहः यदा समुद्रसुतया रमया सहाभूत् तदा सुराः अमृतपानात् अमराः बभूवुः । विवाहमहोत्सवेऽस्मिन् भूसुराः सुधापानं कृत्वा मोक्षं प्राप्य अमराः बभूवुः । अस्मिन् महोत्सवे सर्वं मङ्गलमयमासीत् । अन्ङ्गपितारामः , भूमिजा सीता, गुरुप्रवेकः, सुधामङ्गलं एवं सर्वत्र मङ्गलमयपरिसर आसीदिति सुधामङ्गलमहोत्सवं विवाहमहोत्सवरूपेण वर्णयति ।

अतिशयोक्त्यलङ्कारः

यथा यथा द्विरेफोऽयं पपो तच्चरणामृतम् । तथा तथा तीव्रतरा द्विरेफास्य तृषाऽभवत् ॥[37]

---

[33] सत्याभिज्ञविजयः ३ स, २२ श्लो

[34] सत्याभिज्ञविजयः ३ स, २४ श्लो

[35] सत्याभिज्ञविजयः ३ स, ४६ श्लो

[36] सत्याभिज्ञविजयः ३ स, ४७,४८ श्लो

[37] सत्याभिज्ञविजयः ५ स, ५ श्लो

यतिन्द्रस्य द्विरेफेण भ्रमरेण सह सादृश्यमुक्तम् । तिरुकोयिलूरुक्षेत्रे श्रीरघूत्तमं पश्यन् तृप्तिं नावाप इति वर्णयन् कविः उपमेयस्य यतीश्वरस्य वर्णनमकृत्वा उपमानस्यैव वर्णनेन उपमेयस्य वर्णनं करोति । अध्यवसितत्वात् अतिशयोक्तिः ।

विरोधाभासालङ्कारः - प्रथमसर्गे विरोधाभासस्य आधिक्यं दृश्यते । यथा सत्यप्रज्ञतीर्थाणां वैराग्यं वर्णयन्

अशने रागहीनोऽपि वसनेऽभूत्स रागवान् । विषयाद्विमुखः शब्दविषये सर्वदोन्मुखः ।
अकामस्यापि कामौ द्वौ प्रावर्धेतां क्षणे क्षणे । वाक्यार्थचन्द्रिकापाठे श्रीरामाङ्घ्र्यर्चने तथा ।

अत्र वस्तुतः रागद्वेषादिविहीनस्य यतिवरस्य कथं रागयुतत्वमित्युक्ते रक्तवर्णीय-काषायवस्त्रधारणेनेति । तथैव विषयसुखे विमुखाः अमी परमात्मनः विषये अर्थात् शास्त्रविषये उन्मुखाः बभूवुः । काषायवस्त्रधारणं परमात्मविषयकशब्देषु रतिः संन्यासीनां उचितम् एव ।

रागहीनस्य रागयुतत्वं विषयविमुखस्य विषयोन्मुखता इति विरोधः भासते । किन्तु तस्य परिहारोऽपि स्पष्टः । अतः 'आभासत्वे विरोधस्य विरोधाभास उच्यते' इति लक्षणात् विरोधाभासालङ्कारः ।

परिणामालाङ्कारः

पद्मावतिप्रियपतेरतिचारुपाद- पद्म स्रुतामृतरसान् प्रपिबन् रसज्ञः ।
पद्माभ-निर्गतनिभेष –दृगञ्जलिभ्यां पद्मासनान्वयज आस सुखाब्दिमग्नः ॥[38] अत्र पद्मावतिप्रियस्य वेङ्कटेशस्य पादेभ्यो स्रुतं अमृतं नेत्राञ्जलिभ्यां पिबन्... इति दृशोः अञ्जलित्वारोपः तथा अञ्जलिभ्याम् पानकार्यमुक्तत्वाच्च परिणामालङ्कारः ।

अन्योन्यालङ्कारः –

चातकायितशिष्याणां मुखोद्गतसुधारसैः । सभायां गुरुमेघोऽयं चित्रं शान्ततृषोऽभवत् ।

---

[38] सत्याभिज्ञविजयः ३ स, ३२ श्लो

अत्र शिष्याणां चातकसादृश्यं गुरोः मेघसादृश्यमुक्तम् । वस्तुतः मेघे वर्षति चातकानां तृष्णा शान्ता भवति । किन्तु अत्र गुरुमेघेन तृप्ताः शिष्यचातकाः पुनः सुधानुवादवर्षणेन गुरुमेघं सन्तोषयामासुः इत्यभिप्रायः । अत्र परस्पर उपकारः वर्णितः अत् अन्योन्यालङ्कारः अन्योन्यं नाम यत्र स्यादुपकारः परस्परं इति लक्षणात् । गुरुमेघः इत्यत्र ताद्रूप्यरूपकम् ।

<u>उत्प्रेक्षालङ्कारः</u> –

सत्कामसद्धीरमुखाः प्रवेकाः वेदान्तराज्याधिपपूर्वतीर्थाः ।

श्रीमूलरामोऽखिलतीर्थपादाः कृष्णा च तीर्थं सुखतीर्थशास्त्रम् ॥

इतीह तीर्थोत्तम सङ्घसङ्गमाङ्गल्यमन्वीक्ष्य तदाऽतकूरात् । सद्यः समुत्सृष्टनिजाभिमानो ह्रियेव दूरापगतह् प्रयागः ॥ सत्यकाम सत्यधीरतीर्थादि- प्रमुखयतितल्लजानां सन्निधानेन, तथा श्रीमूलरामदिग्विजयरामसन्निधानेन च , सुखतीर्थशास्त्रविलोकनेन च आतकूरुप्रदेशः त्रिवेणीसङ्गमस्थानात् प्रयागादपि आतिशयेनाशोभत । अनेन लज्जया प्रयागोऽपि दूरापगतः इति उत्प्रेक्षा ।

<u>अर्थान्तरन्यासालङ्कारः</u>-

शुश्राव सध्यानगुरोश्चरित्रं गुरूत्तमो मन्दधिया निबद्धम् ।

शुक्तौ स्थितोऽयम् त्विति नैव सन्तो मुक्तामणिं जातु परित्यजन्ति ॥

कविना विरचितं सत्यध्यानकाव्यं गुरुवरः शुश्राव । शुक्तो स्थितः इति मुक्तामणिं सन्तः परित्यजन्ति किम्? तथैव मन्दधिया रचितमपि काव्यमिदं सत्यध्यानगुरोः वर्णनपरं अतः ग्राह्यमिति स्वाहङ्कारखण्डनपूर्वकं काव्यस्य उपादेयत्वं प्रतिपादितम् । सामान्येन विशेषस्य समर्थनत्वात् अर्थान्तरन्यासः ।

श्रीबन्धे रचितः श्लोकः

श्रीव्यासमस्तकुहकं गुणसन्निकायम्। लक्ष्म्यालयं श्रुतिततिश्रुतमध्ववासम् ।

संवादवानथ निधाय तदुत्तमाङ्गे । योगेशगेयपद एनमथाभ्यषिञ्चत् ॥[39],[40]

---

[39] सत्याभिज्ञविजयः ५ स, ५६ श्लो

ऐतिहासिकदृशाऽध्ययनम्

श्रीसत्यधीरतीर्थाः क्रि. श. १८८६-१९०६ पर्यन्तं उत्तरादिमठस्य पीठमलङ्कुर्वाणः वेदान्तसाम्राज्यं पर्यपालयत् । तदा एषा सिद्धान्तविवृद्धकारीसभा आरब्धा । श्री सत्याभिज्ञतीर्थाणां कालो नाम क्रि श. १९४५-१९४८ । अर्थात् पञ्चाशत्वर्षपर्यन्तं इयं सभा वर्धिता । सिद्धान्तस्य प्रचारः तथा तस्य वर्धनार्थं प्रारब्धा सभा नैकैः पण्डितोत्तमैः यतिभिः पालिता पोषिता इति ऐतिहासिकांशः उल्लिखितः ।

आतकूरुप्रदेशस्य इतिहासः - श्रीसत्यध्यानतीर्थाः पूवाश्रमे अत्रैव सुधादिप्रवचनकार्यक्रमाणि प्राचालयत् । अतः संसिद्धिभूमिरिति धिया आतकूरुप्रदेशे ज्ञानयज्ञं प्रारभत । सत्यधीर-सत्यज्ञानतीर्थाणां वेदान्तसाम्राज्याभिषेकः प्राचलदत्रैव इति उल्लिखति ।

गोविन्दराजपत्तने यत्गौरवं उत्तरादिमठाधीशानां कृते वर्तते तदद्यापि प्रचलति । तस्य प्रामाण्यरूपेण वर्ततेऽयं श्लोकः

प्राप्तं पुरान्तिकमथो गुरुसार्वभौमं । तत्रत्यदेवगृहकृत्यनियुक्तवर्गः ।
श्रेष्ठोत्तरादिमठोचितगौरवेण । प्रत्युज्जगाम परिपालितसम्प्रदायः ॥[41]
भेरिमृदङ्गादिभिः तथा गजपीठे विराजमानं यतीन्द्रं पुरं प्राविवेश जनाः[42] ।

सैद्धान्तिकदृशाऽध्ययनम्

प्रथमसर्गे गुरूणा उपदिष्टानां तत्त्वानां सङ्ग्रहो दृश्यते । सत्यं जगत् तथा धर्मभेदकैस्तत्त्वतोऽन्विताः। सुखदुःखादिभिः सत्या भिन्ना जीवगणा मताः । ते च सत्येन हरिणा सत्तादित्रयसंयुताः । हरेरनुचराः सत्यस्वरूपोपाधिभेदतः । इत्यादि श्लोकषड्भिः

---

[40] परिशिष्ट-३
[41] सत्याभिज्ञविजयः ३ स, २० श्लो

[42] सत्याभिज्ञविजयः ३ स, २१,२२ श्लो

मध्वमतस्य नवप्रमेयान् सूचयति । प्रमेयनवमालिकायाः सादृश्यं दृश्यते । तथा सत्याभिज्ञ इति नाम्नः सार्थक्यं प्रतिपादयति । सत्यं जगत् , जीवगणानां भेदः सत्यः इति यस्य अभिज्ञं ज्ञानं स तथोक्तः सत्याभिज्ञः । ते सदैव सत्यनामकहरिणा संयुताः सत्यस्वरूप । निर्दुःखानन्दविषयोऽनुभवः सत्यशब्दितः तस्य अभिज्ञं ज्ञानं यस्य सः इति प्रतिपादितम् ।

दध्यन्न-सद्योघृत-दुग्धपूर्वं अभूत्सुतृप्तैः पुनरत्र सेव्यम् ।
प्रारब्धरूपं परिहर्तुमीष्टे जीवद्विमुक्तोऽपि न पुण्यभोगम् ॥

इति श्लोकेन सभायां ज्ञानिनः सुभोजनेन सुतृप्ताः अपि पुनः पुनः श्रवणादिभिः स्वान् पूतयन्ति यथा जीवन्मुक्ताः कर्मलेपरहिता अपि प्रारब्धकर्मणः पुण्यभोगं कुर्वन्ति तथा । अनेन अपरोक्षज्ञानिनां प्रारब्धकर्मभोगः उक्तः ।

पद्मावत्याः लक्ष्मीस्वरूपत्वमुक्तम् । सीतात्र रामदयिता गुरुपूजितैषा ।पद्मावती च किल वेदवती पुरा सा ।स्वस्याः कृते जनकजास्मरदत्र पूर्वं पद्मावतीकृतमशोकवने निवासम् ...।[43] इति रामायणकथाभागं निरूपयति । रावणेन अपहृतायां सीताकृतौ वेदवत्याः सन्निधानमासीत् । मूलसीता कैलासे पार्वतीपरमेश्वराभ्यां प्रार्थिता तत्रैवावसत् । अशोकवने वेदवती सीतारूपेण न्यवसत् । रावणस्य हननान्तरं सीता रामं वेदवतीं परिणेतुं प्रार्थयामास । एकपत्नीव्रतस्थस्स कलौ श्रीनिवासरूपेण तां परिणेष्यामीत्यवदत् इति महाभारततात्पर्यनिर्णयोक्तं प्रतिपादयति एभिः श्लोकैः ।

वेङ्कटाद्रेः महात्म्यं वर्णयन् कविः युगान्तरे तस्य नामानि सूचयति ।

दासर्षभं कुरु विभो वृषभाद्रिवास ।मामाञ्जनेयदयितं क्उरु तन्नगेश ।
शेषाद्रिभूष कुरु मां तव दासभूषं । पापं दहेति गुरुरस्तुतवेङ्कटेशम् ॥[44]

कृतयुगे ऋषभासुरस्य तपसा तुष्टः परमात्मा तं अस्मिन्नद्रावेव अन्वगृह्णदिति हेतोः ऋषभाचल इति ख्यात आसीत् । ऋषभाचलवास इति चिन्तयतः ऋषभत्वम् अर्थात्

---

[43] सत्याभिज्ञविजयः ३ स, १२, १३, श्लो
[44] सत्याभिज्ञविजयः ३ स, ३७ श्लो

दासश्रेष्ठत्वं प्राप्यते । त्रेते अयमद्रिः अञ्जनायाः तपसा तथा आञ्जनेयस्य जन्मकारणात् अञ्जनाद्रिरिति प्रसिद्धोऽभूत् । आञ्जनाद्रेः स्मरणेन आञ्जनेयदास्यत्वं प्राप्नोति । द्वापरे शेषस्य अहङ्कारभङ्गवृत्तान्तेन शेषाचल इति प्रथितोऽभूत् । शेषाद्रिभूषस्य संस्मरणेन दासेषु भूषणप्रायः भवतीति । वें अर्थात् पापान् कटतीति वेङ्कटेशः । कलौ वेङ्कटाद्रिरितिप्रख्यातस्यास्याद्रेः संस्मरणेन सर्वपापानां नाशः भवतीति कविः अद्रेः इतिहासं तथा तस्य नामस्मरणेन फलं वक्ति ।

श्रीरङ्गस्थं रङ्गनाथं लक्ष्मीः उद्बोधयति –प्रलयो गतः उत्तिष्ठ इति । तदा अहं सदैव् प्रबुद्धः किं करणियमिति पृच्छति शरैः शत्रुगणान् संहृत्य दिशो जयेति वदति सीता । शत्रु निबर्हणर्थं मूलरामदिग्विजयरामौ स्तः इति रङ्गनाथे वदति सुखचित्तनोः तव निद्रा क्व इति पृच्छति सीता । मम सुप्तिर्नास्ति त्वां हित्वा आत्मानमालिङ्गित इति वदति रङ्गनाथः । प्राज्ञनामक परमात्मनः आलिङ्गनमेव सुषुप्त्यवस्था इति अत्र ज्ञेयो विषयः । तथा भगवतः निद्राभुभुक्षादिदोषाः न सन्तीति प्रतिपादितमत्र ।

कुम्भकोणक्षेत्रे शार्ङ्पाणिः स्वधनुषं भूमौ किमर्थं क्षिप्तवान् इत्यस्य उत्तरं एवं ददाति कविः । पूर्णशक्तिजलधेः हरेः धनुषा किमपि प्रयोजनं नास्तीति दर्शयितुमिति[45] । वा शार्ङ्गाभिमानिनी सरस्वती । सा दुर्वादिभ्यः रक्षिता भवेदिति गढा न प्रकाशिता इति कविः वर्णयति[46] । अत्र भगवतः सर्वशक्तिः तथा शार्ङ्गाभिमानिविषयाः ज्ञेयाः ।

५.५. सत्यप्रमोदविजय –लघुकाव्यम्

सत्याभिज्ञकराब्जोत्थान् पञ्चाषद्वर्षपूकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥

इति नित्यं सहस्राधिक -भक्तैः स्तूयमानाः श्रीसत्यप्रमोदतीर्थश्रीमच्चरणाः दक्षिणभारतीयप्रसिद्ध-श्रीमन्मध्वाचार्यमूलमहासंस्थान श्रीमदुत्तरादिमठस्य

---

[45] सत्याभिज्ञविजयः ४ स, ९ श्लो
[46] सत्याभिज्ञविजयः ४ स, १० श्लो

एकचत्त्वारिंशत्तमाः यतिपुङ्गवाः । पञ्चाषद् वर्षपर्यन्तं वेदान्तसाम्राज्य- चक्रवर्तिरिव, धर्मस्थापन- मूलसीतारामसेवा- शिष्योद्धारकार्येषु सदा रताः । नैकान् ग्रन्थान् विरचय्य वाङ्मयसरस्वत्याः नितरां सेवामकुर्वन् । तर्कन्यायव्याकरणसाहित्यवेदान्तादिसर्वशास्त्रेषु कृतभूरिपरिश्रमाः तलस्पर्शिज्ञानविभवाः भारतस्य नैकप्रदेशेषु दिग्विजयं कृत्वा धर्मप्रचारं तथा ज्ञानप्रसारकार्यं च साधितवन्तः । स्वेषां तपसा नैकालौकिककार्याणि कुर्वन्तोऽपि सर्वं रामपदतले समर्प्य भक्तेः पराकाष्ठतां प्रदर्शितवन्तः । इत्थंभूतानां वर्णनपरं काव्यं कट्टिकेश्वाचार्यविरचितः श्रीसत्यप्रमोदविजयः ।

षट् सर्गात्मकं लघुकाव्यमिदं सत्यप्रमोदतीर्थानां जनन,बाल्य, अध्ययन, संन्यासस्वीकारः, वेदान्तराज्यपरिपालनं , दिग्विजयादि वृत्तान्तान् विषदतया वर्णयति । सर्गानुसारं कथा तथा अलङ्कारिकैतिहासिकसैद्धान्तिकदृष्ट्या अध्ययनं विधीयते ।

प्रथमसर्गस्य कथासारः- मङ्गलाचरणे स्वकुलदेवतां श्रीरङ्गनाथं स्तुत्वा ततः श्रीमदाचार्यान् च संस्तुत्य पारम्परिकमङ्गलमाचरति कविः । गुरोः महिमातिशयं वर्णयितुमशक्तोऽपि गुरुकृपाबलेन भक्त्या वर्णनं करोमीति स्वाहङ्कारखण्डन-पूर्वकं गुरुभक्तिं प्रदर्शयति । गुत्तलनामकग्रामे रङ्गाचार्यो नाम द्विजवर आसीत् । ग्रहस्थोऽपि सः निष्कामः योगिवत् जीवनं यापयति स्म । तस्य तीव्रव्रतस्य पुण्यस्य पाकः फलित इव अपूर्वभक्त्यादिगुणपूरितः भावी गुरुराजः अजनि । भावीसत्यप्रमोदः जन्मकाले एव मातापित्रोः सत्यं प्रमोदं अजनयत् । बालकः एषः सूर्य-सिद्धान्तस्य तत्त्वं प्रतिपादयिष्यतीति ग्रहाः उच्चस्थाने बभूवुः । पिता नामकरणादिसंस्कारान् विध्युक्तं कृत्वा गुरुराज इति नाम चकार । अष्टमे वयसि सुमुहूर्ते प्राप्ते बालस्य उपनयनसंस्कारं व्यधात् । बालकगुरुराजस्य असाधारणी प्रतिभा आसीत् । एकसन्धिग्रही सः एकवारमुपदिष्टं पाठं कदापि न व्यस्मरत् । पित्रापि पुनः न पाठ्यते स्म । तस्य एतादृशी शक्तिः कुलदेवतानुग्रहः एव इति पिता अमंस्त । स्वशक्त्यनुसारं पिता तमुपदिश्य ततः पश्चात् श्रीसत्यप्रज्ञतीर्थेभ्यः अध्ययनार्थं दत्तवान् । मध्वपदाम्बोजे षट्-प्यितोऽयं षट्शास्त्रमार्गमपि लीलया चचार । गुरोरनुग्रहात् तथा स्वपरिश्रमाच्च परमां विद्यां सम्पाद्य पण्ढरपुरे गुरोस्सनिधाने सुधामङ्गलमाततान ।

वर्षत्रयेण कार्यं समाप्य श्रीसत्यप्रज्ञतिर्थाः श्रीसत्याभिज्ञतीर्थं पीठे नियुज्य वैकुण्ठं जग्मुः । गुरोः विरहात् जातं शोकाग्निं स्वयं शमयित्वा कृष्णानदितीरे आतकूरुप्रदेशे महासमाराधनं व्यधधात् । वृन्दावने श्रीसत्यप्रज्ञतीर्थान् संस्थाप्य सज्जनानां मनस्सु तेषामुत्तगुणचिन्तनञ्च संस्थाप्य स्वयं हृदये न्यधत्त । गुरोः निर्देशानुसारं तीर्थयात्रामकुर्वन् । प्रथमं शेषाचलं गत्वा श्रीनिवासं च नत्वा श्रीसत्यज्ञानतीर्थेभ्यः तिलकधारणेन कृतं अनुग्रहं स्मृत्वा नेमुः । प्रतिनित्यं कावेर्यादि- तीर्थेषु तथा शास्त्रतीर्थेषु अवगाहनं कृतवन्तः । रामेश्वरक्षेत्रे समुद्रस्नानकाले प्रक्षुब्धसमुद्रं श्रीमदाचार्याणां स्मरणमात्रेण शान्तमकुर्वन् । ततः मानामधुरीं कुम्भकोणक्षेत्रदिग्विजयञ्च अकुर्वन् । श्रीविद्याधीशतीर्थ- सन्निधानोपेतं राणीबेन्नूरुक्षेत्रं आगमन् । तत्र स्वेषां इहलोकत्यागं दिव्यदृष्ट्या ज्ञात्वा उत्तरतनयो भवितुं कः अर्हः इति चिन्तितोऽभूत् । गुरुराजः स्वाभाविकभक्तिविरक्त्यादिगुणोपेतः । तस्य सद्गुणान् कमले रसाभिज्ञः हंस इव अगृह्णन् । आगामिनि पुष्यमासे पर्वकालं ज्ञात्वा स्वमृत्युं भीष्म इव रुरोध । रहसि गुरुराजमाहूय तं वेदान्तसाम्राज्ये अभिषिक्तमकरोत् । गुरुराजनामायं गृहस्थाश्रमे रूढ्या एव गुरुराज आसीत् पीठारोहणानन्तरं सद्गुरुपीठे स्थित्वा योगेनापि गुरुराजोऽभूत् । श्रीव्याससन्निधियुतं लक्ष्मीसन्निधानयुतं श्रुतिततिभिः गेयमानानां श्रीमन्मध्वाचार्याणां व्यास- सम्पुटं तस्य शिरसि निधाय योगिभिः स्तुत्यपदव्यां तं अभिषिषिचुः । तव हरिपदभक्तिः संवर्धतां, रामस्य अनुग्रहोऽपि संवर्धतां, तव यशः दिक्षु जीयादिति गुरुवराः आशीर्वचनैः अभिषेकञ्चक्रुः । प्रमोद उत्तरपक्षः इति श्रुतिवाक्यानुसारं सत्यप्रमोद इति नाम चक्रुः । ततः पश्चात् पुष्यकृष्णाष्टम्यां तिथौ श्रीसत्याभिज्ञतीर्थाः रामपदं प्राप्ताः । सन्मोदतीर्थाः गुरुविरहजं शोकाग्निं गुरुकृपामृतधारया संशाम्य श्रीरङ्गनाथं भक्त्या ध्यात्वा निखिलजनानां धैर्यं स्थैर्यं च तनोत्विति तं प्रार्थयामासुः ।

द्वितीयसर्गस्य कथासारः- राणीबेन्नूरुक्षेत्रे श्रीविद्याधीशानां सन्निधौ वृन्दावनस्थापनञ्चक्रुः । उचितमेव एतत्कार्यं यतो हि श्रीसत्याभिज्ञतीर्थानाम् आसक्तिः विद्याधीशविरचितग्रन्थेष्वेव आसीत् । ततः समाराधनाख्ययज्ञे विश्वजिद्यागवत् छत्रचामरं विहाय सर्वस्वं प्रददुः । मन्त्राक्षतापात्रमेव छत्रं शङ्खचक्रयुते मुद्रे एव चामरे । यतीनां कृते एते अत्यवश्यकाः ।

अतः तान् विहाय सर्वं दानरूपेण प्रददुः इति भावः । एकं विश्वजिद्यागं समाप्य गुरुप्रियकरं अन्यं दिग्विजयाख्यं विश्वजिद्यागं आरेभिरे । श्रीमदाचार्याणामाज्ञानुसारं सिद्धान्तस्थापननामकं व्रतमनुष्ठातुं सर्वदिक्षु चेरुः । प्रथमतः काशीं जग्मुः । तदा काशीनगरी पण्डितदिग्गजानामालय आसीत् । तत्र गणपतिशास्त्रि, हरेराम, राजेश्वर इत्यादिप्रकाण्डपण्डितैस्सह वादप्रसङ्गः प्राचलत् । श्रीरामः अनन्तगुणपूर्णः , सर्वेशब्दाः तमेव स्तुवन्तीति श्रुतिवाक्यैः युक्तिभिश्च प्रत्यपादयन् । गुरूणां वादवैखरीं दृष्ट्वा सर्वे अभिनव- सत्यध्यानतीर्थाः इति सममानयन् । ततः गयाक्षेत्रं गत्वा तत्र स्वेन आर्जितपुण्यं विष्णुपादे समार्पयत् । तथा करिष्यमाणानि सर्वकर्माणि भगवतः पूजा इति समकल्पयन् । यथा श्रीसत्यनाथतीर्थाः सत्यनिधितीर्थानां कृपाबलात् अनधीत्यापि महाभाष्यं व्याचखुः तथैव मोदगुरवः श्रीसदभिज्ञतीर्थकृपाबलात् शब्दशास्त्रं व्याकुर्वन् ।

राजगोपालपुरे सुब्रमण्यशास्त्रिनामकेन सह वाक्यार्थप्रसङ्गः समभूत् । तदा श्रीसत्यध्यानतीर्थविरचितानां ग्रन्थानां आलम्बनेन मायामते तथा शून्यमते कुत्रापि वैसादृश्यं न वर्तते इति प्रत्यपादयन् । अद्वैततत्त्वसुधायाः खण्डनरूपं न्यायसुधामण्डनाख्यग्रन्थं व्यरचयन् । ग्रन्थेऽस्मिन् प्रमाणप्रमेययोः निर्णयः उक्तः । श्रीरङ्गपत्तने श्रीसत्यध्यानश्रीपादोक्तानुसारमेव सूर्यसिद्धान्तं प्रत्यपादयन् । मद्रपुर्यां शास्त्रिनामकेन सह वाक्यार्थं कुर्वन्तः जीवब्रह्मैक्यवादनिरासमकुर्वन् । राजमहेन्द्रिपुर्यां स्वकृति- शिरोमणेः न्यायसुधामण्डनाख्यस्य ग्रन्थस्य लोकार्पणमकुर्वन् । मोदतीर्थैः मध्वमतमनुसृत्य प्रतिपादिताः अंशाः उल्लिखिताः - विष्णुः सुखस्वरूपः अर्थात् दुःखदूरः, सज्जनानां मोक्षप्रदः, स्वतन्त्रोऽपि भक्तानां वशे स्थितः , नृपवत् संसारभयस्य परिहारकः, कामरहितः, सकलसम्पत्प्रदाता, प्रकाशरूपः, सुन्दरज्ञानानन्दात्मकशरीरयुतः, जीवगणाः तस्य दासाः इत्यादीन् प्रत्यपादयन्[47] ।

एवं मध्वसिद्धान्त-प्रतिपादनव्रतेन वेदान्तसाम्राज्याधिपतिः स्वहृदये वसन्तं श्रीरङ्गनाथं प्रीणयामासुः ।

---

[47] सत्यप्रमोदविजयः- २ स, ६१ श्लो

तृतीयसर्गस्य कथासारः- अस्मिन् सर्गे मळखेडक्षेत्रे कृतस्य सुधामङ्गलमहोत्सवस्य भूरिवर्णनं दृश्यते । अत्र कविवर्यः पुनः हरिं गुरुं मध्वाचार्यं च नत्वा मङ्गलमाचरति । मळखेडक्षेत्रे उषित्वा मध्ववंशस्य भूषणप्रायाः श्रीसन्मोदतीर्थाः सुधामङ्गलमहोत्सवं प्रारेभिरे । यथा शुक्लपक्षस्य द्वितीयदिने विष्णुपदे चन्द्रमाः सुरान् सुधामयकिरणैः तोषयति तथैव निजान् महीसुरान् न्यायसुधावाक्यैः तोषयितुं पोषयितुं च शुक्लपक्षस्य द्वितीयां तिथौ, श्रीजयतीर्थसन्निधाने यतीन्दवः सिद्धतामकुर्वन् । यथा त्रेते श्रीरामः ये ये मम धाम प्राप्तुमीप्सन्तस्ते सर्वे आगच्छन्त्विति आहूतवान् तथा गुरवः ये ये सुधासंश्रवणेच्छवः ते सर्वे जयीन्द्रपादसन्निधौ समायान्त्विति समाघोषयत् । वैशाखमासे यतिपुङ्गवैः उपदेशमाप्तुं सर्व दिक्षु स्थिताः द्विजेन्द्राः मोदतीर्थसकाशमापुः । पक्षद्वयोरपि न्यायसुधां व्याकुर्वन् । गुरुप्रसादप्राप्तिविषये लोभनुन्नाः ज्ञानिनः पण्डितवरेण्याः अत्रागत्य प्रातः गुरोः पादधूलिं धृत्वा धन्याः बभूवुः । लोकमान्या कागिनीनदी मनोनिर्मलत्वदायिनीं सुधातीर्थं वीक्ष्य स्वयं तीर्थवरा इति अहम्भावं तत्याज इति उत्प्रेक्षयति कविः । गुरूणा सह शिष्याः प्रातः कागिन्यां स्नातुमुत्कण्ठिताः उत्साहेन गच्छन्ति स्म । प्रभाते गुरवः नदीमध्ये गत्वा स्नानसङ्कल्पं पठन्तः स्वशिष्यानन्वग्रह्णन् । सहावगाहनसमये न केवलं नदीस्नानं किन्तु पादोदकदण्डोदकसेचनेन तथा गुरूणां कृपाकटाक्षामृतरसैरपि शिष्याः कृतार्थाः बभूवुः ।

टीकाकृत्पादसन्निधौ प्रातः पूजादिकान् कुर्वतः भूसुरान् दृष्ट्वा कृतयुगस्य कलियुगस्य च स्मरणं युगपदभूत् । सर्वे बुधजनाः प्रातः काले एव सर्वनित्यकर्माणि समाप्य सुधा- श्रवाणार्थं सिद्धाः भवन्ति स्म । सुधानदीं तथा विरजानदीं शिष्यैस्सह तराम इति द्विधा सङ्कल्पमकुर्वन् । सुधर्मासभायाः अपेक्षया एषा एव उत्कृष्टाऽऽसीत् । तत्र सुधा अत्रास्ति न्यायसुधा, तत्र सुराः अत्र भूसुराः , तत्र इन्द्रः सभापतिः अत्र जयेन्द्रः सभापतिः ,तत्रत्यं सुधापानं न मोक्षफलकं परं न्यायसुधापानं तु मोक्षफलकमेव । अतः इयं गुरुसभा सुधर्मामत्यशेते । एवं सुधामहोत्सवः नभूतो इतिवत् शोभायमान आसीत् । प्रथम- द्वितीयाध्यायानां अनुवादः प्राचलत् । सुधाश्रवणेन तत्र सुधाश्रवणार्थं समागताः पण्डितोत्तमाः न केवलं मोक्षफलमाप्नुवन् अपि तु पक्वान्नं , पयः, फलादिलाभमपि प्राप्नुवन् ।

फलाध्यायं व्याख्यायन्तः संसारात् मुक्तिं प्राप्तुं उपायानपि बोधयित्वा सुधायाः तथा सर्वमूलग्रन्थानां अणुमङ्गलं व्यदधुः । ज्येष्ठशुद्धत्रयोदश्यां मङ्गलमहोत्समाचर्य महीसुराणां सन्तोषमाततान । पाठं सत्वरं कुर्वन्तोऽपि गहनविषयचर्चासमये असत्वरं कुर्वन्ति स्म । सुधापाठसमये वर्षै वा वातैर्वा स्वस्थानात् न चचाल यतः वर्षाभिमानिदेवता इन्द्रः अत्र जयेन्द्ररूपेण विराजते वाय्ववतारिणः मध्वाचार्याः एषां मूलवंशजाः । अर्थात् तयोः सम्पूर्णनुग्रहपात्राः आसन्निति भावः ।

रथोत्सवस्य वर्णनं क्रियते -उत्सवकाले सुन्दरः रथः तथा रथायमानो गुरुश्च नेत्रोत्सवौ आस्ताम् । रथमिमं अन्यजनाः आकर्षयन्तः पादवेदिकां प्रापयन्ति परमयं गुरुवररथः अन्यान्नाकृष्य मोक्षमार्गं, मोक्षवेदिकां श्रीरामपादमूलं प्रापयति । यथा मोक्षमार्गे चतुर्मुखब्रह्मा मुमुक्षुभिस्सह विरजायां अवगाहते तथा स्वशिष्यैस्सह सुधाख्यनद्यां न्यमज्जदयं ब्रह्मगुरुः । येऽत्र भागमूढवन्तः ते सर्वे परमभाग्यशालिनः यतो हि इतः खलु माङ्गल्यपरम्परा -पात्रं बभूवुः । इयं च मङ्गलपरम्परा-- प्रभातकाले गुरुनमनेन प्रथमं पादधूलिमज्जनं, ततः गुरुभिस्सह कागिनीमज्जनं, जयतीर्थगुरुसन्निधौ नित्याह्नीकानुष्ठानं, व्यासमुष्टिकादिदर्शनं, ततः पश्चात् तत्त्वनिर्णयविचारचर्चा, तदनु चतुर्मुखब्रह्मकरार्चितसीतासमेतमूलरामस्य दर्शनं, तप्तमुद्राधारणञ्च, पश्चात् सर्वपुरुषार्थदायकं तीर्थं स्वीकृत्य तापत्रयपरिहारकं श्रीरामस्य नैवेद्यवरान्नभोगञ्च कृत्वा स्वजीवितं कृतार्थमकुर्वन् तत्रस्थिताः भूसुराः । अनन्तरं पुण्यवद्भिस्सह सम्भाषणं समागमञ्च मोक्षस्य स्मारकमभूत् । गुरुभिस्सह श्रीजयतीर्थाणां संन्निधौ अष्टोत्तरशतप्रदक्षिणनमस्कारान् कृत्वा गुरुभिः कृतां टीकाकृत्पादपूजां च संवीक्ष्य, धन्याः बभूवुः । एवंविध –विविधमङ्गलपात्राणां भूसुराणां अहोभाग्यमिति कविः सहर्षं प्रकटयति । तेषु पुण्यशालिभूसुरेषु कविवर्योऽपि अन्यतम आसीत् । एवं सुधामङ्गलाख्य- राजसूययागे श्रीसन्मोदतीर्थो हयः, श्रीमट्टीकाकृत्पादः संरक्षकः, शिरसि हरिसर्वोत्तमत्वपताकां धरन्तः, सर्वदिक्षु जयदुन्दुभिमाघोषयन् । सर्वे महीसुराः विद्यासूर्यादमृतं स्वीकृत्य विद्वत्पूर्णपयोदाः निजजनपदं प्राप्तवन्तः । नानादेशागतेभ्यः विद्वद्भ्यः करुणालुः करुणापूर्णदृष्ट्या अनुगृह्य

वस्त्राद्यभीष्टान् आशीर्मङ्गलांश्च प्रादुः । एवं वेदान्तसाम्राज्याधिपतिः सिद्धान्तस्थापनव्रतेन श्रीरङ्गनाथं तोषयामास ।

चतुर्थसर्गस्य कथासारः- अस्मिन् सर्गे श्रीवादिराजगुरुसार्वभौमानां दिव्यसन्निधिसोन्दाक्षेत्रदिग्विजयः वर्णितः । वैराग्यादिगुणपूर्णाः गुरवः स्वादीमठस्य श्रीपादानां आमन्त्रणं स्वीकृत्य स्वशिष्यैस्सह जग्मुः । पूर्वं धवलगङ्गायामवगाह्य तटे स्थितं गङ्गाधरं प्रणम्य त्रिविक्रमञ्च नत्वा गङ्गां बहुविधैः सिषेविरे । रामं ध्यात्वा भगवतः गुणान् चिन्तयन्तः पूर्वार्चनविधीन् विधाय सुधाप्रवचने मग्नाः । सुधानद्यां निमग्नाः रामपूजां च निर्विघ्नतया समाप्य ततःपश्चात् धवलगङ्गायां स्नानं कुर्वन्ति स्म । नित्यं स्वादीमठाधीशः श्रीमूलरामपूजां वीक्ष्य निर्माल्यतीर्थपुष्पादीन् स्वीकृत्य हयग्रीवं ध्यायन्तः प्रयान्ति स्म । तत्सुमहोत्सवे सर्वं सुमङ्गलमयमेव ! श्रीवादिराजगुरूणां संन्निधाने, प्रमोदगुरुणा युक्तिमल्लिकापाठः, यतीन्द्रैः श्रवणं मङ्गलमयपरिसरस्य कारणीभूताः । पाठसमाप्त्यनन्तरं प्रतिनित्यं शब्दशास्त्रप्रकारेण राम- शब्देन अवबोध्यमानं तन्महिमानं बोधयन्ति स्म । यथा श्रीमदाचार्यैः 'विश्व' इत्यादिशब्दानां नैकार्थाः बोधिताः तथा नैकानर्थानवगम्य सर्वे हृष्यन्ति स्म ।

द्वापरे द्रौपद्यै सौगन्धिकापुष्पं भीमः प्रादात् । स एव मध्वरूपेण श्रीवादिराजतीर्थेषु सन्निहितः पुनः पञ्चसौरभयुतां युक्तिमल्लिकाम् ददौ । वादिराजश्रीपादाः वादी मध्वः गुरुः स एव राजा यस्य सः इति वादिराज- शब्दस्य निष्पत्तिं प्रादर्शयन् । मध्वः राजा, अहं तस्य भटः इति वदन्तः युक्तिमल्लिकाग्रन्थोऽयं मध्वशास्त्रानुसारी इति समाघोषयन् । युक्तिमल्लिकायां गुणसौरभं, शुद्धिसौरभं, भेदसौरभं, विश्वसौरभं, फलसौरभमिति सौरभपञ्चकं वर्तते । गुणसौरभे हरेः गुणवर्णनं, शुद्धिसौरभे विरोधपरिहारः, भेदसौरभे पञ्चभेदप्रतिपादनं, विश्वसौरभे विश्वस्य सत्यत्त्वं, तथा फलसौरभे भगवतः फलप्रदायकत्वञ्च प्रतिपादितम् । सौरभपञ्चकं उपासित्री प्रानप्रीतिपात्रा भारतीदेवी परशुक्लत्रयत्त्वमवाप इति कथितम् । गुरुवर्याः स्वप्रवचने युक्तिमल्लिकास्थगूढभावान् संवर्ण्य व्याख्यानेऽपि गुणशुद्धिसत्यत्ववैलक्षण्यफलप्रदत्वेत्यादि सुगन्धानवर्णयन् । तत्र शीरूरुमठाधीशेभ्यः

तत्त्वसङ्ख्यान-विष्णुतत्त्वनिर्णयेत्यादिग्रन्थानामुपदेशः । ततः पूर्वं तत्त्वनिर्णयस्यापि बोधनं विहितम् । तत्त्वानां सङ्ख्याविभागादीनां सम्यक् ज्ञानार्थं गुरुभिराज्ञप्तः शिरूरुमठाधीशः वृक्षचित्रमलीलिखत् । यथा पामराणामपि सम्यक् बोधनं भवेत् तथा वृक्षचित्रमुखेन तत्वविभगाः प्रदर्शिताः । श्रीवादिराजतीर्थानां संनिधौ यदा प्रवचनं करोति स्म तदा गुरूणां मुखे विलक्षणकान्तिर्दृश्यते स्म । अतः कविः तर्कयति नूनं गुरुसार्वभौमाः मोदतीर्थेषु सन्निहिताः प्रवचनमकुर्वन्निति । स्वयं निस्संशयाः भूत्वा अदीनवचनैः अन्येषां संशयपरिहारमकुर्वन् । अनेन गुरूणां जगद्गुरु इति नाम अन्वर्थमभूत् । अत्रान्तरे अधिकमासः संप्राप्तः । अज्ञैः मलमास इति उच्यते । किन्तु गुरवः विष्णुसर्वोत्तमत्वप्रतिपादनार्थं अधिकमासस्य अधिकाधिकसमयं यापयामासुः । अतः तस्य पुरुषोत्तममास इति नामान्तरं सार्थकीभूतम् । सप्ताहपर्यन्तं पतिता वृष्टिरपि सदागमप्रवचनवृष्ट्याः विघ्नकारिणी नाभवत् । यतो हि वृष्टिकरः जयेन्द्रः सुधावृष्ट्या प्रीत आसीत् । षट्समयाभिज्ञाः गुरुवर्याः स्वतस्त्वलक्षणस्य परिष्कारं तर्कबद्धमकुर्वन् येन तर्कपण्डिता अपि व्यस्मापयन् । श्रीवादिराजतीर्थाणां राज इति नाम अन्वर्थमेव । युक्तिमल्लिकादिगहनार्थयुतग्रन्थरचनाकाराः वेदान्तसाम्राज्यस्य राजा एव इति समार्थयन् । गुरुवर्याणां व्याख्यानकौशलं दृष्ट्वा स्वादीमठाधीशाः स्वोक्तभावविवृतिं कृतिरूपेण विधातुं विज्ञापयामासुः । अनेन तत्रत्याः सर्वे अतीव तुष्टाः । सन्मोदगुरूणां हृदि स्थित्वा स्वेन भाषितं प्रवचनं श्रुत्वाविवृतिरूपा कृतिः क्रियतामिति श्रीवादिराजतीर्थाणामेव यमादेशः इति कविः तर्कयति । श्रीजयतीर्थमुनिभिः विरचिताः टीकाः श्रीमदाचार्यभावगाः इव , वादकस्य मनोनुकूला वीणाध्वनिरिव, नाटककृतिमनुसृत्य नटनचेष्टाः इव युक्तिमल्लिकानुसारिणी एव विवृतिरभूत् । युक्तिमल्लिकायाः व्याख्याने सुरेशतीर्थाः एव कुशलाः । अतः तेषां टिप्पणीमुपजीव्य एव ममेयं विवृतिः इति समाघोषयन् सन्मोदतीर्थाः ।

वादिराज-तीर्थविरचित- उपन्यास रत्नमालादिकृतीनां श्रवणोत्सुकाः विश्वोत्तमतीर्थाः रात्रावागत्य श्रुण्वन्ति स्म । स्वादीक्षेत्रं वादिराजतीर्थ-सन्निधानपात्रं अथ च मोदतीर्थ-विश्वोत्तमतीर्थ- लक्ष्मीवरतीर्थ- मुनित्रयाणां सङ्गमेन आहवनीय, गार्हपत्य, दाक्षिणाग्नीति

अग्नित्रयाणां सन्निधानेन यथा अग्निशाला पवित्रतमा तथैव पवित्रतममभूत् । स्वादीक्षेत्रे कश्चन अहङ्कारी कपटभिक्षुः कैलासं गच्छामीत्युक्त्वा पैशाचसिद्ध्या उत्पतन् मणिकुण्डलादियुतो भूत्वा जनान् वञ्चयति स्म । तदा वादिराजदूतः भूतनाथः उत्पतन्तं तं भूमौ निपात्य दुर्दशां प्रापयत् । प्रवचनावसरे कुमतान् अनायासेन मोदतीर्थाः खण्डयन्ति स्म । तदा ज्ञानिश्रेष्ठाः भूतनाथेन पराजितस्य कपटभिक्षुवृत्तान्तस्य दृष्टान्तं दत्वा कपटयतिं यथा श्री वादिराजदूतः भूतनाथः न्यपातयत् तथाइव मायया ऊर्ध्वं जिगमिषुं निरुध्य न्यपातयदिति सर्वान् हासयन्ति स्म । पूर्णचन्द्रकान्त्या वारिराशिरिव मोदतीर्थाणां सन्निधानेन जनप्रवाहोऽपि आगाध आसीत् । एवं निरन्तरमहोत्सवैः , सज्जनाः हर्षतुन्दिलाः अभूवन । तन्मासचतुष्टयं क्षणार्धमिव अतीतम् । सर्वः किञ्चित् स्वरूपसुखमपि अनुबभूव । चातुर्मास्यं प्रवचनयज्ञं च समाप्य शिष्यऋत्विग्भिस्सह धवलगङ्गायां अवभृथस्नानं चक्रुः । प्रवचनं श्रीवादिराजतीर्थाणां चरणे समर्प्य करिष्यमाणां विवृतिपूजाञ्च सङ्कल्पयामास । वादिराज इति नामधेयं मध्वशास्त्रस्य नव- प्रमेयैस्सह समन्वयंकृत्वा तत्रत्यान् मुनिवर्यान् तथा विदुषश्च तोषयामासुः । वादिराजतीर्थाः हयास्यस्य न केवलं बाह्यपूजां किन्तु श्रेष्ठां आन्तरिकपूजामपि अकुर्वन्निति प्रत्यपादयन् । चातुर्मास्यकाले यतीनां सञ्चारः निषिद्धः विहितश्चैकत्रवासः । तादृशं चातुर्मास्यव्रतं परिसमाप्य सीमोल्लङ्घनोत्सुकाः बभूवुः । सीमोल्लङ्घनसमये भगवतः रामस्य देशकालगुणतः अतिक्रमं स्वहृदि अचिन्तयन् । तदा काणियूरुमठाधीशाः तत्र समागत्य सुधानुवादार्थं पाजकमागन्तुं आमन्त्रणं प्रददुः । वादिराजगुरूणां सन्निधानं त्यक्त्वा गच्छन्तं हृदि तान्तं सन्मोदतीर्थं श्रीवादिराजतीर्थाः सदा हृदि स्वसन्निधानं संस्थाप्य अनुग्रहञ्चक्रुः। ततः विष्णोः सर्वोत्तमत्वं प्रतिपादयितुं पाजकक्षेत्रं जग्मुः ।

पञ्चमसर्गस्य कथासारः- पञ्चमसर्गः नानावृत्तोपशोभी । अस्मिन् सर्गे गुरुभिः कृतानां दिग्विजयानां वर्णनमस्ति । पृथुलमतिरिति शब्दात् पूर्णप्रज्ञः श्रीमदानन्दतीर्थः ग्राह्यः । तेषामवतरणादितोऽपि पवित्रतां प्राप्ते पाजकक्षेत्रे सन्मोदतीर्थाः सुधाप्रवचनं समाप्य सुकृतान्तं श्रीकृष्णस्य पादपद्मयोः अर्पयामासुः ।स्वगुरूणामादेशं हृदि निधाय

प्रियशिष्यवात्सल्यं च दधतः मोदतीर्थाः दिग्विजयं प्रचक्रमिरे । समुद्रसेतावक्गाहनसमये नाथमध्व- संस्मरणं कुर्वन्तः नूनं मध्वकृतशास्त्रं संसारसमुद्रस्य पारसेतुरित्यचिन्तयन् । तथा मच्छिष्यान् संसारसागरादुद्धर्तुं मां सेतुभूतं कुरु इति प्रार्थयामासुः । नेहनानास्ति इत्यादि श्रुतीनामुचितार्थानुपवर्ण्य गुरवः गायनकोविदैः संस्तूयमानाः बभूवुः । रामेश्वरक्षेत्रे रामेश्वर इति शब्दस्य उचितविग्रहवाक्यं चक्रुः । रामः एव ईश्वरः विभुः यस्य सः बहुव्रीहि- विग्रहः भवेत् । यदि तत्पुरुषसमासः क्रियते चेत् शास्त्रविरोधः स्यात् । अतः तादृशः वैरबुद्धिः नोचितमिति प्रत्यपादयन् । एवं शास्त्रैः प्रतिपादितं हरेःसर्वोत्तमत्त्वं प्रतिपाद्य तत्क्षेत्रस्य देवतायाः रुद्रस्य कृपापात्राः बभूवुः । ततः कन्याकुमारीं जग्मुः । तत्रत्या देवी कन्या नाम्नी । कन्या नाम भर्तृरहिता वा अविवाहिता इति । एवं वेदाः अपि अकर्तृकाः अपौरुषेयाः इति प्रत्यपादयन् । कन्याकुमारीति नामधेयेनैव वेदानां अपौरुषेयत्वं बोधयामासुः । ततः मानामधुरीं गत्वा श्रीसत्यप्रियतीर्थानां पादयोः बहुमानपूर्वकं आदरपूर्वकं नेमुः । कुवादिनां निरासकः जयस्तम्भ इव विराजमानानां श्रीविजयीन्द्रतीर्थश्रीमच्चरणानां संन्निधिं कुम्भकोणक्षेत्रमगमन् । तत्र ध्यानगुरुभिः क्षेत्रज्ञ - शब्दस्य वाक्यार्थस्य प्रसङ्गमस्मरन् । यथा मदगजान् केसरी जयति तथैव अभिनवानन्दतीर्थाः इतिप्रथिताः श्रीसत्यध्यानतीर्थाः वादिनः विजित्य गीतायां जीवेश्वरभेद एव उक्तः इति समर्थयामासुः ।

अथ मोदगुरवः विजयीन्द्रतीर्थानां पादयोः स्वरचितां विजयीन्द्रविजयवैभवाख्यां सुकृतिं अर्पयामासुः । ततः कावेरीनद्या संपरिवीतं कावेर्याः हृदि स्थितं रङ्गनाथं श्रीरङ्गपुर्यां आत्महृदि संस्थितिं कुर्विति ययाचिरे । श्रीमुष्णे भूवराहं समर्च्य प्राप्तानुग्रहाः । नाचारक्षेत्रे गुरुभक्तेः मूर्तिमानिव स्थितानां गुरुकारुण्येनैव पाण्डित्यं प्राप्यते इति प्रतिपादयतां श्रीसत्याभिनवतीर्थानां कृपां प्रापुः । पञ्चाभिनवकाराः इति ख्यातानां श्रीसत्यनाथतीर्थानां संन्निधिं वीरचोळपुरं प्राप्य पञ्चात्मके मूलरामे स्थिरभक्तिं प्रार्थयामासुः । गुरुवर्याः सत्यनाथतीर्थविरचितं अभिनवताण्डवाख्यग्रन्थं मुद्रापयित्वा गुरुचरणयोरर्पयामासुः । तिरुकोयिलूरुक्षेत्रे श्रीरघूत्तमतीर्थान्नेमिरे । रघूत्तमतीर्थाः श्रुतिस्मृतिरक्षकाः दुर्वादीन्

तिरस्कृतवन्तः । नमस्कारसमये गुरुगुणचिन्तनेन रोमाञ्चिताः बाष्पसितनेत्राः बभूवुः । नमतां कामधेनुं भजतां कल्पवृक्षं चिन्तयतां चिन्तामणिं श्रीरघूत्तमतीर्थानस्तुवन् । अत्र भवत्सन्निधावेव शश्वत्कालं स्थित्वा भवद्भिः रचितस्य भावबोधग्रन्थस्य ज्ञानं ददात्विति प्रार्थयामासुः । आतपवर्षादीन् सह्यमानाः भवन्तः मामपि अनुग्रहीत्वा द्वन्द्वसहनशक्तिं ददन्त्विति ययाचिरे । एवं रघूत्तमगुरून् संपूज्य तत्पादान्ते स्ववासं संप्रार्थ्य प्राणत्यागानन्तरमपि तत्सन्निधावेव उवास । काञ्चीं गत्वा वरदराजं प्रणम्य तुच्छविषयाननिच्छन्तः प्रवर्धमानां भक्तिं ययाचिरे । हरिभक्तिविषये तथा भगवतः अनुग्रहप्रप्तिविषये गुरूणामलंबुद्धिर्न जाता । अनयोः विषये अतृप्तिः मुख्यप्राणवंशे जातानां स्वभाव एव तथा सुराणामपि स्वभाव इति कविः वक्ति । ततः वेङ्कटाचलं गत्वा स्वगुरून् सत्याभिज्ञतीर्थान् सस्मरुः । ततः मद्रपुरीं (चेन्नै) गत्वा तत्रत्यं मठं जीर्णोद्धारञ्चक्रुः । ततः गयाक्षेत्रं गत्वा विष्णुपादं नमस्कृत्य अगण्यं पुण्यमर्पयामासुः । तदा गयाधिपालाः गुरूणां शिबिकामूढवन्तः । त्रिवेणीसङ्गमे तीर्थपादं श्रीमूलरामं समर्च्य, श्रीमदान्दतीर्थानां शास्त्रोपदेशं विधाय , तीर्थत्रयस्य सङ्गमां त्रिवेणीं पञ्चवेणीं चक्रुः । हरिद्वारक्षेत्रे गीतातात्पर्यस्य तथा गीताभाष्यस्य च उपदेशं कृत्वा मोक्षस्य द्वारमुदघाटयन् । ततः दुर्विषयातिदूरैः धीरैः संसेवितं दोषरहितं बदरीक्षेत्रं जग्मुः। तत्र प्रातः अत्यन्तशीतलायां गङ्गायां स्नात्वा हरिध्यानपरा भूत्वा वायुसान्निध्यं दर्शयामासुः । नरनारायणपर्वतौ दृष्ट्वा मध्वान्तर्गतवेदव्यासं इन्द्रांशान् जयतीर्थांश्च सस्मरुः । तत्र कृष्णगीतां सूत्रभाष्यञ्च उपादिदेशुः येन नरनारायणौ सम्प्रीतौ । द्वारकां प्राप्य द्वारकावत् हरिनिवासां, पुरा एव पूर्णा अपि व्यासेनोपदिष्टं ज्ञानसम्पत्तिं पुनर्धरन्तीं मध्वमतिं समस्मरद्गुरुवर्यः । गोमतीनद्यां शास्त्रनद्याञ्च अवगाह्य कृष्णं वासिष्ठकृष्णं च तोषयामासुः । सञ्चारार्थं यत्र यत्र जग्मुः तत्र तत्र वृष्टिरभवदित्यनेन वृष्टितीर्था (मळेस्वमि इति कन्नडभाषया) इत्येव प्रसिद्धाः बभूवुः । समस्तद्वन्द्वान् तृणीकृत्य तपश्चरित्वा रामं तोषयित्वा तत्पदमापुः । सदाचारनिष्ठाः गुरवः कदाचिदपि लोकप्रियतामाहत्य प्राचीनपरम्पराप्राप्तं सदाचारं नालङ्घयत् । बागलकोटीक्षेत्रे स्वगुरूणां श्रीसत्याभिज्ञतीर्थाणां समाराधनोत्सवञ्चक्रुः । एवं आसेतुहिमालयपर्यन्तं सर्वत्र दिग्विजयं कृत्वा रामं तुतोषुः ।

षष्ठसर्गस्य कथासारः- कुसुमूर्तिपुरे भूतबाधोपहतं बालकं तीर्थप्रोक्षणेन उद्धारयामासुः । ततः सोन्नि-क्षेत्रमेत्य गुरुवराः वृद्धगङ्गा इति प्रथितायां गोदावर्यां स्नातुं द्वादश-स्तोत्रं पठन्तः गोदामाचेरुः । यदा गोदावर्यां जले न्यमङ्क्त तदा कश्चित् मृत्पिण्डः लब्धः । तदनु तदन्तस्थं सुवर्णकृष्णविग्रहं प्रापुः । अत्यन्ततुष्टाः मुनिवराः द्वादशस्तोत्रं पठन्तः तमानीय पूर्णप्रज्ञतीर्थाणां चरितं सस्मरुः । येषामनुग्रहलेशमात्रेण भाग्यमिदं संप्राप्तं तेषां विभूतिरूपं स्तोतुं को वा शक्तः इति कविः अभिप्रैति । अथ कदाचित् स्नानार्थं प्रवाहे अवतीर्णे गुरुवरे दण्ड-काष्ठः कथञ्चित् प्रभृष्टः । परिचारकैः विविधोपायैः अन्विष्टोऽपि न लब्धः । तदा गुरुभिः योगदृष्ट्या अस्मिन् स्थल एव वर्तत इति निश्चयेन उक्तम् । परिचारकैः अन्विष्टः तत्रैव प्राप्तः दण्डकाष्ठः । एकदा श्रीशैले निबिडवने सञ्चरतः गुरोरभिमुखे कश्चित् व्याघ्रः आपतत् ।तदा निर्भीताः लीलया तं दूरतः पलायित्वा शिष्यान् भयात् रक्षयामासुः । एवं श्रीमध्वस्य अनुग्रहात् विचित्रलीलां दर्शयन्तः गुरुवराः स्वस्मिन् मध्वसन्निधिं दर्शयामासुः ।

आलङ्कारदृष्ट्याध्ययनम्

मनोज्ञार्थालङ्कारैः कर्णमधुरशब्दालङ्कारैः मनोहरशैल्या निर्मितमिदं काव्यं श्रीसन्मोदतीर्थानां चरितं दृग्गोचरं कारयति । काव्यास्वादन-वेलायां बहुत्र सुमध्व-विजयस्य स्मरणं सहृदयस्य भवति । पञ्चमः सर्गः नानावृत्तमयः । एकाक्षरी, श्रीबन्धात्मकश्लोकः कविकौशलस्य दर्शनं कारयन्ति । वीराद्भुतरसयोः मेलनमत्र दृश्यते । वादिदिग्विजयवृत्तान्तपठनसमये वीररसः तथा यतीनां अलौकिकसामर्थ्यादिवर्णनसमये अद्भुतरसप्रतीतिः । कदाचित् हास्यकरुणरसयोरपि प्रतीतिर्दृश्यते।

शब्दालङ्काराः

प्रथमसर्गे उपजातिवृत्ते श्लोकाः निबद्धाः एवं वसन्ततिलका, मन्दाक्रान्ता, अनुष्टुबादिवृत्ताः दृश्यन्ते सर्गान्ते । द्वितीयसर्गः अनुष्टुपि बद्धः अन्ते शर्दूलविक्रीडितं दृश्यते । तृतीयसर्गस्तु वंशस्थे निबद्धः अन्ते हरिण्यां शार्दूलविक्रीडिते च निबद्धाः । चतुर्थसर्गस्तु वसन्ततिलकायाम् निर्मितः । पञ्चमः सर्गः नानावृत्तमयः । अत्र प्रयुक्तानि छन्दांसि -अर्या ,

गीति, वैतालिकं, औपच्छन्दसिकं, पथ्यावक्रं ,एकाक्षरं च । वृत्तानि- विद्युन्माला, तोटकं भुजङ्गप्रयातं,इन्दुवदना, रथोद्धता, स्वागता, द्रुतविलम्बितं, दोधकं, शलिनी, गाम्भीर्यं, वसन्ततिलका, शिखरिणी, मणिमाला, प्रमाणिकं, माणवकं, वातोर्मी, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजाति, स्कन्धार्या, चपला, युग्मविपुला, मन्दाक्रान्ता, स्रग्धरा, रुचिरा, पृथ्वी, उद्गता, शार्दूलविक्रीडितं, इति । अत्र केचनश्लोकाः शब्दालङ्कारचमत्कारं दर्शयितुं दत्ताः ।

एकाक्षरी

नुर्नानेनोऽनेन नूनं ननुन्नेऽन्नानने न नुः ।
नानाऽऽनने न नानेनेऽनूनानेनानने ननु ॥[48]

अत्र पदच्छेदः - नुः, नाना, इनः, अनेन, ननुन्ने, अन्नानने, न नुः, नानानने, न ,नाना, इने, अनूनानेनने, ननु

एवं श्रीबन्धश्लोकः

श्रीव्याससंनिधियुतं शुभसंनिकायम् ।
लक्ष्म्यालयं श्रुतिततिश्रुतमध्वहासम् ।
संवादवानथ निधाय तदुत्तमाङ्गे ।
योगेशगेयपद एनमथाभ्यषिञ्चित् ॥[49],[50]

चक्रबन्धः

विष्णुः सत्सुखकेवलः शुभधियां श्रीसुप्रसादप्रदः ।
भक्त्यात्यर्थवशस्थितो हि भवभीहृत्कृत्यराजप्रभः ।
निष्कामो विभवप्रदः स भगवान् ज्योतिः सुकायः सदा ।
दासा जीवगणा इदं गुरुवरः सोऽसाधयत्सर्वदा ॥[51][52]

---

[48] सत्यप्रमोदविजयः -५ स, ६ श्लो

[49] सत्यप्रमोदविजयः -१ स, ४९ श्लो

[50] परिशिष्टः ४

[51] सत्यप्रमोदविजयः -२ स, ६१ श्लो

उपमेयाधिक्यपर्यवसायी व्यतिरेकालङ्कारः

लोके पयोदा गुरवोऽपि पूर्वं ।
वृष्ट्याऽमृतानाम् लघवो भवन्ति ।
चित्रं बुधाब्दास्त्वभिमर्षणेन ।
ज्ञानाभिवृद्ध्या गुरवः प्रजाताः ॥[53]

लोके पयोदाः वृष्ट्यनन्तरं लघवः भवन्ति । किन्तु बुधपयोदाः ज्ञानाभिवर्षणेन इतोऽपि गुरवः प्रजाताः इति उपमानस्य पयोदस्य अपेक्षया उपमेये बुधपयोदे आधिक्यस्य वर्णितत्त्वात् उपमेयाधिक्यपर्यवसायी व्यतिरेकालङ्कारः । बुधपयोद इत्यत्र ताद्रूप्यरूपकः ।

<u>**अभेदरूपकालङ्कारः**</u>

पाषण्डदुष्टमतखण्डनकांस्यघण्टा-
नादेन राक्षसगणान् विनिरस्य दूरात् ।
तीर्थप्रबन्धसुकृतेः कलशोदकेन ।
श्रीवाजिवक्त्रमभिषिञ्चति नित्यदैव ॥[54]

मालामुपन्यसनरत्नमयीं समर्प्य
ग्रन्थेन लक्षपरमाभरणाभिधेन ।
स्रग्भिश्च पञ्चविधसौरभयुक्तयुक्ति-
सन्मल्लिकादिरचिताभिरलङ्करोति ॥[55]

---

[52] परिशिष्टः ५

[53] सत्यप्रमोदविजयः -३ स, ४९ श्लो

[54] सत्यप्रमोदविजयः -४ स, ४८ श्लो

[55] सत्यप्रमोदविजयः -४ स, ४९ श्लो

श्रीरुक्मिणीशविजयं परमामृतान्नम् ।
श्रीशाय वाजिवदनाय च संनिवेद्य ।
निराजयत्यपि सुकृष्णवराष्टकेन
गद्यैश्च पद्यकुसुमैरपि मन्त्रपुष्पम् ॥[56]

श्रीवादिराजतीर्थैः क्रियमाणां आन्तरिकपूजां वर्णयति । आन्तरिकपूजा नाम ग्रन्थनिर्माणद्वारा पूजा इति । पाषण्डमतखण्डनग्रन्थः कांस्यघण्टा , नित्यपूजाविधौ घण्टानादेन राक्षसाः दूरीकृताः तथैव ग्रन्थेनानेन पाषण्डाः राक्षसाः दूरीकृताः इति घण्टानादसादृश्यमुक्तम् । तीर्थप्रबन्धग्रन्थेन अभिषेकं कुर्वन्ति स्म । रत्नमालाख्यग्रन्थेन मालार्पणं, लक्षाभरणख्येन आभरणादिभूषणसमर्पणं, पञ्चसौरभयुत- युक्तिमल्लिकाख्य-वनमालासमर्पणं, रुक्मिणीशविजयाख्यं परमान्ननिवेदनं, कृष्णाष्टकाख्य नीराजनं तथा गद्यपद्यकुसुमाञ्जलिं समर्पयामासुः इति । अत्र ग्रन्थानां तथा पूजाविधेश्च अभेदः उक्तः । अतः अभेदरूपकालङ्कारः ।

अत्र कविः चमत्कारपूर्वकं उपमानोपमेयस्य चयनं कृतवान् । यथा 'तीर्थप्रबन्ध' इत्याख्यस्य ग्रन्थस्य कलशोदकेन सह उपमानोपमेयभावः । तीर्थशब्दात् तोयं ग्राह्यं ग्रन्थे तीर्थशब्दस्य पवित्रतीर्थक्षेत्राणि ग्राह्याणि । अतः तीर्थप्रबन्धनामकस्य कलशोदकत्वमुचितम् । एवं रत्नमालाख्येन मालार्पणमित्याद्यपि ग्राह्याः ।

<u>ताद्रूप्यरूपकालङ्कारः</u>

वाग्देवतासुरभियुक्तसुमल्लिकायाः ।
वल्लीपदेतिगदिता प्रतिसौरभान्ते ।
तत्सौरभं सदनुभाष्यसरोजगन्धात् ।
व्यासोक्तसूत्रसरसीरुहगन्धमूलात् ॥[57]

---

[56] सत्यप्रमोदविजयः -४ स, ५० श्लो

युक्तिमल्लिकाख्यग्रन्थः सौरभैः निबद्धः । अतः कविः एवं वर्णयति- युक्तिमल्लिकायां श्रीवादिराजगुरवः सौरभान् रचयामासुः । प्रतिसौरभान्ते 'वाग्देवता वल्लीपदगदिता' इति उक्तं । अतः तत्सौरभं तु अणुभाष्यकमलस्य गन्धादुत्पन्नम्, तद्गन्धस्तु व्यासविरचित-ब्रह्मसूत्रगन्धमूलादिति । अत्र अणुभाष्यग्रन्थस्य तथा कमलस्य उपमानोपमेयभावः । तयोः ताद्रूप्यमुक्तमिति हेतोः ताद्रूप्यरूपकम् । युक्तिमल्लिकाख्यग्रन्थः अणुभाष्यमनुसरतीति भावः ।

<u>विशेषोक्त्यलङ्कारः</u>

सप्ताहमेकविधया पतिताऽपिवृष्टि
र्नाविघ्नयन्ननु सदागमसंप्रवृष्टिम् ।
एतत्तथैव जलवृष्टिकरो जयेन्द्रः ।
संप्रीयतेऽधिकमागमसंप्रवृष्ट्या ॥[58]

अत्र सप्ताहपर्यन्तं अतिवृष्टिकारणादपि प्रवचनादिकार्येषु विघ्नः नाभूदिति वर्णितम् । अतः कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे इति लक्षणत् विशेषोक्त्यलङ्कारः । अत्र वृष्टिशब्दस्य चमत्कारपूर्णाआवृत्तिर्दृश्यते । एकत्र जलवृष्टिः, अन्यत्र ज्ञानवृष्टिः । जलवृष्ट्या ज्ञानवृद्धेः विघ्नं नाभूत् यतः वृष्टेः अभिमानिदेवः इन्द्रः । स एव श्रीमट्टीकाकृत्पादरूपेण अवतीर्णः । तेन विरचितस्य सुधाग्रन्थस्य प्रवचनवृष्टिः तस्य प्रिया एव आसीत् । अतः विघ्नकारिणी नासीदिति वर्णितम् । उत्प्रेक्षा अपि दृश्यते ।

<u>उपमालङ्कारः</u>

सन्तापनं कुमतघोरतमः प्रियाणां
आह्लादनं त्रिजगतां प्रकाशनञ्च ।
तिस्रो हि शक्तय इमा भुवि राज नाम्नो ।

---

[57] सत्यप्रमोदविजयः -५ स, १० श्लो

[58]सत्यप्रमोदविजयः -४ स, २५ श्लो

वृत्तौ बुधैः खलु निमित्ततया प्रसिद्धाः ॥[59]

संवादिनां सुसमयस्य सतां जनानां ।
आह्लादकः शुभगतेः प्रविकाशकश्च ।
दुर्वादिनां कुमनसां भृशतापकश्च ।
स्थाने ततोऽस्य विदितं शुभराजनाम ॥[60]

श्लोकद्वये वादिराजतीर्थाणां तथा लोकप्रकाशकस्य च उपमानोपमेयभावः उक्तः । भुवि राजा इति प्रसिद्धस्य शक्तित्रितयमुक्तम् । सन्तापनं आह्लादनं प्रकाशनञ्च । सूर्यः तमसः सन्तापनेन, प्रियाणामाह्लादनेन, तथा जगतः प्रकाशनेन पृथ्व्याः राजा इति प्रथितः । श्रीवादिराजश्रीमच्चरणा अपि ग्रन्थचर्चायां संवादीनामाह्लादकत्वं, दुर्वादीनां तपनं, मोक्षमार्गस्य प्रकाशनं च कृत्वा राजा इति नाम अन्वर्थीकृतवन्तः इति भावः । आह्लादकत्वतापनप्रकाशनेति समानगुणधर्माणां सादृश्यम् उक्तत्वात् उपमालङ्कारः उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः इति लक्षणात् ।

<u>उत्प्रेक्षालङ्कारः</u>

यत्कृष्णपक्षात् प्रविभिद्य शुद्धं पक्षं विजानाति कलङ्कमूर्तिः ।
स्थाने ततोऽस्यापरपक्षकाले चन्द्रस्य गावः क्रमशो ह्रसन्ति ॥
व्यासस्य कृष्णस्य य एव पक्षः स एव शुद्धस्त्विति निश्चयेन ।
व्याकुर्वतो न्यायसुधां यतीन्द्रगावः पुनर्नित्यविवृद्धिशीलाः ॥[61]

अत्र उपमानस्य चन्द्रमसः कलङ्ककारणमुक्त्वा तस्मात् उपमेयस्य यतीन्द्रस्य उत्तमत्वमुक्तम् । चन्द्रमाः कृष्णपक्षः शुक्लपक्षात् भिद्यते इति चिन्तयित्वा कृष्णपक्षे ह्रासं प्राप्नोति । अत एव तस्य कलङ्कता इति वर्णितमित्यनेन 'सम्भावना स्यादुत्प्रेक्षा' इति

---

[59] सत्यप्रमोदविजयः -४ स, २८ श्लो

[60] सत्यप्रमोदविजयः -४ स, २९ श्लो

[61] सत्यप्रमोदविजयः -३ स, १०,११ श्लो

लक्षणात् उत्प्रेक्षालङ्कारः । उपमेयस्य आधिक्यं वर्णितमित्यनेन उपमेयाधिक्यपर्यवसायीव्यतिरेकालङ्कारोऽपि दृश्यते ।

<u>स्वभावोक्त्यलङ्कारः</u>

नदीतटं श्रीसदभिज्ञपुत्रो यावद्धि सिस्नासुरगात् पवित्रः ।
तावत्सहानेन निमज्जनोत्कः समापतच्छिष्यगणोऽनुरक्तः ॥[62]

अत्र कागिनीतीरे गुरुशिष्याणां स्नानादिवैभवं वर्णितम् । यदा श्रीमोदतीर्थाः स्नातुमुद्युक्ताः तदा सर्वे शिष्याः गुरुपादोदक, दण्डोदकप्रोक्षणोत्सुकाः तत्रागत्य स्नान्ति स्म इति । गुरुकारुण्यप्राप्त्यर्थं सदैव उत्कण्ठः शिष्याणां स्वभावः अतः स्वभावोक्त्यलङ्कारः ।

<u>विरोधाभासालङ्कारः</u>

सुसत्वरस्सन्नपि तत्त्वचर्चाप्रसङ्गतोऽत्यन्तमसत्वरश्च ।
पाठस्ततोऽस्यास निदर्शनं न पिपीलिका नापि च वैनतेयः ॥[63]

यतीन्द्रस्य पाठनक्रमः वर्णितोऽत्र । सत्वरं पाठयन्तोऽपि यदि गम्भीरविषयस्य चर्चा आसीत् तदा सावधानेन कुर्वन्ति स्म । अतः मन्दगतिः पिपीलिका वा शीघ्रगः गरुडो वा अस्य निदर्शनं नाभूदिति भावः । विरुद्धगतीनामेकत्र वर्णनेन विरोधाभासालङ्कारः ।

ऐतिहसिकदृष्ट्या अध्ययनम्

कविः काव्यनायकस्य समकालीन एव । अतः नैकेषु सन्दर्भेषु स्वयं कविवर्यः साक्षी आसीत् । अतः काव्यस्यास्य ऐतिहासिकप्रामाण्यं बलवत्तरम् । केषाञ्चित् वृत्तान्तानां वर्णनं यथा इतिहासं कृतम् । प्रथमसर्गे श्रीसत्यध्यानतीर्थानां दिग्विजयस्य प्रमुखवृत्तान्ताः कथिताः । सेतुतीर्थे प्रक्षुब्दसमुद्रं शान्तमकुर्वन्, कुम्भगोणे क्षेत्रज्ञ -विषये कृतः वाक्यार्थः इदीनां कथनं दृश्यते । सत्यध्यानविजयेऽपि अमीषां विस्तृतकथा दृश्यते । द्वितीयसर्गे

---

[62] सत्यप्रमोदविजयः -३ स, १४ श्लो

[63] सत्यप्रमोदविजयः -३ स, ३० श्लो

गणपतिशास्त्रिणा[64] सह हरेराम, राजेश्वरेत्यादिपण्डितैस्सह कृतस्य वाक्यार्थस्य उल्लेखः वर्तते । चतुर्थसर्गः विशेषतः नैकान् वृत्तान्तान् कथयति । स्वादीमठस्य पीठाधिपतिनां आह्वानं स्वीकृत्य स्वादीक्षेत्रं जग्मुः श्री मोदतीर्थाः । तत्र तेषां नित्यकर्मानुष्ठानसहितयुक्तिमल्लिकायाः रचना इत्यादि वृत्तान्ताः श्रीपादानां ज्ञानपाण्डित्यादिविषयान् निरूपयन्ति । पञ्चमसर्गे श्रीपादानां विविधक्षेत्रदिग्विजयं वर्णितम् । आसेतुहिमाचलं दिग्विजयं कृत्वा सर्वत्र मध्वमतप्रचारं कृत्वा , हस्तप्रतिग्रन्थान् सङ्गृह्य[65] अपूर्वग्रन्थानां शेवधिं निर्मापितवन्तः । बेङ्गलूरुनगरे जयतीर्थविद्यापीठं[66] निर्माय सहस्राधिकविद्यार्थीनां आश्रयदातारः बभूवुः । एतादृशविषयानामुल्लेखः न केवलं इतिहासं निरूपयति किन्तु अस्माकं स्फूर्तिदायकोऽपि भवति । षष्ठसर्गे यतिपुङ्गवस्य महिमानं प्रदर्शयन् कश्चित् वृत्तान्तः कथितः । कुसुमूर्तिपुरे कश्चित् विप्रः शोकेनार्तः तत्रागतान् मोदगुरून् प्रणम्य एवमवदत्- भूतबाधायुतः मम शिशुः इदानीं तिरोहितोऽभूत् । सर्वत्र अन्विष्टोऽपि न दृष्टः इति । तं दृष्ट्वा करुणालवः गुरवः क्षणमिव ध्यानमग्ना भूत्वा अस्यां दिशि गत्वा वृक्षमूले शिशुरस्ति तीर्थं सेचय इति आदिदेश ।आदेशानुसारं गत्वा वृक्षमूले निश्चेष्टं शिशुं बन्धवः अपश्यन् । तीर्थसम्प्रोक्षणनन्तरं पुनः लब्धसंज्ञं शिशुं गुरोः चरणस्थले स्थाप्य पुनः पुनः कृतज्ञताभावेन नेमुः । सोन्निक्षेत्रे लब्धस्य कृष्णविग्रहस्य दर्शनं अद्यापि संस्थानपूजायां दृष्टारो भक्ताः धन्याः भवन्ति ।

सैद्धान्तिकदृष्ट्याध्ययनम्

षष्ठसर्गे मोदतीर्थैः सोन्निक्षेत्रे गोदावर्यां प्राप्तस्य सुवर्णकृष्णविग्रहस्य प्रसङ्गः उल्लिखितः । अनेन वृत्तान्तेन भगवतः स्वातन्त्र्यं तथा ईश्वरप्रसादादेव मोक्षः इति प्रमेयद्वयस्य प्रतिपादनंदृश्यते । इतः पूर्वमपि नैके पण्डिताः गोदावर्यां निमग्नाः । किन्तु तैः न प्राप्तः विग्रहः । अत एव यम् एष वृणुते तेनैव लभ्यः इति श्रुतिवाक्यं सिद्धम् । स्वरूपानन्दाविर्भावस्य सप्त आवरकाः । तेषु अन्तिमः ईश्वरेच्छा । जीवस्य साधनानि

---

[64] येऽलङ्कृत्य सुधां वचोभिरमलां संरुज्यशास्त्रिक्रमं.....-वरदाचार्यकृतसत्यप्रमोदाष्टकम्-३ श्लो
[65] प्राचीनैर्ग्रथितान् सुशास्त्रसमयान् सङ्गृह्य संशोध्य ये..-वरदाचार्यकृतसत्यप्रमोदाष्टकम्- श्लो६
[66] प्राज्ञानाममृतं तथा हि जयसध्यानालये बोधनम्....-वरदाचार्यकृतसत्यप्रमोदाष्टकम्-६ श्लो

सम्पूर्णान्यपि यदि ईश्वरेच्छा नास्ति तर्हि न मोक्षप्राप्तिः मच्चित्तस्सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि[67] , मत्प्रसादादवप्नोति शाश्वतं पदमव्ययम्[68] इत्यादि गीतावाक्यानि प्रमाणम् ।

एवं यतिपुङ्गवानां जीवनाधरित-लघुकाव्यानि आलङ्कारिकदृशा मनोहारीणि, ऐतिहासिकदृशा प्रमाणभूयिष्ठानि, सैद्धान्तिकदृशा सुबोधकानीत्यत्र न कापि संशीतिः ।

[67] श्रीमद्भगवद्गीता- १८ अ, ५८ श्लो
[68] श्रीमद्भगवद्गीता- १८ अ, ५६ श्लो

षष्ठः अध्यायः

६.चम्पूकाव्यविभागः

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते इति साहित्यदर्पणे विश्वनाथः । चम्पु-चम्पर्यात सुललितं चलति इति धात्वर्थः । गद्यरसानुभूतिः पद्यरसानुभूतिः इति उभयरसानुभूतिः अस्य काव्यविभागस्य वैशिष्ट्यमिति विदितो हि विषयः ।

प्रकृतनृसिंहचम्पू इत्याख्यं काव्यं केशवभट्टेन विरचितम् । पञ्चस्तबकेषु निबद्धं काव्यमिदं प्रह्लादचरिताधारितम् । पञ्चमः स्तबकः अपूर्णमित्यनेन स्तबकचतुर्थमेव प्रकाशितम् ।

६.१. केशवभट्टस्य देशकालादिविचाराः

अस्य काव्यस्य रचयिता केशवभट्ट इति । काव्यस्य द्वितीयश्लोके कविः स्वस्य परिचयं ददाति । लौगाक्षीकुले माधन्दिनशाखावित् एषःगोदावरीतटे न्यवसत् । गोदावरीतटे स्थिता पुण्यस्थम्भनगरी अस्य निवासस्थानमासीदिति ज्ञायते । मीमांसायां तर्कशास्त्रे साहित्ये च निपुणोऽयं पुण्यस्तम्भनिवासिनः अनन्तपण्डितस्य पुत्रः । पितामहस्य नाम केशव इति तदेवास्य कवेरासीत् ।

श्रीलौगाक्षिकुलारविन्दतरणिर्मध्यन्दिनाम्नायवित् ।
मीमांसायुगतर्कतन्त्रचतुरः साहित्यरत्नाकरः ।
काव्यं श्रीनृहरेः करोति सुकृती गोदातटप्रोल्लसत्-
पुण्यस्तम्भनिवासिकेशवसुतानन्तात्मजः केशवः ॥[1]

६.२. नरसिंहचम्पूः

काव्यस्य कथासारः

---

[1] नृसिंहचम्पू-प्रथमस्तबकः श्लो १

मङ्गलाचरणे शेषशायिनं मुकुन्दं स्तौति कविः ।

कनकरुचिदुकूलः कुण्डलोल्लासिगल्लः ।
शमितभुवनभारः कोऽपि लीलावतारः ।
त्रिभुवसुखकारी शेषशायी मुकुन्दः ।
परिकलितरमाङ्गो मङ्गलं नस्तनोतु ॥

इति । अत्र मुकुन्दं स्वर्णवस्त्रोपेतं, कर्णकुण्डलादिभिः शोभायमानकपोलयुग्मयुतमिति वर्णयन् कविः भगवतः भूभार- हरण,भक्तानुग्रहादि- गुणचिन्तनं कुर्वन् मङलं तनोत्विति हरिं प्रार्थयति कविः ।

द्वितीयश्लोके स्वकुलस्य वर्णनं कृत्वा काव्यं प्रारभते । नृसिंहचम्पूकाव्यं भागवतस्य सप्तमस्कन्दे वर्णितस्य नृसिंहावतारस्य कथामादृत्य रचितम् । वस्तुतः भागवतस्य सप्तमस्कन्धे तृतीयाध्याये हिरण्यकशिपोः उग्रतपः चतुर्मुखात् वरप्राप्तिरित्यादि कथा निरूपिता । तथा चतुर्थाध्यायस्य पञ्चमाध्यायस्य कथाः अपि काव्येऽस्मिन् निरूपिताः । काव्यस्य प्रथमस्तबके हिरण्यकशिपोः दारुणतपसः वर्णनं वर्तते । सन्तुष्टेन ब्रह्मणा प्राप्तवरः दर्पितः असुरः देवान् सज्जनान् ऋषीन् पीडयामास । तदा पीडितैः देवैः प्रार्थितः हरिः यदा मम भक्तः प्रह्लादस्तेन पीडितो भविष्यति तदा मम अवतारः इत्याश्वस्य तान् प्रेषयामास । ततः पश्चात् शुभमुहुर्ते एदोः प्रह्लादः अजनि इत्यादि कथा प्रथम स्तबके निरूपिता ।

द्वितीयस्तबके प्रह्लादस्यगुरुकुलवासः वर्णितः । हरिभक्तः प्रह्लादः सदा हरिनामसङ्कीर्तने रतः । तं दृष्ट्वा हिरण्यकशिपुना आज्ञप्ताः गुरवः तं हरिभक्त्या विचलितं कर्तुमुद्युक्ताः । नैकप्रयत्ने कृतेऽपि प्रह्लादः हरिगुणचिन्तनं न तत्याज । राज्ञः सम्मुखे परीक्षार्थं स्थितः प्रह्लादः हरिगुणगानमकरोत् । तद्दृष्ट्वा कुपितो राजा गुरून् अपराधीन् मत्वा तान्हन्तुमुद्यतः । तदा गुरवः स्वापराधः नास्त्यत्र इति न्यवेदयन् ।

तृतीयस्तबके सामदानभेदोपायाः यदा असफलाः तर्हि दण्डमेवयुक्तमिति राजा शस्त्रैः, सर्पैः, गजैः, अग्निना, वायुना, हालाहलविषेण, शम्बरासुरस्य मायया, समुद्रे पर्वतेषु क्षेपणेन स्वसुतं हन्तुं प्रायतत । किन्तु परमभक्तं प्रह्लादं हरिः सर्वत्र ररक्ष इत्यादि कथा निरूपिता ।

चतुर्थस्तबके स्तम्भात् नृसिंहरूपिणः परमात्मनः आविर्भावः, हर्षाश्चर्ययुताः देवादयः, प्रह्लादाय नृसिंहस्यानुग्रहः इत्यादि कथा सूचिता ।

आलङ्कारिकदृष्ट्याऽध्ययनम्

काव्यमिदं अलङ्कारिकदृष्ट्या महत्त्वं भजते । प्रासादगुणोपेतेऽस्मिन् काव्ये विपुलसङ्ख्याकाः शब्दालङ्काराः तथा अर्थालङ्काराः दृश्यन्ते । प्रथमस्तबके द्वितीयस्तबके च वर्णितायां कथायाम् अद्भुतरसप्रतीतिरस्ति । तृतीयस्तबकेऽपि अद्भुतरसप्रतीतिः । चतुर्थस्तबके वीररसप्रतीतिः । अत्र प्रधानरसः वीररसः अद्भुत, करुणारसावपि दृश्येते । काव्यरचनायां वैदर्भीशैलिरनुसृता इति भाति ।

प्रथमस्तबके मालिनी, शार्दूलविक्रीडितं, अनुष्टुप्, स्रग्धरा, वसन्ततिलका, उपजातिवृत्तैः श्लोकाः रचिताः । द्वितीयस्तबके शर्दूलविक्रीडितं, स्वागता, ललिता, द्रुतविलम्बितं, अनुष्टुबादिवृत्ताः प्रयुक्ताः । तृतीयसर्गे तावत् शार्दूलविक्रीडितं ललितादिवृत्ताः तथा रथोद्धता, पुष्पिताग्रा,प्रहर्षिणी, शिखरिणी इत्यादिविशिष्टवृत्तानां प्रयोगोऽपि दृश्यते । चतुर्थस्तबकेऽपि पुष्पिताग्रा , मालिनी, भुजङ्गप्रायातवृत्तेषु श्लोकाः निबद्धाः । विशिष्टवृत्तयुताः श्लोकाःअत्र दत्ताः ।

शब्दालङ्काराः

गिरिवरशिखरादसौ निपात्यः । प्रभवति भूरि यथाखिलाङ्गभङ्गः
परिणति भयदं निजं यदङ्गं । परिहरणीयमहो पुनः किमन्यत् ॥[2]

---

[2] नृसिंहचम्पू- तृतीयस्तबकः-२३ श्लो

अर्धसमवृत्तोऽयम् अयुजि नयुगरेफतोऽयकारो युजि च नजौ जरगाश्च **पुष्पिताग्रा** इति लक्षाणात् ।

वदान्यानां सीमा सकलभुवनज्ञः स्वयमसि ।
प्रणेता सिद्धीनां पतितपटलीपावनपटुः ।
अतस्त्वामायातः शरणमधुना नाथ मयि चेत् ।
उपेक्षामाधत्से कथमहं यामि शरणम् ॥[3]
रसैरुद्रैश्छिन्ना यमनसभलागः **शिखरिणी** इति लक्षणात् ।

मायावीमथ दलनाय माधवोऽसौ ।
प्रायश्छच्छरणमुपागताय चक्रम् ।
एतस्मै यदिदमसौ विभुर्न दद्यात् ।
त्रैलोक्येश्वरपदवीं कथं विदध्यात् ॥[4]
म्नौ ज्रौ गस्त्रिदशयतिः **प्रहर्षिणीयम्** इति लक्षणात् ।

सर्वतापशमनैकभेषजम् ।
श्यामधाम जपतां कुतो भयम् ।
पश्य सम्प्रति मदङ्गसङ्गतः ।
पावकोऽपि सलिलायते यतः ॥[5]
रान्नराविह रथोद्धता लगौ इति लक्षणात् ।

सुधासिन्धुहर्म्ये मणिद्वीपरम्ये ।
फणारत्नदीपे भुजङ्गेन्द्रतल्पे ।
शयानेन लक्ष्मीघनोत्तुङ्गपीन-

---

[3] नृसिंहचम्पू- तृतीयस्तबकः-३० श्लो

[4] नृसिंहचम्पू- तृतीयस्तबकः-३१ श्लो

[5] नृसिंहचम्पू- तृतीयस्तबकः-१७ श्लो

स्तनन्यस्तहस्तारविन्देन तेन ॥[6]

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः इति लक्षणात् । श्लोकेऽपि भुजङ्गशब्दस्य प्रयोगः दृश्यते । गेयोऽयं श्लोकः ।

अर्थालङ्कारा:

नैके अर्थालङ्काराः कविप्रतिभां दर्शयन्तः विद्यन्तेऽत्र । यथा

उत्प्रेक्षालङ्कारः

एताः सम्प्रति गर्भगौरवभराद् राज्ञो विरोधाङ्गनाः ।
कान्तारेषु पलायितुं बत कथं पद्भ्यां भवेयुः क्षमाः ।
इत्थं चेतसि संविभाव्य सदयं वैकुण्ठकण्ठीरव ।
त्वन्नादावलिभिः सखीभिरिव किंतद्गर्भपातः कृतः ॥ [7]

अत्र नृसिंहदेवस्य नादैः शत्रुस्त्रीणां गर्भपाते न किमपि प्रयत्नविशेषः । तथापि तयोः कार्यकारणभावः वर्णितः । अतः असिद्धविषयहेतूत्प्रेक्षा । अत्र सखीरिव इत्युक्तत्वात् उपमालङ्कारोऽपि वर्तते ।

परिणामालङ्कारः

श्रीलक्ष्मीनृसिंहसान्द्रजलदे चञ्चन्नखालितडित्
धाम्नि छन्नरिपु प्रतापतपने कोपावलिं वर्षति ।
पूर्णाशोणितवाहिनी सुरमनः सनवापदावानलः ।
शान्तोऽभूद् विरराम वैरिवनितासीमन्तमार्गोदयः ॥[8]

---

[6] नृसिंहचम्पू- तृतीयस्तबकः-२९ श्लो

[7] नृसिंहचम्पू- तृतीयस्तबकः-३६ श्लो

[8] नृसिंहचम्पू- चतुर्थस्तबकः-३१ श्लो

अत्र लक्ष्मीनृसिंह सान्द्रजलदयोः उपमानोपमेयभावः । तयोः ताद्रूप्यभावः अतः ताद्रूप्यरूपकः । नृसिंहः कोपं प्रदर्शयतीति वक्तव्ये नृसिंहजलदः कोपावलिं वर्षतीति वर्णितम् । उपमानस्य जलदस्य वर्षणकार्यं उपमेये नृसिहे आरोपितत्वात् वा परिणतत्वात् परिणामालङ्कारः । परिणामः क्रियार्थश्चेद्विषयी विषयात्मना इति लक्षणात् ।

<u>सन्देहालङ्कारः</u>

हिरण्यकशिपोः संहारसमये नृसिंहदेवस्य कान्तिं दृष्ट्वा केचन गन्धर्वाः एवमूचुः-

किं मध्याह्नदिवाकरोऽयमपरः किं वाऽयमौर्वानलः ।
किं वासौ चपलाचयः पशुपतेः किं फालनेत्रानलः ।
किं वाऽसौ प्रलयानलः किमथवा सर्वोऽपि भौमानलः ।
श्रीमत्सिंह भवत्प्रतापमहिमा नोदेति केषां मतिः ॥[9]

अत्र निसिंहस्य कान्तिं दृष्ट्वा किमिदमिति सन्देहमतयः गन्धर्वाः अयं प्रलयानलः स्यात् अथवा अपरः सूर्यो वा इत्यादि सन्देहं प्रदर्शतीत्यनेन सन्देहालङ्कारः ।

<u>उल्लासालङ्कारः</u>

काठिण्यं कुचकुम्भयोः नयनयोश्चाञ्चल्यमेतद्द्वयम् ।
भो ब्रह्मन् भवता कथं न पदयोरस्माकमासादितम् ।
इत्थं श्रीनरसिंह ते त्रिभुवनाधीशस्य धाटीभिया ।
कान्तारेषु मिथः पलायनपरा जल्पन्ति वैरिस्त्रियः ॥[10]

अत्र कुचयोः काठिण्यं नेत्रयोः चाञ्चल्यं पादयोः न प्रदत्तमिति ब्रह्मणि दोषारोपणं वर्णितम् । अतः अन्यदोषेण तदन्यस्य दोषोत्पत्तिवर्णनरूपः उल्लासालङ्कारः ।

<u>अवज्ञालङ्कारः</u>

---

[9] नृसिंहचम्पू- चतुर्थस्तबकः-३४ श्लो

[10] नृसिंहचम्पू- चतुर्थस्तबकः-३५ श्लो

यच्चिन्तनं जगति दुर्लभमन्तकाले ।
मृत्युस्तदङ्कयुगले किमतोऽपि भद्रम् ।
तत्त्वं विषादमधुना न विधेहि चित्ते ।
यद्दूषणं तदपि भूषणमेव मन्ये ।[11]

प्रह्लादस्य माता पत्युः दशां दृष्ट्वा तव पितुः मरणकारणं त्वमेव इति वदति । तदा तां सान्त्वयन् प्रह्लादः भगवतः अङ्के मरणं भूषणमेव इति वदति । अतः यदन्येषां कृते दूषणं तद्वस्तुतः भूषणमेवेति अभिप्रायेण अन्यदोषेण अन्यदोषाभावः अवज्ञालङ्कारः ।

<u>व्याजस्तुत्यलङ्कारः</u>

स्थाणुरेष कियानादौ तदन्तः कीटकः कियान् ।
अहो भाग्यं हि देवानां येषामेतादृशः प्रभुः । [12]

हरिवैरी हिरण्यकशिपुः हरिं निन्दति । अत्र स्तुतिव्याजेन निन्दा कृता अतः व्याजस्तुत्यलङ्कारः ।

<u>अपह्नुत्यलङ्कारः</u>

प्रणतिं न तनोति यद्धरेर्न वपुर्जीवति तत् परेतकम् ।
अथ तत्र न या समर्पिता बत सम्पद्विपदेव सा भवेत् ।
न यथा हरिनाम कीर्तितं रसना सा विषवल्लरी मता ।
न च तस्य गुणावलिः श्रुता श्रुतियुग्मं न बिलं तदिष्यते ॥[13]

अत्र इन्द्रियाणां धर्मं अपह्नुत्य तद्विरुद्धधर्मारोपणं वर्तते । या रसना हरिनामकीर्तनं न कृतवती सा विषवल्लरी इति अत्र कारणस्यापि उल्लेखो वर्तते इत्यनेन हेत्वपह्नुतिः ।

नृसिंहस्य आविर्भावः नैजरीत्या मनोज्ञतया वर्णितम्

---

[11] नृसिंहचम्पू- चतुर्थस्तबकः-२८ श्लो

[12] नृसिंहचम्पू- चतुर्थस्तबकः-५ श्लो

[13] नृसिंहचम्पू- चतुर्थस्तबकः-२१, २२ श्लो

लोकानाकलयन् नभः कवलयन् दिक् कुम्भिनः कम्पयन् ।
भूगोलं चलयन् गिरीन् विदलयन् अम्भोधिमुद्वेलयन् ।
दिग्वृन्दं भ्रमयन् मनो विकसयन् ब्रह्माण्डमास्फोटयन् ।
स्तम्भादाविरभूद् स्वप्रतिरवैः वैकुण्ठकण्ठीरवः ॥[14]

शार्दूलविक्रीडिते श्लोकेऽस्मिन् नृसिंहावतारकालस्य वर्णनमति सुन्दरम् ।

सैद्धान्तिकदृष्ट्याऽध्ययनम्

गुरुकुले अध्ययनसमये गुरुणोक्तं न कृतं प्रह्लादेन शास्त्र-विरुद्धत्वात् । प्रह्लादः महाज्ञानी आसीत् । अतः हरिसर्वोत्तमत्वं प्रतिपादयन् गुरूणामहितवचननि नाश्रुणोत् । काव्येऽस्मिन् गुरु-प्रह्लादयोः प्रश्नोत्तररूपेण अन्यमतनिरासः कृतः ।

गुरुणा उक्तः तत्त्वविचारो निस्सार एव , दैवतानुसारी -मार्गः परस्पर-विप्रतिपत्ति-कलितश्च , तथा हि आत्मनानात्वं न्यायविदो वदन्ति । अत्मैकत्वं वेदान्तिनः , प्रपञ्चस्य नित्यत्वं न्यायवैशेषिकभाट्टप्रभृतयः । मिथ्यात्वं चौपनिषदाः । कर्मैव जगद्धेतुरिति मीमांसकाः । कर्मसापेक्षत्वादीश्वरः कर्तेति तार्किकाः । सदेव कार्यमिति साङ्ख्याः । पूर्वमसदेव हेतुसामर्थ्याज्जायत इति केचित् । तदेवं नानाविध विरुद्धमतसङ्कीर्णानि तद्दर्शनानि । अथ च प्रमाणभूतानि सर्वानीत्यहो माहानेषः तेषां विमोहः । अनृतव्याघातपुनरुक्तदोष-कलङ्कितोऽपि वेदः कृतायामपि कारीरियाँ केचिन्न वृष्टिरित्यनृतम् । उदितानुदित -होमोपदेशात् व्याघातः । सर्वशाखास्वपि एकस्यैवाग्निहोत्रस्योपदेशाद् पुनरुक्तम् ।अथापि प्रमाणमित्यपि महत्साहसमतस्तत्प्रतिपादिताग्निहोत्र- दर्शपूर्णमासज्योतिष्टोमादिक-कर्मानुष्ठानं केवलं लोकबन्धनमात्रं न पुनः परमार्थः । हरेरभिधामुदीरय प्रतिकूलं कुरु । तत्परायणे कुलमङ्ग ! विभूषयस्व । श्रुतिमुच्चारय मा कदाचन ।

अत्र मिथ्यामतं प्रतिपादितं भेदस्य सत्यत्वस्य च खण्डनं दृश्यते । वेदस्य अप्रामाण्यञ्च उक्तम् । कारीरियागः वृष्ट्यर्थं क्रियते किन्तु कदाचित् यागे कृतेऽपि वृष्टिर्न

---

[14] नृसिंहचम्पू- चतुर्थस्तबकः-७ श्लो

भवति । उदयकाले तथा अस्तमानकाले होमः कर्तव्यः इत्युक्तत्वात् व्याघातदोषः । अग्निहोत्रोपदेशः सर्वशाखासु दृष्टत्वात् पुनरुक्तिदोषः । यद्वेदे उपदिष्टं तत्सर्वं लौकिकमिति पूर्वपक्षः ।

तदा प्रह्लादः- **यतो व्यासगौतमादिप्रणीतदर्शनानि वास्तवलौकिकार्थपराणीति विषयभेदसत्त्वात् अवास्तवमात्मैक्यज्ञानम् , श्रुत्यादिसर्वनानात्वजगद्धेतुत्वादिसर्वं लौकिकं वास्तवं तच्छास्त्ररूपं पूर्वपत्रोत्थापकं वेदोऽपि स्वाङ्गादेव कर्मणः फलं ब्रूते कथमनृतम् ? उदितानुदित होमयोश्च विकल्पमेव ब्रूते कथं व्याघातः । एकस्यैव अग्निहोत्रस्य नाना शाखासु प्रतिपादनं तु दृढविश्वासार्थमिति कथं पुनरुक्तिदोषः स्यादिति** वदन् वेदप्रामाण्यं प्रतिपादयति भेदञ्च ।

काव्येऽस्मिन् भक्तस्य लक्षणानि उक्तानि । गुरुणा हरिकीर्तनादि विषये वारितः प्रह्लादः एवं वदति-

असवो यदि यान्ति यान्तु मे ।
परमानन्दमुकुन्दचिन्तने ।
भवतापकदम्बभञ्जने ।
विरमेन्नैव कदापि मानसम् ॥[15]

मुकुन्दचिन्तने यदि मम प्राणाः पञ्चत्वङ्गच्छन्ति चेत् तथैवास्तु किन्तु कदापि मे मनः हरेः भजनात् न विरमेदिति प्रह्लादस्य भक्तिपराकाष्टता दर्शिता । एतदेव एकान्तभक्तस्य लक्षणं खलु ।

हरिभक्तोऽपि हरिभक्तकुले न जातः इति केनचन देवेनोक्ते प्रह्लादः दृष्टान्तपुरस्सरं प्राह किं कुलेन ? हरेरनुग्रहादेव भक्तिर्जायत इति । कुम्भसम्भवः अगस्त्यः समुद्रं पाणिपुटके विनिधाय पीतवान् । विन्ध्याद्रेः वृद्धिं कुण्ठयन् तं नमयाञ्चकार । किन्तु

[15] नृसिंहचम्पू- द्वितीयस्तबकः -४ श्लो

एतादृशः सामर्थ्यः कुम्भे वा कुलाले वा नास्ति । अतः यस्मात् जातः तत्कुलं किमपि कर्तुं न शक्यते । भगवदनुग्रह एव सर्वस्य कारणमिति भावः ।

हरेः प्रसादादेव मोक्ष इति श्रीमदाचार्याः प्रत्यपादयन् । कथं हरि-प्रसादः प्राप्तव्यः इति अत्र निरूपितम् ।

आसुरं कुलमनादरणीयं चित्तमेतदमलीकरणीयम् ।
श्यामधामशरणीकरणीयं लीलया भवजलं तरणीयम् ॥[16]

आसुरं नाम अस्माकं मनसि यदासुरीविचाराः सन्ति तेषामनादरणं करणीयं अर्थात् दूरीकरणीयम् । ततः पश्चात् श्रवणादिद्वारा चित्तशुद्धीकरणम् । ततः हरौ एव मनः निधाय ऐहिकविषयेषु वैरग्येन हरिचरणौ शरणं गन्तव्यम् । एवं विधेन संसारः दूरीकरणीयः तथा हरिप्रसादः प्राप्तव्यः इति निरूपितम् ।

भक्तिर्नाम का ? कथं करणीया ? इत्यादिप्रश्नाः जिज्ञासूनां मनस्सु उद्भवन्ति । अत्र समाधानं प्रह्लादेनोक्तम् ।

श्रवणकीर्तनसंस्मरणादिका नवविधा हरिभक्तिरकृत्रिमा ।
तनुभृते न घटेत यदि क्षितौ सकृतभूरिकुलद्वयदुर्दशः ॥[17]

श्रवणकीर्तनसंसरणादिकेन नवविधभक्तिरुक्ता । श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वन्दनं, दास्यं सख्यमात्मनिवेदनम् [18] इति नवविधभक्त्या हरिः तोषणीयः । माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिरिति प्रोक्ता तया मुक्तिर्नचान्यथा इति श्रीवादिराजगुरुसार्वभौमाः । यः एवं विधां भक्तिं करोति तस्य कुलद्वयं कदापि दुर्दशां न प्राप्नोतीति भावः । तथा

मतिर्मुकुन्दे परतः स्वतो वा नूनं भवेन्नैव गृहव्रतानाम् ।

---

[16] नृसिंहचम्पू- द्वितीयस्तबकः -१२ श्लो

[17] नृसिंहचम्पू- द्वितीयस्तबकः -१३ श्लो

[18] भागवत – सप्तमस्कन्द– ५ अ, २३ श्लो

मदान्धबुद्ध्याविशतां तमिस्रं पुनः पुनश्चर्वितचर्वणम् ॥[19]

ये मन्दबुद्ध्या लौकिकविषयान् चर्वितचर्वणं कुर्वन्ति , तमोयोग्याः, केवलैहिकसुखभोगे रताः तेषां मतिः कदापि मुकुन्दे न भवतीति भावः ।

संसारे मोक्षसधनीभूतानि कर्माणि कीदृशानि ? स्थूलशरीरस्य अङ्गानि कथं सार्थकानि भवन्ति ? इति अत्र प्रह्लादेन उपदिष्टम् - यद्वपुः हरेः प्रणतिं न करोति स न जीवति । तद्वपुः कलेवरसदृशं । यद्धनं न हरिसमर्पितं तेन किमपि न प्रयोजनम् [20]। या रसना हरिनामकीर्तनं न करोति सा विषवल्लरी, कर्णौ यदि हरिनाम न श्रुणुतः तौ बिलसदृशौ[21] । येन करेण अच्युतः न पूजितः स दग्धवृक्षस्य पल्लवमिव । तीर्थक्षेत्रमनटन्तौ पादौ असिपत्रपादपौ [22]। यत् मनः हरिभक्त्या न द्रवति स वज्रायुधमिव कठोरः[23] । इति सर्वायवाः सदा हरौ एव रताः भवेयुः । अन्यथा जीवितस्य फलं निष्फलमिति वदन् नित्यपूजानुष्ठानम् निर्मलभक्तिरित्यादि मार्गैः हरितोषणं करणीयमिति ज्ञेयम् ।

हिरण्यकशिपुः स्वमेव सर्वोत्तमं मन्यमानः स्वस्य प्रशंसामकरोत् । तदा प्रह्लादः एवमुदतरत् - येन सकलभूतानि जायन्ते येन जातानि जीवन्ति यस्माच्च लयमपि गच्छन्ति सः हरिः न अवलक्षितव्यः इति । अत्र हरेः सृष्टिस्थितिलयकर्तृकत्वं प्रतिपादितम् । चतुर्मुखब्रह्मा सृष्टिकर्ता विष्णुः स्थितिकर्ता रुद्रः लयकर्ता इति विष्णोः सृष्टिलयकर्तृत्वं नास्तीति नैव ज्ञेयं चतुर्मुखब्रह्मणः रुद्रस्य च नियामकत्वात् हरेः सर्वकर्तृकत्वं ज्ञेयम् । जन्माद्यस्य यतोन्वयात्...... इति भागवते [24]।

हिरण्यकशिपुः प्रह्लादं दग्धुं अग्निमादिदेश । यदा अग्निः उद्युक्तः तदा गङ्गाप्रवाहादिव शान्तोऽभूत् इति कविः वर्णयति- ततो निर्दग्धुमुद्यतो वह्निः

---

[19] नृसिंहचम्पू– द्वितीयस्तबकः, १४ श्लो
[20] नृसिंहचम्पू– द्वितीयस्तबकः, २१ श्लो
[21] नृसिंहचम्पू– द्वितीयस्तबकः, २२ श्लो
[22] नृसिंहचम्पू– द्वितीयस्तबकः, २३ श्लो
[23] नृसिंहचम्पू– द्वितीयस्तबकः, २४ श्लो
[24] भागवतस्य मङ्गलाचरणे

प्रोच्छदमरतरङ्गिणीजलकल्लोलायमान इव हरेः प्रसादादासीदिति । अत्र जलप्रवाहादिव इत्यादिशब्दप्रयोगः न कृतः अमरतरङ्गिण्याः गङ्गायाः वेगः रभसश्च सर्वजलप्रवाहमतिशेते इति हेतोः । तत्रापि प्रोच्छदमरतरङ्गिणी इति वर्णितत्वात् हरिभक्तविघातकानां गतिः कीदृशीति ज्ञायते । तारतम्ये अग्निः गङ्गायाः उत्तमः । अर्थात् गङ्गाप्रवाहात् तस्य कोऽपि क्लेशो नास्ति । किन्तु अत्र हरिभक्तानां गरिमानं दर्शयितुं कविः एवं वर्णयतीति ज्ञेयम् ।

भगवतः स्वातन्त्र्यं अन्येषां च अस्वातन्त्र्यमत्रप्रतिपदितम् ।

जगदीशनिदेशमन्तरा । दहनो नैव दहेत किञ्चन ।
यदि तत्र भवेत् स्वतन्त्रता । जठरस्थो न दहत्यसौ कुतः ॥[25]

हरेरादेशं विना देवताः किमपि कर्तुं न शक्ताः इति युक्तिपूर्वकं प्रतिपादितम् । यदि अग्निः दहनविषये स्वतन्त्रः तर्हि कुतः जठराग्निः देहं न दहतीति ।

सकलापदः रक्षितः प्रह्लादः भगवन्तं स्तौति-

सम्प्राप्तोऽसि जले हविर्भुजि तथा क्षोणीभृतः शेखरे ।
शस्त्राघातपरम्परासु च सखे हालाहलप्राशने ।
किं तेऽकारि मया पुरा भगवतः स्नेहानुबन्धिव्रतम् ।
तन्मन्ये निरुपाधि ते व्रतमिदं यद् दीन संरक्षणम् ॥[26]

अत्र भगवतः भक्तपराधीनत्वं प्रतिपादितम् । अत्र अधीनत्वं नाम न नियमेन यथा राज्ञः सेवकः इव । किन्तु भक्तानां प्रेमपाशैः बद्धः सत्यसङ्कल्पो हरिः भक्तान् सदा रक्षतीति भावः ।

६.३. श्रीनिवासचम्पूः

श्रीनिवासचम्पूरिति काव्यं वेङ्कटाध्वरिविरचितम् । कवेः देशकालविषये उल्लेखो न वर्तते । वेङ्कटाध्वरिनामाऽयं विश्वगुणादर्शचम्पूकारो वा इति प्रश्नः । काव्यस्य आन्तरिकविवरेण न

[25] नृसिंहचम्पू– तृतीयस्तबकः, १६ श्लो
[26] नृसिंहचम्पू– तृतीयस्तबकः, ३९ श्लो

तथा दृश्यते यतो हि विश्वगुणादर्शकारः तमिळुप्रान्तीयः । सप्तदशशताब्देः कविरयं वेन्कटदीक्षितर् इत्यपि प्रसिद्धः १६५० क्रिस्ताब्दे सः मोघलराजानामास्थाने कविरासीदिति ज्ञायते । विशिष्टाद्वैती एषः स्वकाव्ये भारतस्यविविधदेशानां गुणावगुणपूर्वकं वर्णनं कृतवान् । कर्णाटकस्य रजतपीठपुरविषये (उडुपि) तस्य अनादरः[27] स्पष्टतया दृश्यते । तत्रत्यानां माध्वानां[28] विषयेऽपि एतादृशः व्यवहारः दृश्यते यथा सततमकृतसन्ध्योपासनाः.... .... सत्वरमतिक्रम कीशकल्पमिमां जनपदं... इति । किन्तु श्रीनिवासचम्पूकारः माध्वानां विषये सादरं लिखति यथा अथ तदवलोकनाद्विगतपरिभ्रमणायासः क्षणं विश्रम्य हंसमिव केवलं क्षीरमयमाहारमुपकल्प्य माध्व इव सद्वातागममभिनन्दंस्तत्तीरे एव .....[29] इति माध्वाः वाय्ववतारिणं श्रीमन्मध्वाचार्यमनुसरन्तीति वक्ति । तथा विश्वगुणादर्शस्य अस्य काव्यस्य च शैलिरन्या । सामान्यतः श्रीवैष्णवानां काव्ये गजवर्णनसन्दर्भे तस्य तिलकस्य वर्णनं भवति । अत्र तादृशवर्णनं न दृश्यते । एवं एषः वेङ्कटाध्वरिः विश्वगुणादर्शचम्पूकारेण वेङ्कटाध्वरिणा भिद्यते इति निर्णीयते । प्रथमोच्छ्वासस्य अन्तिमश्लोके स्वपितुर्नाम नृसिंहसूरिरिति ज्ञायते नरमृगपतिसूरेस्तादृशे वेङ्कटेशः..[30] एषः माध्वः प्रायः कर्णाटकप्रान्तीयः स्यात् । काल-कृतिविषये शोधः कर्तव्यः । उच्छ्वासान्ते श्रीमन्निखिलभूचक्रवर्तिविपश्चिद्वन्द्यपाद-श्रीवेङ्कटाध्वरिकवेः कृतौ श्रीनिवासचम्पूकाव्ये प्रथम उच्छ्वासोयमत्र समापनमाप इति वाक्यं दृश्यते । अनेन एषः बहुप्रसिद्धः कविरासीदिति ज्ञायते ।

काव्यमिदं पञ्च उच्छ्वासेषु भविष्योत्तरपुराणोक्त- श्रीनिवासकल्याणस्य कथामाधृत्य विरचितम् । काव्यस्यान्ते उत्तरविलासो नामकः भागः उल्लासपञ्चमेन सहितः शोभते । काव्यनायकः श्रीनिवासः नायिका पद्मावती च । काव्यस्य प्रधानरसः श्रृङ्गारः । हास्याद्भुतवीरकरुणादयः यथोचितं प्रतीयन्ते । प्रासादगुणोपेतमपि तत्र तत्र दीर्घसमासैः ओजत्वमाप्नोति । आहत्य काव्यस्यास्य पठनेन सहृदयः पुनः श्रीनिवास- पद्मावत्योः विवाहस्य साक्षी भविष्यति ।

[27] Padmanabha.blogspot.com

[28] Vishvagunadarshacampoo of venkatadhvari- by Shatavadhani R.Ganesh,www.google.com

[29] श्रीनिवासचम्पू , श्रीराघवेन्द्रमठः,मन्त्रालयः– पु सं ११

[30] श्रीनिवासचम्पूः– श्लो १५, प्रथमोच्छवासः

प्रथमोच्छ्वासे श्रीनिवासस्य वेङ्कटद्रि-आगमनं , पर्वतवर्णनं , वनदेवतावर्णनमित्यादिकं दृश्यते । **द्वितीयोच्छ्वासे** नारदस्यागमनं, वने दृष्टायाः पद्मावत्याः सौन्दर्यवर्णनं दृश्यते । तच्छ्रुत्वा श्रीनिवासेन तस्याः कुलगोत्रादिकाः पृष्टाः । आकाशराजकन्या इति नारदेनोक्तम् । तदा मृगयाव्याजेन अद्भुतमश्वमेकमारुह्य वनमगमत् । वने कश्चिद् मदगजः इतस्ततः भ्रमति स्म । बाणप्रयोगेन तं निरोद्धुम् प्रायतत । स गजः भयेन द्रुतं पलायत । तमेवानुससार श्रीनिवासः । तदा तेन पद्मावती दृष्टा । तां दृष्ट्वा तस्यामनुरक्तः साऽपि तमेकचित्तेन अवलोकयन्ती अतिष्ठत् । एषा अतीवसौन्दर्यशालिनी नूनं उत्तमकुलस्त्रीरेव स्यात् अत एव अस्यां मोहयति मे मनः इति मत्वा तया सह सल्लपितुमासक्तः । सा तु अलीककोपं प्रदर्श्य तेन सह न समभाषयत् । तदा तस्याः अङ्गसौष्टववर्णनं श्रुत्वा नन्दिताऽपि कुपिता इव दर्शयन्ती नारायणपुरादागतायाः राजाङ्गनायाः सन्देशं श्रुत्वा श्रीनिवासेऽनुरक्तमनसा नारायणपुरमगमत् । श्रीनिवासस्तु स्वामिपुष्करिणीमेत्य अन्यमनस्कतया सन्ध्यावन्दनादिकं समाप्य पद्मावत्याः विरहेण चिन्तितोऽभूत् ।

तृतीयोच्छ्वासे काल्पनिकपात्राणां सृष्टिर्दृश्यते यथा मरालकः । प्रातः स्वामिपुष्करिण्यां स्नानार्थमागतानां यात्रिकानां वार्तालापः हास्यरसोपेतः यथा- "ततश्चान्तिपुष्करिणीयं नृसिंहजयन्तिमिति कथमानसङ्कल्पानां तीर्थोपजीविनां क्व मे करालवः क्व मे बृसी क्व मे कक्षपेटिकेति जल्पतां शिशुद्विजातिनां प्रभातस्नान- समयव्यग्रेषु जनेषु वस्त्रं भाजनं वा मुषित्वाद्यैव दीयते पणशेषमिति सान्त्वय्य तन्मातरं तत्कालहृतयज्ञोपवीतयाचकानां चेटिकारत- दरिद्रौदनिकविटानां अस्यामयमर्थ इति तारतारं पठतां मासपौराणिकानां मह्यं न दत्तं मह्यं न दत्तमिति आक्रन्दतां गर्भयाचकानां , जातं जातमिति वाद्यमानकरतालिकानां कृपणास्तिकधानिकानां , त्यज मार्गं जले एव विस्मृतश्रीमुद्राः, वनितोपरि पतसि , वराकेण मार्गो दूषितः प्रतिपालय मदागनं , विज्ञातेव ते शिशुता इत्यादिप्रकारेण वदतां जनानां भगवत्याः सुवर्णसुकर्याः उभयतटोज्जृम्भमाण- कोलाहनेनुद्बुद्धो यथाविधि स्नात्वा ......"। (अत्र स्वभावोक्त्यलङ्कारः) । तत्र मरालकेन सह तस्य मेलनमभवत् । मरालकस्य पात्रं भविष्योत्तरपुराणे न दृश्यते । कवेः कल्पना इयम् ।

मरालक-श्रीनिवासयोः संवादः स्वारस्यकरम् । श्रीनिवास- पद्मावत्योः प्रेमविषयिकवार्तालापः , श्रीनिवासस्य पद्मावत्या विना अन्यविषयेषु औदासीन्यं ,मरालकस्य सान्त्वनं इत्यादिकं वर्णितम् । श्रीनिवासमाश्वासयितुं तमन्यत्र नयन् मरालकः तत्र शृङ्गारमञ्जर्या सह मिलति । तदा सा द्रविडदेशस्य तत्रस्थस्य राज्ञः आकाशराजस्य वर्णनं करोति । तथा आकाशराजपुत्रीं पद्मावतीमपि वर्णयति । तस्याः कृते कृतं वरान्वेषणं नानादेशादागतानां राज्ञां वर्णनं , न कोऽपि पद्मावतीं परिणेतुं योग्यः इति वृत्तान्तं कथयति । तदा नारदागमनं तदनु नारदमहर्षिणा श्रीनिवासस्य गुणकथनं पद्मावती तस्मै दातव्या इति सप्रमाणकथनमित्यादिकं कथयति । नारदस्य वचनं श्रुत्वा पद्मावती श्रीनिवासेऽनुरक्तमनस्का विरहेण तप्ता श्रीनिवासस्य स्मरणं कुर्वती मदनतापेन हीनदशां प्राप्ता । अतः माता धरिणीदेवी अपि चिन्तिता । धरादेव्याः सम्मुखे पद्मावत्याः स्थितेः वर्णनञ्च क्रियते सखीभिः । तदा धरादेवी शृङ्गारमञ्जरीमाहूय तापशान्त्यर्थं मन्त्रजलमानय इत्यकथयदिति कथयति शृङ्गारमञ्जरी । तदा मरालकोऽपि श्रीनिवासः पद्मावतीदर्शनानन्तरं मदनशोकेन तप्तः तां दृष्टुमिच्छतीति वदति । एवं तयोः वार्तालापे प्रचलति श्रीनिवासः तत्रैवागतः । तं स्तुवन् मरालकः दैवं प्रधानमिति वदन्, श्रृङ्गारमञ्जरीं प्रेषयामास । तदा श्रीनिवासः शेषाचलमागत्य बकुलमालां नारायणपुरं प्रेषयितुमैच्छत् । इति कथाः वर्णिताः ।

चतुर्थोच्छ्वासः – श्रीनिवासाज्ञया नारायणपुरं गच्छन्ती बकुला मार्गे शुकाचार्यमीक्ष्य प्रणम्य च यथावृत्तं न्यवेदयत् । पद्मावत्यां श्रीनिवसस्य अनुरागविषयं निवेद्य मां कृतार्थां कुरुष्वेति साञ्जलिबन्धमकथयत् । अतः शेषाचलात् कपिलेश्वरमागमम् । अत्र शिवं नत्वा तत्र नारायणपुरं गत्वा किं कथयसीति शुकाचार्येण पृष्टया चिन्तितं तया – अद्यापि अकृतविवाहः इति कालातिक्रान्तदोषसूचनं , जातविवाहोऽयमिति सपत्नीस्थितिज्ञापनं, तस्यामलब्धसन्तान इति अपुंस्त्वव्यञ्जनं, द्वितीयो विवाह इति अमङ्गल्योद्बोधनं, भार्यास्य विप्रकृष्टा वर्तत इति गृहच्छिद्रवेदनलाघवं, सा दुश्चरित्रेति अलीकवादमहापाकं, नैकया तुष्यतीति अव्यवस्थाद्योतनं, रत्योन्मादित इति वनितापूर्वकानुरागभावकथनं, तया

प्रलोभितोऽयमिति कुमारीजनविरुद्धशङ्का उद्भवनं इत्यादिरूपेण चिन्तनमकरोत् बकुला । अहमपि श्रीनिवासस्य कार्यैकदेशसाधको भवामिति शुकाचार्यस्य वचनं श्रुत्वा ततः निर्गता । तत्र अगस्त्येश्वरे कृतरुद्राभिषेका सा तं स्तुत्वा नारायणपुराभिमुखी बभूव । अत्र श्रीनिवासः मरालकेन सह संल्लपन् स्त्रीस्वभावः चपलः इति इच्छितकार्यसिद्धिर्भवति वा न वेति शङ्कमानः स्वयमेव कार्यसिद्ध्यर्थं वेषान्तरेण गन्तुकामः धर्मदेवता भूत्वा नारायणपुरं प्राविशत् । तत्र चेटीमुखेनाकारिता राजभवनमासाद्य धरिणीदेव्या पृष्टा पद्मावत्या वने श्रीनिवासदर्शनं श्रीनिवासे उद्भूतप्रेमभावः तयोः उपयमः भगवतः प्रीतिकरः इत्युक्त्वा अद्य वा श्वो वा बकुलाभिधाना तच्छबरस्य धात्री आगमिष्यतीति भणित्वा जगाम । तदनु बकुला आगता । स्वीकृतातिथिसत्कारा सा आगमनकारणमवदत् । तस्याः वचनेन सन्तोषनिर्भरा धरा राजानं धर्मदेवतायाः वचनं तथा बकुलायाः आगमनं न्यवेदयत् । राजा पुराणाचार्यः शुकः पृष्टव्यः इति शुकमस्मरत् । स्मरणमात्रेणैव तत्रागतः शुकाचार्यः श्रीनिवासः साक्षात् वासुदेवकृष्णः इति तयोः विवाहः लोकहितकरः इति अवोचत् । वर्षासमयः इति बुद्ध्वा स्वाश्रममगमत् ।

पञ्चमोच्छ्वासः - शरत्काले प्राप्ते शुककूजनं श्रुत्वा तमस्मरत् श्रीनिवासः । गरुडशेषावाहूय सर्वेभ्यो श्रीनिवास- पद्मावत्योः विवाहविषयं निवेदयितुमाज्ञापयामास शुकमुनिः । ताभ्याकारिताः सर्वे अदितिनन्दनाः सप्रमदाः तत्रागताः । विवाहस्य पूर्वं क्रियमाणाः विधयः प्रारब्धाः । मङ्गलस्नानसमये लक्ष्मीं स्मरन् श्रीनिवासः तस्याः अनुपस्थितिं मत्वा नितरां खिद्यते स्म । सूर्यं लक्ष्मीं आनेतुं प्रेषयामास । उष्णरश्मिस्तु तां संस्तूय तोषयित्वा आनयत् । यथाविधि मङ्गलस्नानं नान्दीदेवतास्थापनं इत्यादिकं अकुर्वन् । ततः श्रीनिवास- पद्मावत्योः विवाहमहोत्सवः अतीवशोभायमानः सम्भ्रमपूर्वकः सुसम्पन्नः ।

आलङ्कारिकदृशाऽध्ययनम् - कविप्रतिभा, पदानां सरलसमागमः, यथावत् वर्णनम्, चमत्कारपूर्वकवचनानि, मनोहराः शब्दार्थालङ्काराः इत्यादिभिः काव्यमिदं उत्तमकाव्येषु स्थानमलङ्करोति । प्रकृतिवर्णनं , श्रीनिवासस्य सौन्दर्यवर्णनं, पद्मावत्याश्च सहृदयानां चेतांसि

आनन्दमनुभवन्तः काव्यलोकस्य रसान् पीत्वा आत्मानं धन्यमामनन्ति । काञ्चित् शब्दार्थलङ्कारान् पश्यामः ।

<u>भुजङ्गप्रयातवृत्तम्-</u>

दलल्लिकाजालनिर्यत्ननिर्यन्मरन्दद्रवासारमत्तालिगीतम् ।

समाकर्णयद्भिः कुरङ्गैर्द्विपारिं विलोक्यापि नो भूभुजङ्गप्रयातम् ॥[31]

श्लोके एव अलङ्कारस्य नाम अस्तीत्यनेन मुद्रालङ्कारः ।

<u>मत्तमयूरवृत्तम्</u> –

क्रीडत्कीरां नीलतमालां वनलक्ष्मीं शक्राश्माढ्ये सानुनि जाता गजवृन्दैः ॥

दृष्ट्वाऽक्रान्तां विस्तृतपक्षो घनबुद्ध्या नृत्यति पक्षी मत्तमयूरभिध एषः ॥[32]

मयूराणां नृत्यस्य वर्णनं मत्तमयूरवृत्तावेव कृत्वा कविप्रतिभां दर्शयति ।

<u>कुसुमविचित्रावृत्तम्</u> –

सुहितमिलिन्दा बहुतमरन्दा परिमलपुञ्जा कलितकरञ्जा ॥

इहनृपवल्लीव्रतततिमल्ली निबिडितपत्रा कुसुमविचित्रा ॥[33]

अत्र वृत्त्यनुप्रासोऽपि दृश्यते । वेङ्कटाद्रेः वर्णनमिदम् ।

<u>मालिनीवृत्तम्-</u>

ललितकमलशोभे पर्वतेन्द्रस्य पादे गमयति कृतसक्तिर्वत्सराणां शतानि ।

नरमृगपतिसूरेस्ताद्दशे वेङ्कटेशः कविरिव विगतान्यव्याप्टतिः श्रीनिवासः ॥[34]

चक्रबन्धेन निबद्धः श्लोकः –

नमामि मानदां गोदां नयनायनतां गतां

नमद्धामनताङ्गी तां नवपावनभां शुभाम् ॥[35]

---

[31] श्रीनिवासचम्पूः– प्रथमोच्छ्वासः, ५ श्लो

[32] श्रीनिवासचम्पूः– प्रथमोच्छ्वासः , श्लो ६

[33] श्रीनिवासचम्पूः– श्लो ४

[34] श्रीनिवासचम्पूः– श्लो १५

आतपत्रबन्धेन निबद्धः श्लोकः –

नतवत्सल राजीवनेत्र मामव यादव ।

नवजीवनदाराव वरादानवजीवन ॥[36]

अर्थालङ्कारा अपि बहुमनोज्ञाः यथा

<u>**उत्प्रेक्षालङ्कारः**</u> –

प्रायेण तृषितोऽर्कोऽपि सलिलं पातुमिच्छति ।

अन्यथा पुष्करस्थानं प्राप्नुयादर्यमा कुतः ॥[37]

अत्र श्रीनिवासस्य प्रणयाभिलाषः प्रकटितः । तृष्णया बाधितः सूर्योऽपि जलं पातुमिच्छति इति उत्प्रेक्षते कविः। तदनु तस्य प्रतिपादनमपि क्रियते यदि सूर्यः न पिपासितः तर्हि किमर्थं पुष्करस्थानं गच्छातीति सम्भावना हेतुना समर्थिता इत्यनेन **हेतूत्प्रेक्षा** ।

<u>**प्रतीपालङ्कारः**</u> _

दीपे वा तैले वा पतति पतङ्गो विनश्यति क्षिप्रम् ।

अत एव भणामि सखिस्नेहो वह्निर्न किञ्चिदप्यूनः ॥[38]

अत्र प्रसिद्धोपमानस्य वह्नेः उपमेयत्वं , उपमेयस्य सखिस्नेहस्य उपमानत्वं कल्पितं तत्रापि सखिस्नेहः वह्नेरपि ऊनः इत्युक्तत्वात् वर्ण्यस्योपमलाभेन तथान्यस्याप्यनादरः इति लक्षणात्

प्रतीपालङ्कारः ।

यस्तु स्वस्यैव चरणवत् कमलोल्लासं दधानः , जङ्घावत् शरधिगम्भीरः, नाभिवत् आत्मभूजनिनिदान-पद्मोपगूढः.... – अत्र प्रसिद्धोपमानानां कमल-शरधि-पद्मादीनां

---

[35] श्रीनिवासचम्पूः– श्लो ५, द्वितीयोच्छवासः, परिशिष्टः ६

[36] श्रीनिवासचम्पूः– श्लो ६, द्वितीयोच्छवासः, परिशिष्टः ७

[37] श्रीनिवासचम्पूः– श्लो १६, तृतीयोच्छवासः

[38] श्रीनिवासचम्पूः– श्लो १२, तृतीयोच्छवासः

उपमेयत्वमुक्तं , तथा प्रसिद्धोपमेयानां चरण-जङ्घा-नाभ्यादिनां उपमानत्वमुक्तत्वात् **प्रतीपालङ्कारः** प्रतीपमुपमानस्योपमेयत्त्वप्रकल्पनम् इति लक्षणात् ।

<u>मिथ्याध्यवसित्यलङ्कारः पर्यायालङ्कारश्च</u> –

चन्द्राब्जयोर्मिथो द्वेष इति मिथ्यान्यथा कथम् ।
चन्द्रे विष्णुपदे लीने तस्य श्रीः कमलं गता ॥[39]

अत्र चन्द्रकमलयोः द्वेषस्य (अर्थात् चन्द्रमसः उदये कमलानि सङ्कुच्यन्ते इति कारणेन तयोः द्वेषः इति) मिथ्यात्वं साधयितुं चन्द्रस्य श्रीः कमलेषु आगतेति मिथ्याकल्पना कृता । "किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं" इति लक्षणात् मिथ्याध्यवसित्यालङ्कारः । तथा चन्द्रस्य श्रीः चन्द्रमसं विहाय कमलेषु आश्रयं प्राप्ता इति पर्यायाश्रयत्वमुक्तमित्यनेन "पर्यायो यदि पर्ययेणैकस्यानेकसंश्रयः" इति लक्षणात् **पर्यायालङ्कारः** ।

<u>श्लेषालङ्कारः</u> –

संमुग्धालिपरिष्कृताब्जवदनं गत्युल्लसद्वंसकं ।
राजच्चनदनचारुचित्रतिलकं पुन्नागभाग्यास्पदं ।
रम्भोरुश्रिसमल्लिकाक्षगतिकं सत्पल्लवोल्लासितम् ।
रम्यं राजशिखामणे समदनं -

इत्यर्धोक्त एव तदभिमुखीभूय वयस्य मरालक, क्वास्त इति सस्पृहानन्दस्मितं पृच्छति श्रीनिवासे...

श्रीमद्वनं पश्यत ॥[40] इति वदति मरालकः । अत्र श्लोकेनानेन स्त्रीवर्णनं प्रतिभाति । वस्तुतः वनस्य वर्णनं इति मरालकेन अन्ते उच्यते । **श्लेषालङ्कारप्रतीतिः** ।

---

[39] श्रीनिवासचम्पूः– श्लो ७, तृतीयोच्छवासः

[40] श्रीनिवासचम्पूः– श्लो ११, तृतीयोच्छवासः

वने पद्मावतीमीक्ष्य मदनतापयुतः श्रीनिवासः एवं चिन्तयति - **किमेषा कन्दर्पशरव्यथां प्रापिता केनापि भवेत् । आः कः सन्देहः येनास्यः शरच्चन्द्रदशां प्रापिते गण्डमण्डले सखीजनरचितः मृगमदपत्रभङ्गः कुरङ्गभ्रमं जनयति । स हि पाण्डिमेवेत्थं जल्पति । किमनया प्रकृतानुपयुक्तया चिन्तया । प्रथमं तावदेतद्विचारणीयम् । किमस्यामहमिव मय्येषानुरक्ता न वेति । अथ वा किं तदद्यापि न निश्चीयते** । इत्यत्र **सन्देहालङ्कारः** प्रतीयते ।

कथमन्यथा कूणितनेत्रभागेन चक्षुषा सव्याजं मामियं पश्येत् । निरुद्धोऽपि कोऽपि विकारः कथमस्याः प्रसरेदङ्गेषु स्वेदलघुमुक्ताजालकैरलङ्कृताभिनवस्फटिकभित्ति-धवलाकपोलपाली कथमुत्तम्भयेदुत्तरं वासः , रोमहर्षणोद्भेदः, कथं नर्तयेद्दक्षिणानिल इव स्तामूरुकम्पः , कथं शिथिलीभवेन्नीविबन्धः, कथं भुविमालिखेत् चरणनखमणिः, कथं प्रस्फुरे प्राक्पुण्यवाराशितरङ्गबन्धुरं मम दक्षिणचक्षुः । कथं यानि भैष्मीहरण्काले शुभानि निमित्तानि तान्येव इदानीं पश्यामि ! कथं दूरादेव मां विलोक्य चिरमालोच्य सभ्रूभङ्गमनेन सखीकदम्बेन परस्परं समन्दहासमालपितम् । कथमनया नीलोत्पलदलावतंसया श्रितपोतचूतालवालनिकटदेशया वनितया सकङ्कण झणत्कारमन्यस्याः करकमलान्मां च तं च मुहुर्मुहुः पर्यायव्यावृत्तकन्धरं पश्यन्त्याः आच्छिद्य निगृह्य च चित्रपट आकुञ्चितभ्रूनिर्भर्त्सितमिव किमपि उपदिष्टम् । इति तर्कसहितं चिन्तयति श्रीनिवासः । **सम्भावनं यदीत्थं स्यादित्यूहोन्यस्य सिद्धये** इति लक्षणात् **सम्भावनालङ्कारः** ।

<u>व्याजनिन्दालङ्कारः</u> –

चन्द्रोऽयं भ्रमसङ्गतेन विधिना विष्णोः पदे स्थापितः ।
पूर्णत्वं गमितः सुलक्षण इति ख्यात्याऽपि संयोजितः ।
चक्राह्लादकरत्वमेति कमलानन्दं विधत्तेथ वा ।
स्नेहं वा किमसौ त्यजत्यपि मेधोः पीतंशुको वा भवेत् ॥[41]

---

[41] श्रीनिवासचम्पूः- तृतीयोच्छवासः- ३६ श्लो

अत्र विधेः व्याजेन चन्द्रं निन्दति पद्मावत्याः सखी, सख्युः विरहवेदनां दृष्ट्वा असहमाना सा एवं वदति । विधिः भ्रमया चन्द्रं विष्णुपदे स्थापितवानिति । निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते इति लक्षणात् **व्याजनिन्दालङ्कारः** ।

दीपकालङ्कारः- यस्य चामीकरोज्ज्वला गजा भूषाश्च , चापापकारिणी भ्रूलता मनोवृत्तिश्च, चामरश्रीविराजिता कीर्तिः प्रजा च , चातुर्यान्विताः द्विजाः शत्रवश्च, चमत्कृतिज्ञा मन्त्रिणः कवयश्च... अत्र गजानां भूषाणाम् आभरणादीनां उज्ज्वलत्वं, भ्रुवोः मनोवृत्तेश्च वक्रता, चामरश्रीविराजितत्त्वं प्रजानां कीर्तेश्च वर्णितम् । अतः**अर्थावृत्तिदीपकालङ्कारः** ।

उपमानोपमेयालङ्कारः –विवाहसमये श्रीनिवास- पद्मावत्योः परस्परावलोकनं वर्णयन् कविः – ततः प्रथमं देवी देवमलोकयत् । यस्याः वदनमिव कुवलयलोभनीयं वदनं नयनयुगलवदब्जसुन्दरं वदनम् । कुचयुगीव घनघटाकारमञ्जुला कुन्तलाली कुन्तलालीव सारङ्गत्रपादायिनी कुचयुगली । अत्र वदनेन सह नयनयुगलस्य सादृश्यं तथा कुचयुगलेन कुन्तलैस्सह परस्परं सादृश्यमुक्तम् । पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता इति लक्षणात् **उपमेयोपमालङ्कारः** ।

गूढोत्तरालङ्कारः – मरालकः श्रृङ्गारमञ्जरीं वने दृष्ट्वा "कासि त्वं? क्व यासि? किं ते पाणौ?" इत्यादि प्रश्नान् पृच्छति । तदा सा-

छाया न्यग्रोधसाले परिमललहरी चन्दने किंशुके सत्-
-पौष्पीशोभा फलश्रीरपि खलु वृक्षवाटीषु लभ्या ।
किंतैरेकैकसम्पत्परिकलनचणैः सर्वसम्पत्समृद्ध-
क्षोणीमन्दारचूतद्रुम तव गरिमा मद्गिरामप्यभूमिः ॥[42]

इति रसालद्रुमस्तवनव्याजादात्मानं स्तुवन्ती श्रृङ्गारमञ्जरी । "किञ्चिदाकूतमहितं स्याद्गूढोत्तरमुत्तरम्" इति लक्षणात् **गूढोत्तरालङ्कारः** ।

---
[42] श्रीनिवासचम्पूः - तृतीयोच्छ्वासः, १९ श्लो

अतिशयोक्त्यलङ्कारः-

यस्मिंस्तामरसभ्रमण मिलितैर्भृङ्गैः पतङ्गायितम् ।
संसृष्टैर्मणिबन्धकीरनिकरैः सम्पातिपत्रायितम् ।
केलीपुत्रिकयापि दिव्यसमयश्रीरामकान्तायितम् ।
लेपार्थं कलितैश्च चन्दनरसैरामोदि धूपायितम् ॥[43]

विरहतापेन तप्तायाः पद्मावत्याः स्थितिं धरादेव्यास्समुखे काचित् सखी एवं वर्णयति । तस्य करयुगलं कमलयुगलमिति भ्रान्त्या आगताः भृङ्गाः पतङ्गवत् करतापेन दग्धाः । कीराणां पक्षाः तु जटायुसहोदरस्य सम्पातेः पक्षाः इव दग्धाः । आलेपितः चन्दनरसोऽपि धूपवत् दग्ध इति । "सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्" इति लक्षणात् सम्बन्धातिशयोक्त्यलङ्कारः - अत्र भृङ्गाणां कीराणाञ्च करयुगलेन सम्बन्धकल्पना उक्ता इति हेतोः ।

पर्वतवर्णनम् – स एव हि वरचक्षुः श्रवण निर्जरकन्यकाविहरणभूमिः विश्वाधिकं काञ्चन श्रियं वहतः धराधरख्यातिं गतस्य गौरद्युतेः अगराजस्यापत्यं नगराजस्यांशावतारः शेषाचलो नाम । यश्च गिरिशोऽपि चन्द्रस्वरूपः तुङ्गभद्राकृतिरपि (भूवराहः) शतद्रुशोभितः (स्वामिपुष्करिणी) । अथ चैनमालोक्अयतस्तस्य चेतसि चिन्ता समजनि । किमयं विन्ध्यो भवेत् न हि न हि स हि करीरजाततिरस्कृतमहिमा अयं पुनः स्वपादैकदेशाश्रयवर्धित-करीरजातः । नापि मेरुः स च सुराक्रीडम् । नापि महेन्द्रादिः सह्येकरामाश्रयः । अथ वा सोयमेव भवेत् । शेषमारुतविवादेन भूतलं प्राप्तः दिव्यभोगिकुल –प्रणयिनः कलधौतरूपस्य रत्नसानोरपत्यं सर्पराजस्यांशावतारो भगवान् भुजङ्गादिर्भवतु यो वा को वा अवगाह्य तावत् पश्यामीति ।

अत्र कोऽयं पर्वतः इति चिन्तयन् श्रीनिवासः तस्य पर्वतस्य अन्यपर्वतेभ्यः श्रेष्ठत्वं वदति ।

हयवर्णनम्- मृगयाव्याजेन वनभूमिषु विनोदयामिति विचिन्त्य च नकुलमालाप्रेरितवराहदत्तेन किरातसैन्येन सह पद्मव्यूहमिव विलसत्केसरं, वैद्यमिव तिरस्कृतवातवर्गं, गङ्गाप्रवाहमिव

---
[43] श्रीनिवासचम्पूः - तृतीयोच्छ्वासः, ५३ श्लो

आर्यावर्त्यहृद्यम्, उत्तरगोग्रहणरणमिव स्तब्धकर्णं, वर्णसमूहमिव ह्रस्वदीर्घप्लुतसुन्दरं, चित्ररथमिव गन्धर्वश्रेष्ठं, वणिजमिव भाण्डभूषितं, कर्णाटदेशगोरसमिव मेघपुष्पसदृशं, वालिनमिव सुग्रीवपरिपन्थिनं, मदनमिव मानसम्भवं, प्रथममश्वकुलेषु, द्वितीयमुच्चैःश्रवसा, तृतीयं वातगरुडयोः, अदृष्टवाडवाननमपि राजनन्दनं नीलं कर्णे, श्वेतं मुखे, सम्पातिनं गमने, हयमारुह्य विपिनमयासीत् । इति हयं वर्णयन् कविः सहृदयमानसचक्षुष्पुरतः दिव्यं हयं सृजते ।

सभावर्णनम्- तृतीयोच्छ्वासे सभावर्णनम् वर्तते – **तस्यां किल संवर्तकालकालायामिव अम्बरमणिगणभूषितायां वरुणभार्यायामिव, अनन्तरत्नोच्छायोद्भासित-पुत्रिकाहर्षनजनचितायां, मयूरैरिव भासुरचन्द्रकान्तैः, गरुडैरिव विलसत् पतङ्गमणिभिः, प्रभातकालैरिव पद्मरागोज्ज्वलैः, इन्द्रैरिव सवज्रैः, वसन्तवृक्षैरिव सप्रवालैः, मणिजालकैरलङ्कृतायां सभायाम्** । अत्र पद्मराग-नील-वज्रादिभिरलङ्कृतायाः सभायाः वर्णनम् मनोज्ञम् ।

नगरवर्णनम्- काचित् कन्या द्रविडदेशस्थस्य नारायणपुरस्य वर्णनम् श्रीनिवाससम्मुखे करोति यथा- **ज्ञात एव किलानस्तमितामित- समस्तलोकस्थित- सभास्तारसंस्कृत-निखिलवस्तुविस्तारः तार इव ,तरुहरिणकुलोत्तरः उत्तर इव, गुरुगाङ्गेयकर्णभूषणहारि-नरोपचित कीर्तिसङ्ख्यः सङ्ख्यावानिव सुरसभावमतिदक्षःदक्षिणेष्वक्षीणाक्षिसमददायी द्रविडो नाम देशः । यत्र च निरन्तराक्षरामृत- नन्दितजगतां, गवां, ब्राह्मणानां, च परिपालनेनामृतजीवनानां, देवानां द्विजानां च आशिषा गोत्रानन्दकोप्यगदः सुखेन जीवति लोकः । तथा हि तिमिरबाधा कृष्णपक्षे, पुण्डरीकोत्पत्तिः सरसि, पाण्डुकथाश्रवणं महाभारते, रोहिणीसम्बन्धश्चन्द्रमसः, कुसुमपतनमालवालेषु, ऊष्मवायुप्रसारः ग्रीष्मे, क्षयः संवत्सरेषु । किं बहुना- मणिः सरुक् नदीवर्गः सदा बहुलगद्गदः ।सामश्रीरथाभात दैत्यदानवमण्डले** । इति वर्णयन् कविः द्रविडदेशस्थानां ज्ञानासक्तिं , धर्मासक्तिं, सुखजीवनञ्च वर्णयति । तथा तत्र प्रकृति-कालानुगुणं सर्वमासीदिति , नद्यादयः सदा जलपूरीताश्च इति प्राकृतिकसमृद्धिम् उल्लिखति । **यत्र च मालिन्यान्विता आरामाम न रामाः, राजद्वेषिणः**

कोकाः न लोकाः, किं च निषादादिजातिभेदसङ्कुलाः स्वरा इव भूधराः, चरणप्रहारमुदिता अशोका इव वीरलोकाः । इति तत्रत्यं सामाजिकजीवनस्थितिं वर्णयति ।

तत्तादृशस्योपवर्तनस्य मध्ये अस्ति पुरन्दरपुरःसरनिलिम्प- जनतास्तुत- सम्पत्प्रपञ्चमणिमञ्चायमान- नाकलोकप्रतिबिम्बायितशोभाभवनं , वनमिव कमलावासस्थानं आस्थानं सर्वसम्पदां पद्मवन्निशान्तरमणीयं, लसत्सुराजन्यमप्यदृष्ट- सुराजन्यं नारायणपुरं नाम नगरम् । यत्र च सूर्यसोमसन्ततिपीठिताः वाराः इव वीराः, वातगतिबन्धवः कुरङ्गा इव तुरङ्गाः । श्रीनिवासयोग्यानि वनानीव भवनानि – इति नगरवर्णनम् ।

सूर्योदयवर्णनम् – अथ कथं कथमपि विरहवेदनाभूयिष्टं कालं यापयति भगवति श्रीनिवासे कदाचित् कुवलयेष्वसङ्कोचकरप्रसारे चक्रानुरागरहिते भूप इव निष्प्रभत्वं गतवति चन्द्रे पतिव्रतोचितव्यापारायामिव कृतनिजनायकानुगमनायां यामवत्यां अलमस्माकं कलङ्किनोऽस्य राज्ञः सेवाजनित चलसुखेनेतीव विष्णुपदे एव तत्क्षणं लीनेषु नक्षत्रेषु, इयमेव प्राप्तकालप्रतिक्रियास्माकमिति विचिन्त्येव वने एव मुद्रितमुखं निवसत्सु तत्परिग्रहेषु नीलोत्पलेषु , राजहंसतोयोभयपक्षसमाना वयमितीव निश्शङ्कं सञ्चरत्सु कदम्बेषु , सुमनोवृत्तिशोभितानां किं भयमस्माकमितीव सरलितग्रीवं गायत्सु मिलिन्देषु, तदेकशरणेषु द्विजेषु, पुनस्तदुदयमाकाङ्क्षमाणेष्विव, तपस्वितां प्राप्तेषु चकोरेषु, गतेऽपि स्वामिनि धैर्यत्यागो नोचित इति निश्चलप्रकृतितया निवसत्सु चन्द्रकान्तमणिषु, विरामसमयोज्जृम्भमाण- कोकशोकानलप्रभा- पटलैरिवारुण- देहकान्तिजालकैः शोणीकृतासुदशदिशासु, पद्मिनीनामयं विकासकाल इति ज्ञापयन्तीष्विव विकसन्तीषु कमलिनीषु, उद्घाटयत कपाटं, परिष्कुरुत वीथिकां, बध्नीत वन्दनमालिकां, सत्कुरुत शरीराणि, किं न जानिथमयमागत एव भगवांश्चित्रभानुः पुरस्कृतसुभानुस्तं सन्तोषयतेति प्रकम्पितवेत्राग्रेषु स्वाधिकारानुरूपमाचरत्सु भटेष्विव तत्र तत्र सञ्चरत्सु प्राभातिक- दरफुल्ल- कमलसंसर्ग-कषायपवमानपोतेषु अभ्युद्यत-पुण्डरीकश्रीश्चामर-श्लाघ्यविभवः परमुदितमत्तसारङ्ग- सहस्रपत्रः पूर्वतनं दोषाकरं राजानं निर्जित्य अपर इव भूतः शूराख्यातिरमणीयः प्रभातकालोदयः परिष्कृतानन्तः

सकलजगत्सु कर्मपरिपाक इव मूर्त्तास्त्रयीमूर्तिः तेजोभूमा पूर्वदिग्लावण्यसीमा शनैरुल्ललास । सतिसप्तम्यां अतीवमनोज्ञरीत्या सूर्योदयवर्णनं कृतम् ।

सिन्दूरैरपि शङ्कितञ्च घृसृणैस्त्रस्तं च काश्मीरजै-
र्विभ्रान्तं कनकोत्करैः शिथिलितं भ्रष्टम् कुसुम्भैरपि ।

किञ्चानम्य निरीक्षितं तव जगद्वन्द्यैः प्रतापाङ्कुरैः ।
सर्पयत्यद्य नभः स्थलेऽम्बुजसुहृद्भासां विलासो मुहुः ॥[44]
सत्रं कोककुलस्य हंससमितेर्दोलां प्रपाजालकं ।
भृङ्गाणामतनोः कलम्बनिचयं धातुः परं मन्दुरां ।
पर्यङ्कं च वियोगिनीजनततेर्गेहं रमायाः सरो-
जालिं सत्कुरुते करैर्दिनकरः काश्मीरजन्मारुणैः ॥[45]

प्रभाते पिकानां कलरवः, हंसानां चलनं, भृङ्गाणां प्रपाजालकमिति कुसुमानि विवक्षितानि, तेषां विकसनं , सरोजानाञ्च विकसनं एवं कविः सूर्योदय- कालीन- प्रकृतिविकारं हृदयङ्गम- शैल्या वर्णयति ।

चन्द्रोदयवर्णनम्- ततश्च गगनगङ्गापुण्डरीक-गलन्मारन्दधारासार इव हरिहयोद्यान्-विहरदैरावत- गण्डलकषणच्युत- हरिचन्दनतरुचूर्ण इव मित्रीभवन्नारदे जगद्धवलीकरणविशारदे निन्दितक्षीरे, त्रासितजारे शुभ्रीकृतनिखिलकान्तारे स्तोकितचकोरकक्षुधि चक्रवाककामकेलिरुधि, वर्धितस्वाधीनपतिकाकामयुधि, कुमुदभिदि धर्मनुदि उन्निद्रशम्बरशिरच्छिदि पथिकहृद्रोगे वर्धितरागे विकचाविकच-भावानुमीयमानेन्दीवर- पुण्डरीकविभागे पञ्चमस्वरविज्ञापितपिकबकविवेके पारावारानन्दपरिपाके चुलुकिततमसि चालितयुवमनसि, स्फुरच्चन्द्रमसि प्रवृद्धकोकिलागीते वज्रीवन्मन्दवाते मुकुलितवारिजाते, सम्भोगश्रुङ्गारानुकूलसुरपारिजाते, विमलचन्द्रिकाप्रसारे

---

[44] श्रीनिवासचम्पूः - तृतीयोच्छ्वासः, ३ श्लो

[45] श्रीनिवासचम्पूः - तृतीयोच्छ्वासः, ४ श्लो

उदितभूयिष्टं पूरितसंयुक्त- युवजनताभीष्टं भूषितपुरुहूतकाष्टं सन्ध्यासमय- तापसलोकविस्मृत- स्फटिकमणिमालाभ्रमद- परिमललोभ- निश्चलनीरावनीलीन- चञ्चरीककुलालङ्कृत- सुवर्णमुखरीकैरवं द्रवीभवमिन्नजशिलाजाल- दुर्लङ्घ्यकुल्यारचनाविघ्नित- नवाभिसारिका- मनोरथपरम्परारम्भम् अत्युच्चमाकन्द- तरुशिखरगत- कोकाङ्गनागलत्- अश्रुबिन्दुसन्दोह- अकालवर्षागमभ्रमतोषित- पोतचातकचक्रवालं चन्द्रमालोक्य- गोभिः परिप्लुतं भाति सश्रीकं चाब्जमण्डलं । इति मदुक्तिमाकर्ण्य किञ्चिद्धसन्त्याः – नो चेत्तत्र कुतस्तिष्ठेत्सारङ्गः प्रणयाकुलः इति वदन्त्याश्चम्पकवल्ल्याः वचमनाकर्ण्यैव विरहभारकृशाङ्गीं मां प्रत्यवादीत् । अत्र चन्द्रोदयकाले चकोराणां विरहिणां कैरवाणां च वर्णनं अतीव हृन्मनोहरं वर्तते ।

ऋतुवर्णनम् – काव्येऽस्मिन् वर्षाकालस्य तथा शरदृतोः वर्णनम् अतिमनोहरं । यथा- शुकः श्रीनिवासमाह "**देव सर्वमपि वृन्दारकवृन्दमाकारय । अधुना तु परिपूर्णवाहिनीकः समृद्धकमलः । उत्पूयमानहरिकदम्बः स्फुरच्चापः ज्याहितकरः शूरराजतेजोऽपहारकः दृप्तसारङ्गनिकरः महाराज इव वर्षासमयः समाजगाम ।**

अथ तस्यां वर्षावासरकलारमण्यां क्षीणप्रायं गतायां दृष्यादृश्यगोपयोधरां हंसकल- सन्नीरजपदां स्फुटपरिकलितनिर्मलसां निरवग्रहराकसम्पदभिरामाम् अच्छाच्छशुभ्रां शुकरमाप्रकटोप- लक्ष्यमाण- नक्षत्रमालां अतनुबन्धुजीवनानन्दकारणं रम्भोरुश्रियं दधानां शुकव्याहारमणीयां स्फूर्जच्चन्द्रशालिनीशाभरामां ललितमृणालभुजाभूषितां शरदं साक्षादिव पद्मावतीं विलोक्य.... इति । अत्र शरदृतोः पद्मावत्या सह सादृश्यमुक्तम् । तथापि शरत्कालीन- प्रकृतिवर्णनं रमणीयशैल्या कृतम् ।

विवाहमहोत्सवस्य वर्णनम् – श्रीनिवासपद्मावत्योः विवाहवर्णनं अतीव रमणीयम् यथा- देवतानामागमनम्- **अथ ताभ्याकारिताः सर्वे सबुधा अपिअ विबुधाः भवेन विभवेन च राजमानाः मानयुक्ताः विमानयुक्ताश्च फणीन्द्राचलमगमन् देवाः** । श्रीनिवासः विवाहसम्बन्धिकार्याणां दायित्वं देवतासु वितनोति यथा लौकिक विवाहेष्वपि क्रियते – **कथय चतुराननं मद्वचसेत्याज्ञापयति विष्वक्सेनोक्तः परमेष्ठी कुबेरमवदत् । धनाधिपते देवः**

श्रीनिवासः आज्ञापयति तावन्मीनमेषकुम्भराशयो वर्तन्ते देवानाममृतं स्वामिसरसि पुरैव स्थापितम् । काष्ठार्थं दिग्देवताः सन्त्येव पयोर्थं मेघाः आज्ञापिताः । अलङ्कृतयः कविनार्पिता एव अन्यदाज्ञापनीयं भवति तस्माद्भावनेव शरणमिति तथास्त्विति तेनोक्ते गृहीत्वा द्रव्यजातं तत्तद्योग्यं जनं तत्तद्व्यापारे नियोजयामास तथा हि कामदाने शङ्करम् । सुरभिद्रव्यसाधने वसन्तम्। आशुगमनागमनव्यापारे वायुम् । चन्द्राम्बरमणिग्रहणव्यापारे स्वर्भानुम् । वनिताजनसत्कारे मदनम् । अतनुदीपप्रबोधे चन्द्रम् । आर्याज्ञापालने स्कन्दम् । गीतादिश्रवणे वैश्रवणम् । सर्वव्यापारेषु मङ्गलम् । तदनु मङ्गलस्नानसमये लक्ष्मीं स्मरन् श्रीनिवासः सूर्यं प्रेषयित्वा लक्ष्मीं नयत्विति आदिशति ।

विवाहमहोत्सवे सुमङ्गलिस्त्रियः वराय तैललेपं कुर्वन्ति । तस्य वर्णनम् एवम्-

घनीभूतस्नेहैः प्रथममभिलिप्याब्जसदना । द्रवीभूतैर्लिप्तं तदनुरमणं सा कृतवती।
हृदिस्थै सुस्नातं सुरसनिकरैश्चित्रमधुना । कटाहस्थैः स्नातुं हिमगिरितनूजाह्वयति तम् ॥

तदनु अन्तःपटधारण महोत्सवस्य वर्णनम् – **अथ सम्प्राप्ते मुहूर्ते सावधानेन स्थैर्यमिति भणति पुरोधोद्वये वादयति घण्टां ग्रामगणके वाद्यमानेषु तुर्येषु, गायन्तीषु तद्देशभाषाकुशलासु चिरण्टीषु पठत्सु विविधमन्त्रान् ब्राह्मणेषु, आकाशभूपेपि आनन्दामृतसरोमज्जन्मानसे पद्मावती देवी स्वाञ्जलिकलिततण्डुलान् श्रीनिवासस्य मौलावक्षिपत् । देवोऽपि तस्याः ।**

माङ्गल्यधारणमहोत्सववर्णनम् –
शश्वद्यः सुरसोर्मिकः कमलिनीवर्गं न विस्मापयैत्त-
-त्पाणिश्च तदीक्षणव्यतिकरो रागानुबम्धोज्ज्वलः ।
स्वीचक्रे कमलापतिस्तदुभयं पूर्वं बबन्ध स्वयम् ।
कामार्तः किल साहसादिव गले माङ्गल्यसूत्रं ततः ॥[46]

ततश्चातिक्रान्ते लाजाहोमविधौ वियद्भूपालः सादरं श्रीनिवासमजीगदत्

[46] श्रीनिवासचम्पूः - पञ्चमोच्छ्वासः, २० श्लो

आशेषाचलमासमुद्रभमरक्ष्मां पालयाद्राविडं ।
क्षीणीसास्वरथेमपत्ति च समुद्राढ्यं सकोशायुधम् ।
अन्यत्किञ्चिदपि प्रदेयमवनौ देहश्च ये बान्धवाः ।
सर्वं तेऽद्य समर्पितं तदधुना त्वन्मुद्रया मुद्यताम् ।[47]

एवं विवाहस्य सर्वविधिविधानानां वर्णनं आकर्षकं वर्तते ।

विप्रलम्भश्रृङ्गारः – श्रीनिवासः पद्मावतीं वने दृष्ट्वा तस्यामनुरक्तः तस्याः विरहं असहमानः चिन्तितोऽभूत् । तस्य वर्णनं कविः एवं करोति- **भगवानपि तत्कटाक्षार्धचन्द्रव्रणितहृदयः किञ्चिद्दूयमानेन मनसा वातोज्जीविनीमिव पश्चादेवोपगन्तुमिच्छन्तीं चेतोवृत्तिं बलादाकृष्य सुन्दर इव मारीचनन्दने, बधिर इव संज्ञाव्यवहारशालिनि, कश्यप इवोल्लसन्मारीचौ, ऐरावण इव निजकरोद्भासितपुष्करे, धर्मकालाध्वनीन इव कामितच्छाये, भगवति चित्रभानौ चरमाचल शिखरिणमारोहति यथास्थानमागत्य विसृज्य किरातचक्रं स्वामिसरः पुण्यजलेषु अक्रमकृतसन्ध्यावन्दनाद्यवश्यव्यापारः, कृताकरगुप्तिरेव बकुलमालकल्पितपुष्पशयने निविष्टः** । अत्र कविः अक्रम-कृत-सन्ध्यावन्दनाद्यवश्यव्यापारः इत्यनेन श्रीनिवासस्य अन्यमनस्कतां वर्णयति ।

सम्भोगश्रृङ्गारवर्णनम् – धर्मदेवता भूत्वा नारायणपुरं प्रविश्य निशि पौरविलासं ददर्श । तत्र कश्चिद्विलासी काञ्चनस्त्रियं वक्ति

नीलाम्बरासि वामोरु मुसल च करे तव ।
योग्या तवास्तु रामाख्या तनुयुद्धं भजाधुना ॥[48]

अपरः कस्याश्चन वृत्तान्तं सखायं प्रत्याह

ज्यावल्लीलुलिता शिवस्य मलिनं चक्रं नखाङ्कोल्लस-
त्कोदण्डं मुकुलीबभूव च शरस्याद्यावतारक्रमः ।

---

[47] श्रीनिवासचम्पूः - पञ्चमोच्छ्वासः, २१ श्लो

[48] श्रीनिवासचम्पूः - चतुर्थोच्छ्वासः, ५ श्लो

आयस्ता सुमवाटिकाशिथिलितप्रायांशुकस्यन्दनः ।
प्रायेणाब्जमुखी सखेरिषुरणश्रान्तेव संलक्ष्यते ॥[49]

कश्चिदपरा मुग्धावस्थामारभ्य क्रमेण रूढयौव्वनां कामुकीं वर्णयति-

यत् पुष्पेषु शिलीमुखावृत्तिरभूत् सौरभ्यमासीत्ततः ।
पुष्पं चोत्कलिका च पल्लवकुले सारक्ततां ते ततः ।
पश्चात्सद्विटपालिवेष्टनविधिः पश्चाद्रसापेक्षता ।
यस्यास्तद्विरला लता विजयते सा कापि नेत्रोत्सवः ॥[50]

कश्चिद्वनिता यैरेवाक्षरैः स्वपुरुषः सल्लपयति तैरेवाक्षरैः प्रतिवक्ति – वीर ते नैपुण्यं दर्शय । मे खलाभियोगो न सुखाय । रामाधिकस्वभावात् हृदयङ्गमश्रीरसि । सरलता ते लोकोत्तरा । सन्मालागुणनायकगुणोल्लसितसम्पत् । अधरकृत- सकलबन्धु- जीवरुचिरासि । सर्वदोरुसम्पदा मनोहरासि । रुच्यतिरेकान्मामधः करोषि । त्वद्रत्याविस्मयान्वितं मे चेतः इति । एवं नारायणपुर्यां रात्रौ प्रमदानां पुरुषाणां च प्रेमालापं वर्णयति ।

सैद्धान्तिकदृशाऽध्ययनम्

पर्वतवर्णनावसरे शेषाचलस्य महिमानं कथयति । कदाचित् शेषमारुतयोः कः श्रेष्ठः इति विवादः जातः तदा अचल रूपेण स्थितं मारुतं शेषः अशेषप्रयत्नेनापि चालितुमशक्तः । अतः शेषाचलमिति प्रसिद्धः इति भविष्योत्तरपुराणे उक्तं वर्तते ।

भगवतः श्रीनिवासस्य वर्णनं कुर्वन् कविः तस्य स्वगतभेदविवर्जितत्त्वमपि प्रतिपादयति यथा- **किञ्च यच्चरणश्लाघ्यं भुजं ललितांसश्रियं वक्षःस्थली सर्वतोमुखजातशोभान्वितं पादं च वहन्ति। अपि च यः फलसात्पदं चक्षुः नितम्बे कल्याणगुणान्वितं नेत्रं वक्षसि विपुलनयनाभियोगं च धत्ते । किं चाथोर्दरशोभां कण्ठे कन्धरोल्लसितत्त्वं, केशेषु कुन्तलसंस्थितिं , पाणौसदाशयाभिरामित्वं , सर्वाङ्गे च धारयति** । इति श्रीनिवासः कल्याणगुणोपेतः, तस्य सर्वाङ्गानि इष्टप्रदानि, सर्वावयवाः सर्वसमर्थाः तेषु भेदो न मन्तव्यः

---

[49] श्रीनिवासचम्पूः – चतुर्थोच्छ्वासः, ६ श्लो

[50] श्रीनिवासचम्पूः – चतुर्थोच्छ्वासः, ७ श्लो

इति विषयः ध्वन्यते । तथा चरणवत् कमलोल्लासं दधानः जङ्घावच्चरधिगम्भीरः , उदरवद्वलिविभङ्गशाली इत्यादि वर्णने अवयवावयविनोः उपमानोपमेयभावः । अनेन भगवतः तस्य अवयवानां भेदो नास्तीति ग्राह्यम्।

श्रीनिवासः साक्षात् विष्णुः- बकुलमाला आकाशराजस्यास्थाने आगता, धरादेव्या सत्कृता श्रीनिवासस्य परिचयं कारयति यथा- **देवि धरे शृणु मदागमनकारणम् । यस्य वाणी स्नुषा सत्यपूता च, कामस्तनयः सत्यश्च, सुग्रीवो देहः अश्वश्च...** इत्यादि वर्णनं करोति । वाणी नाम सरस्वती । तस्याः श्वशुरः श्रीमन्नारायणः अतः एषः श्रीमन्नारायणस्यावतार एव इति ज्ञेयम् ।

गङ्गा पादसरोजपुष्परसति व्यालधिपतिस्तल्पति ।
त्रैलोक्यञ्च कुटुम्बति द्विरसनद्वेषी रथत्यण्दजः ।
कालः शस्त्रति शासनत्यनुदिनं सा वेदवाणी गृह-
त्यब्धिर्यस्य रमाविलासरसिके तस्मिन्न किञ्चिद्गुणाः ॥ [51]

अनेन भगवतः विष्णोर्लक्षणमुक्त्वा श्रीनिवास एव विष्णुः इति प्रतिपादयति ।

आकाशराजः बकुलमालया श्रीनिवासपद्मावत्योर्विषये यदुक्तं तत् पुनः परीक्षितुमुद्युक्तः शुकाचार्यं पृच्छति । तदा आचार्यः अनयोः विवाहः सर्वलोकसम्मतः इत्यवदत् – **पुराणाचार्यः शुकः प्रष्टव्य इति स्मृतिमात्रकृतसन्निधानः यथाविधि पूजितः कथयामास शुकयोगी राजन् आवहितो भव । पुरा खलु त्रेतायां श्रुत एव स्यात् पद्यमानेषु पुण्यप्रबन्धेषु कश्चिद्रामो नाम राजा दाशरथिरयोध्याधीश इति ....तदनु चित्रभानुप्रवेशनिर्गमपूता सीता प्राप्तराज्यं राममवादीत् आर्यपुत्र मायासीतेयं मायासिता दुरात्मना रावणहतकेन । तदियं भार्यापदे स्थापनीयेति । रामस्तु तदाकर्ण्य प्रिये जानकि एकपत्नीव्रतधरोऽहमिदानीं । ख्नुतकृष्णावतारः तारेशमुखीमेनां मेनाङ्गजातामिव शिवो भूभृत्सुतामङ्गीकरोमि इत्यभाणीत् । राजन् सैवेयं पद्मावती स एव श्रीनिवासः ।**

---

[51] श्रीनिवासचम्पूः – चतुर्थोच्छ्वासः, १३ श्लो

दशावतारवर्णनम् – बकुलमाला श्रीनिवासं वर्णयन्ती एवं वदति - मत्स्य इव वनविहाररसिकः, कूर्म इवोद्धृतचन्द्रगोत्रः, वराह इव क्षमान्वितः, पुराणनृसिंह इव नृसिंहः, वामन इव उग्रमार्गणः, भार्गव इव सहस्रबाहुगर्वहरः, राम इव अचलोद्भूतिभूषितः, कृष्ण इव भद्रानन्ददायकः ,बुद्ध इव नायज्ञप्रीतः, कल्कीवसुकृतोद्भवनिदानम् । अथ वालमुपमित्या स एव मत्स्यादिरित्यार्यवादः – इति विष्णोः अवतारेषु न भेदः । श्रीनिवासोऽपि विष्णुरेव इति ज्ञायते ।

६.४. मानवीकृष्णमूर्त्याचार्यस्य देशकालादिविचारः

कविरत्नं कविभूषणमिति बिरुदाङ्कितः कृष्णमूर्ताचार्यः मैसूरुनगरनिवासी । मानवीकृष्णसूरिरधुना चम्पूकृतिं सृज्यते...[52] इति उल्लेखेन मानवीति वांशनाम अस्य स्यादिति भाति । चम्पूकाव्यस्योत्तरोपदेशभागे सुमतिं पूर्णबोधः श्रीराघवेन्द्रगुरुसार्वभौम-पीठे विराजमानानां श्रीसुयमीन्द्रतीर्थानां सन्निधिं गच्छ । गुरुणा उपदेशञ्च प्राप्य जन्म सार्थकं कुरु इत्यादिशति । अनेन काव्यमिदं सुयमीन्द्रतीर्थानां समये रचितं स्यादिति ज्ञायते । सुयमीन्द्रतीर्थानां वेदान्तसाम्राज्यशासनकालं क्रि,श त्रयस्त्रिंशदुत्तर-नवदशशततमतः सप्तषष्ट्युत्तर-नवदशशततमपर्यन्तम् (१९३३-१९६७)इति तु सुस्पष्टम् । अतः कवेः जीवितकालोऽपि अस्मिन् काल एव स्यादिति ज्ञायते ।

६.५. पूर्णबोधचम्पूः

कविवर्येण विरचिता पूर्णबोधचम्पूः चम्पूशैल्या विरचितं लघुकाव्यम् । काव्येऽस्मिन् पूर्णबोध-सुमत्योः संवादरूपेण कविः नैकान् विषयान् प्रतिपादयति ।

आयान्तीललितैः पदैश्च मधुरैर्यः कर्णजाहेक्षणा।
प्राञ्चूतीसरसैः कटाक्षविभवैर्मन्दाक्षमन्दस्मितैः ।

---
[52] पूर्णबोधचम्पूः श्लो १७

साकं साकमलामलां कलयते यस्याब्जकण्ठेस्रजम् ।
विश्वं त्राण परायणस्स भगवानिक्ष्वाकवः पातु नः ॥

इति मङ्गलाचरणे इक्ष्वाकवं रामं स्तौति । ललितमधुरपदैः आगच्छन्ती विशालनेत्रा सीता कटाक्षवैभवेन, मन्दहासेन रामस्य कण्ठे सदा कलिता । तादृशः विश्वरक्षकः रामः अस्मान् पात्विति प्रार्थयते कविः । पुनः नृसिंहं वर्णयति

कयाधुनाथस्यदितं दिताहितः । करिष्यतीशो पिधया कयाधुहा ।
इतीवपश्यत्स्वमरेषु सर्वगो यः। आविरासीन्नरकेसरी भवन् ॥[53]

कयाधुनाथस्य हिरण्यकशिपोः संहारं कथं करिष्यतीति देवेषु पश्यत्सु नरसिंहरूपं अपूर्वं स्वीकृत्य असुरं सहृतवान् इति स्तौति ।

कौतस्कुताघौघसमुन्नताद्रे-र्विदारणे दारुणवज्रमूर्तैः ।
रक्षोभरक्षोभकरिअर्नखाग्रैर्हर्यक्षचक्षुस्सभयं भिनत्तु ॥[54]

अघानां अद्रेः विदारणे वज्रायुध इव समर्था नृसिंहस्य नखाः । तादृशः हर्यक्षचक्षुः नृसिंहः अस्माकं पापाद्रिं भिनत्तु इति नखस्तुतिं विअदधाति कविः ।

वेदव्यासं स्तौति-

अणोरणीयान् महतोमहीयान् । गुरुर्गुरूणां प्रभवः श्रुतानाम् ॥
यो वासवीसूनुमहं वृणे तं । कविं पुराणं त्वनुशासितारम् ॥[55]

वेदव्यासः स्वयं नारायणः । अतः अणोरणियानिति भगवतः स्वरुपं स्तौति । यो ज्ञानी ब्रह्मसूत्र-पुराण-महाभारतादीनां कर्ता स वेदव्यासं वरं वृणे इति । किं वरं वृणुते इति अस्मिन् श्लोके प्रकटयति ।

अद्धानद्धा सुगुणैर्विशुद्धा । हृद्यानवद्या श्रुतिसारवेद्या ।

---

[53] पूर्णबोधचम्पूः श्लो ५
[54] पूर्णबोधचम्पूः श्लो ६
[55] पूर्णबोधचम्पूः श्लो ९

सरस्वती सत्यवतीप्रसूतेः । सारस्वतं सम्पदमातनोतु ॥[56]

नैकसद्गुणैः विशुद्धा , हृद्या अनिन्दनीया सर्ववेदैः गम्या वेदव्यासस्य स्नुषा सरस्वती ज्ञानसम्पदमातनोतु इतिप्रार्थयते ।

मध्वाचार्याणां स्तोत्रम्

आविर्भावमुपेत्यकौ कलिल्कलाकल्लोलमूलाकुलयश्चित्तं विमलीचकार विदुषां नारायणाज्ञाकरः ।

पाराशर्यसपर्ययार्जितमतोमाङ्गल्यभाष्यं सतां तेने सिन्धुरिवामृतं मुनिरिह स्यात्पूर्णबोधोभिदः ॥[57]

कलिकालकल्माषं अपनेतुं वेदव्यासमहर्षेः ब्रह्मसूत्राणां यथार्थं प्रतिपादयितुं नारायणस्य् आज्ञानुसारंभूमौ आवातरत् मध्वनाम्ना । ब्रह्मसूत्रभाष्यं विरचय्य सिन्धुरिव अमृतं तेने इति ।

श्रीराघवेन्द्रतीर्थाणां स्तवनमपि श्लोकत्रयेण विहितं यथा

मन्त्रागारे जगति विदिते सेवकानां सुरद्रुः ।सुप्ते मय्यानत-जन-त्राण-कर्मण्युदारः।

स्वप्ने दृष्टस्सुहसितमुखो मामुदीक्ष्य स्थितो । यस्सोऽयं जीयत्कनककपिशो राघवेन्द्रः कृपाळुः ॥[58]

सर्गोऽप्ययं भूतनृजोनिसर्गाच्छुचिर्महिम्ना बहुना प्रतीतः ।

मन्त्रालये मान्त्रिकमौळिमान्यः प्रसीदतु श्रीगुरुराघवेन्द्रः ॥[59]

चम्पूकाव्यस्यास्य उद्देश्यं एवं वक्ति-

देवानां प्रियमुच्छितुं कुतुकितायष्टुं च देवप्रियान् ।

रामप्रेमयुजां सदागतिजुषां श्लाघास्वमोघाशयाम् ।

---

[56] पूर्णबोधचम्पूः श्लो १०

[57] पूर्णबोधचम्पूः श्लो १३

[58] पूर्णबोधचम्पूः श्लो १४

[59] पूर्णबोधचम्पूः श्लो १५

सन्तुष्यन्त्वनयाम्बुधा इति धिया पूर्णप्रबोधाभिदामेनां ।
मानवीकृष्णसूरिरधुना चम्पूकृतिं सृज्यते ॥[60]

ततः स्वाहङ्कारखण्डनपरः श्लोकः दृश्यते । ज्ञानिनः प्रार्थयित्वा कथां प्रारभते कविः । कश्चन सुमतिर्नाम भूसुरः पूर्णबोधार्यसन्निधावागत्य केचन विषयाः चर्चितव्याः इति निवेदयति ।तेन कदाचित् केनचित् विप्रेण सह मेलनमभूत् । तस्यौपन्यासं श्रुण्वतः सुमतेः मनसि श्रीमदाचार्याणां शास्त्रं श्रोतव्य इति आगतः यतो हि स विप्रः उपन्यासचरमभागे श्रीमदाचार्यशास्त्रोक्तदिशा कर्तव्या या श्रीनारायणोपासना सैवप्रेक्षावदपेक्षार्हमोक्षाय कल्पते नान्यः पन्थाः इति निजहृदयकवाटमुद्घाट्य घण्टाघोषघोषमवादीत् । तदा तेन सुमतिना सह सम्भाषमाणः तस्य श्रीमादचारयाणां शस्त्रे रतिं वीक्ष्य पूर्णबोधार्यः नैकान् विषयान् बोधयति । मुख्यांशान् उक्त्वा पूर्वोपदेशं समापयति । उत्तरोपदेशे भगवतः वर्णनं रामायणकथा, सुन्दरकाण्डकथा च निरूपिता । श्रीरामस्य वर्णनम्, हनुमतः दौत्यं , अशोकवनस्थायाः सीताय़ाः वर्णनम् अति मनोज्ञं वर्तते । पुनः भीमावतारस्य मध्वावतारस्य वर्णनं दृश्यते । पूर्णबोध-सुमत्योः संवादः काल्पनिकं स्यात् । तथापि अत्र विद्यमानाः सैद्धान्तिकांशाः प्रमेयाश्च यथार्थबोधकाः । तदनु पूर्णबोधः सुमतिं स्रीसुयमीन्द्रतीर्थ्-सन्निधिं गत्वा गुरूपदेशं स्वीकुरु येन तव स्वरूपोद्धारः स्यादिति आदिशति । गुरुस्तुतिरपि अत्र वर्तते । श्रीराघवेन्द्रस्तुतिः, श्रीसुशीलेन्द्रस्तुतिः, श्रीसुव्रतीन्द्रतीर्थस्तुतिश्च अत्र दृश्यन्ते ।

श्रीरामवर्णनम्- **सन्तानेज्योतिषः सन्तान इव यः प्रादुरभूत्तमकुतोभयतयापादिकमति-भेरुण्डदण्डकारुण्ये अखण्डनीय- कोदण्ड-काण्ड-पाणिमण्डनं, सत्रासुमित्रापुत्रेण , निस्त्रासहृदयेन हृदयदयितेन जगदतिशयालु-धैर्योदार्य-शौर्यसौन्दर्य-सीमानाम् अनिरोध्यसाध्यधर्माणं कौसल्यासुप्रजसं श्रीरामनामानमात्मानुलोम-प्रेमरसमास्वादयमानः** । इति

आलङ्कारिकदृशाध्ययनम्

---

[60] पूर्णबोधचम्पूः श्लो १७

प्रासादगुणोपेतेऽस्मिन् काव्ये शब्दालङ्काराः अर्थालङ्काराः नैके प्रयुक्ताः ।

शार्दूलविक्रीडितवृत्तम्

कन्नस्तकनकाचलेन महता किन्तेन कल्पद्रुगुणा ।
किन्धेन्वा किमु नाकलोकमणिना स्थानान्तरस्थायिना ।
अत्राऽन्यत्र फलाप्तयेऽस्तु बलवन् मर्त्यैरमर्त्यैरपि ।
स्तुत्यं नित्यकृपावलोकनधनं श्रेयाज्ञसेनीपते ॥[61]

........इति लक्षणात् शार्दूलविक्रीडितवृत्तम् ।

उपजातिवृत्तम्

अपाश्रये रञ्जितमञ्जुळाञ्जलिर्विनिर्यदानन्दजलोक्षितेक्षणः ।
रामेधिरामेधियमेधनीयां करोत्वियं काण्डमृगप्रकाण्डम् ॥[62]

"अनन्तरोदीरितलक्ष्मभाजौपादौ यदीयावुपजातयस्ताः" इति लक्षणात् उपजातिवृत्तम् ।

मालिनीवृत्तम्

परिमळघनवाणीपावनीवत्रिवेणी । बहुविषयविचाराकर्णपीयूषधारा ।
जयमुनिहृदयज्ञा जातु दोषानभिज्ञा विहरतु रसनाग्रे राघवेन्द्रस्य् जाता ॥[63]

राघवेन्द्रतीर्थविरचितस्य परिमळग्रन्थस्य वर्णनपरोऽयं श्लोकः मालिनीवृत्ते निबद्धः ननमयययुतेयं मालिनीभोगिलोकैः इति लक्षणात् ।

शिखरिणीवृत्तम्

न मे वाणी श्रेणीफणिफणिति संस्कारसुरभिर्नकाणादाभिज्ञा न च निगमसारैः परिचिता ।
सकाव्यालङ्कारव्यवसिति बलाच्चापि चतुराकथाकारं शक्ता रसिकहृदयाकर्षणविधौ ॥[64]

---

[61] पूर्णबोधचम्पूः श्लो १२

[62] पूर्णबोधचम्पूः श्लो ११

[63] पूर्णबोधचम्पूः श्लो १६

स्वाहङ्कारखण्डनरूपोऽयं श्लोकः शिखरिणीवृत्ते निबद्धः रसैरुद्रैश्छिन्ना यमनसभ्लागः शिखरिणी इति लक्षणात् ।

वसन्ततिलकावृत्तम्

विद्वत्सभासु विजयी विजयीन्द्रतीर्थो ।

विद्यानिधिर्विविधवाग्विभवप्रदर्शी ।

व्याख्याकवित्व रचनासु महाप्राल्भो ।

भावेऽस्तु मे भवभवार्तिनिवृत्तिहेतुः ॥[65]

भरतभूमेः वर्णनम्

अहोकिलनिटाल- तटनीरन्ध्र-रुद्रज्ज्वाला-करालनयनाऽनल-निर्दग्ध- मुग्धापुरासुरस्य-धूर्जटेः जटापटलगह्वरोपह्वरात् निरर्गलं विनिगलन्त्याः गङ्गा-तरङ्गिण्य़ाः मङ्गल-तरङ्गरिङ्गुणभङ्गुरैः शिशिर-शीकर-शीभरैः स्वरैः समीरैः सुखावहे । सवन-भुजामवनि सवनभुजामवनि-भुञ्जासमज्ञाभिविज्ञाते साधन्यधन्य जनमान्य कर्मावरणस्य शर्मावहो निर्मलप्रदेशो सलिलानिल-पलाशफल कुलाजीव –जीवलोकमुखाद्गम्यमानस्य भगवतो नारायणस्य नानावतारलीलाजालैः प्रतीयमाने विद्वन्मणिकरण्डे भरतखण्डप्रकाण्डे । इति भारतवर्णनम् ।

अत्र **सुन्दरकाण्डवर्णनमपि** सुष्टु वर्तते ।

समुद्रवर्णनम् – पौनः पुनिकसमुज्जृम्भमाणद्वेषणासहसहाः तत्रौपरिष्ठः चलाचल-कल्लोलकुलाकुल-सलीलसलिल-खेलालोल नक्रचक्रमीनप्रतानादि-मोदमानयादोगणैः फेनफेनिलप्रदेशैः खमुत्पपात ।

---

[64] पूर्णबोधचम्पूः श्लो २०

[65] पूर्णबोधचम्पूः उत्तरोपदेशः- स्तुतिः

तदामध्ये समुद्रमुद्रिक्तसन्त्वान्त-रसागतान्तरसाशनवेषेण विरसां सुरसां सुरसां विदधे । इति सुरसायाः हनूमान् जितः इति कथा वर्णिता ।

चित्रकूटवर्णनम्

अयिवत्स चित्रकूटमधोऽधः तत्र तत्र । मधुपरागभञ्जुषु विटपिहितकुञ्जेषु ।
सरसीरुहेषु विहाराय विचरन्मधुपालिभिरभिरामेषु सरसीप्रदेशेषु ॥[66]
शुकपिककलालापस्वरमाधुर्यधुर्येषु सुखसमीरसञ्चारसुभगेषु । तदितरत्र पाश्चात्यभागे मन्मथमनोरथसिद्धिसहकारिसहकार-शिरस्पन्द-स्फुरित-कलकण्ठाकुण्ठकण्ठलीलाभिवल्गुषु । किंशुकपुष्पताम्रत्रोटित्रुटित-रसनिबरीसरसाल-फलरसास्वादनैरलसानां शुकदम्पतीनां सल्लापसम्पत्सु । मञ्जुमञ्जुनिकुञ्जेषु विजहीर्षया सञ्चरन्तीनां वनितानां सुकुमारतर-तनुपरिमलाहूत –मधुव्रतव्रातरतमुखरितेषु वनेषुदाक्षिणात्यभागे वनमालेषु प्रफुल्लमल्लिकामतल्लिका-समाश्लिष्ट-माकन्दसन्दोहसुन्दरेषु पादेषु । ततः पूर्वभागे कुन्दमन्दारनन्द्यावर्तादि-कुसुमकेसर-विसरपरिशधूलिधूसर-भूरिभासुरमधुर मधुकर-निकर-झेङ्कार-रवसङ्कीर्णेषु प्रपातप्रस्रवण-रमणीयेषु विशालास्थलेषु । गिरिनिर्झर-तुषारपरामर्ष-शीतलीक्रियमाणैः चन्दन-गिरि-मन्दिरैर्मद-गन्धवहैरानन्दावहेषु । मल्लिकाक्ष-पक्षविक्षेपणोक्षिप्तरोलम्बकुल-कोलाहल वाचालितेषु कासारेषु च । बहुविधविहरचातुर्यैः मया सह विअहरमाणो यः काकुत्स्थकुलशिरोमणिश्चाटुकारालङ्कारहीरः .....इति सीता रामेण सह चित्रकूटे विहारं स्मरति ।

विप्रलम्भश्रुङ्गारः

देव्यास्ते सुकुमारमन्मथकलाकल्लोलिताङ्ग्याः स्मरन् ।

लोकानन्दनचन्दनाद्रियवनस्पर्शं न चापेक्षते ।

दृष्टुं नोत्सहतेऽम्बुजं कुवलयसौधाकरीं सम्पदं ।

---
[66] पूर्णबोधचम्पूः उत्तरोपदेशः

देवः कृजतिकोकिलेमधुमदायत्तेऽपि धत्तेश्रुती ॥[67]

रामः मां विस्मृतवान् किमिति सीता सन्देहं प्रकटयति तदा हनुमान् रामः सीताविरहेण कथं कालं यापयतीति वक्ति ।

सैद्धान्तिकदृशाऽध्ययनम्

मुख्यांशरूपेण पूर्णबोधार्येण नैके प्रमेयाः उक्ताः अत्र –यथा

सकलवेदशिरोमणिना परमपवित्रेण वर्णाष्टकजटिलेन प्रणवेनव्यस्ताव्यस्ततया चतुर्धाभूताभिः व्याहृतिभिः "विष्णोर्नुकं वीर्याणि", सहस्रशीर्षापुरूषः" इत्यादिसूक्तैश्च नैरन्तर्येण गण्यमाना अपि गुणाः यस्य नोपसंह्रियन्ते । जगदिदमपावृतस्य यस्य आवास्यं यः कलामात्मीयां श्रियि निधाय पूर्णसुखमनुभवन् अन्तः सुखोन्तररामः स्वरमण इति प्रतीयते । । स्थित्वा गुरुषु यस्तद्वारा तत्त्वमुपदिश्य स्वयोग्यानन्दानुभव- बीजभूतज्ञानाभिव्यक्तेर्निदानं भवति । यस्मिन् सुखभुजि दक्षिणाक्षिगते जागर्त्येष लोकः । तेजोमय चित्तसम्बन्धिनः कण्ठस्थात् यस्मात् प्रत्यक्ष दृष्टानुभूत- बाह्यपदार्थज्ञानजन्य- वासनापरिणामरूपान् विविक्तान् शुभाशुभफलसूचकान् स्वाप्नपदार्थान् जानाति जीवः । यो वै विश्वतैजसाख्येन निजरूपद्वयेन हृदयकमलकर्णिकाकाशे प्रकाशमानं आत्मानमेव समाश्लिष्य स्वरूपमविद्यामनेह सञ्चविनाबाहिकान् स्वाप्निकान्वा पदार्थान्न जीवस्य प्राज्ञापयति । चेतनाचेतनात्मिकं यदिदं जगत् केन सृष्टं कस्मिन्नायत्तं ,ब्रह्मादयस्सर्वेऽप्युपसर्जनतया नैरन्तर्येण कमुपकुर्वते (सेवार्थकः) एवमनालोच्य , अनाद्यनुवृत्तान् देहगेहादिपदार्थान् स्वीयानवेत्य वैतथ्यप्रयत्नेन (व्यर्थविश्वासेन) रज्वाघटीयन्त्रमिव दण्डेन कुलालचक्रमिव कर्मणा परिवर्तनीयं यातायातमनुभूय , तदीय दुःखदर्शनेन अयतार्थज्ञानपरम्परया परिमुच्यमानो नक्राक्रान्त चक्रपाद इव निश्चलान्तःकरणतया देहोऽयं क्षणभङ्गुरो व्याधिमयः , किं च आपातसुखसूचिसंसारः पर्यन्तदुःखदर्शी । अतह् संसारव्यामोहः क्ष्वेल इव हेयः इति सञ्ज्ञातविरक्त्या सद्गुरूपसत्त्या समुपात्त- विद्यासामर्थ्यात् सम्यग् ज्ञानमासाद्य भगवतो

[67] पूर्णबोधचम्पूः- उत्तरोपदेशः

नारायणस्य प्रसादमत्यर्थं सम्पादनीयमित्याचार्याभिप्रायः । शास्त्रैकसमधिगम्यमानस्य हरेरत्यर्थप्रसत्त्यै श्रीमत्पूर्णबोधगुरोस्तदवतार-क्रियाविशेषमादौ सम्पादय मङ्गळावाप्तिजनकम् । अत्र वेदवेद्यत्वं प्रतिपादितम् । कलामात्मीयां श्रियि निधाय .....इति स्वस्य स्त्री अंशं लक्ष्म्यां निधाय तया सह रमते इति ज्ञेयः ।अनेन तस्य स्वरमणत्वं स्थापितम् । एव गुरौ स्थित्वा तन्मुखेन उपदिश्य जीवानां अपरोक्षज्ञानकारणः भूत्वा तेषां स्वरूपानन्दानुभूतिं प्रापयति । अनेन हरेः मोक्षप्रदायकत्वं स्थापितम् । एवं विश्व तैजसप्राज्ञरूपाणां विष्योऽपि अत्र चर्चितः । विश्वः दक्षिणाक्षिगतः सर्वान् जागर्ति । अर्थात् जाग्रतावस्थां प्रापयति । तैजसः कण्ठस्थः प्रत्यक्षं दृष्टानां वा अनुभूतानां बाह्यपदार्थेभ्यः जातानां वस्तूनां वासनापरिणामरूपेण स्वाप्नपदार्थान् दर्शयति । प्राज्ञस्तु सुषुप्तावस्थां ददाति । हृदयस्थः कमलकर्णिकामध्ये सञ्चरन् विविधावस्थां प्रापयति इति नैकांशान् सूचयति कविः । किन्तु जीवः एतत्सर्वमज्ञात्वा कुलालचक्ररूपेण अस्मिन् संसारे पुनः पुनः कर्मणा बद्धः नक्रेण पीडित गजेन्द्र इव दुःखितो भवति । अतः संसारात् विरक्तो भूत्वा गुरूपसत्या गुरुं सन्तोष्य शास्त्रानधीत्य शास्त्रैकज्ञेयस्य हरेः अनुग्रहार्थं यतेत इति बोधयति ।

उत्तरोपदेशेऽपि नैके सिद्धान्ताः प्रतिपादिताः यथा

यः सृष्ट्याद्यष्टकस्य कर्ता स एव परब्रह्म, स वा एव एष पुरुषः स एवेशः सैव भगवान् स आत्मेति ज्ञेयः । जनदिदमावास्यमस्य , तदस्मिन् समाः शतं जीवितुमिच्छेद्यदतेनैव सर्वान्तर्यामिणा यद्वत्तं कर्मनुरूपफलमनुभुञ्जानः समाहितेन मनसा तत्प्रियं करणैः करणैः कर्माणिकुर्याः ।घटपटकुड्यादिबाह्यपदार्थज्ञानजनकं यच्चक्षुरिन्द्रियं न ब्रह्मासाक्षात्काराय प्रभवति । ब्रह्म तु शास्त्रिकसमधिगम्यं हि, तदत्र शास्त्रीया दृष्टिरावश्यकी । सा तु शास्त्रोपदेष्टुर्गुरोः प्रसादजन्या । तत्तादृशामाचार्यमादावुपासीथाः तदनु प्रियगुरुर्वेत्स्यसे त्वमिष्टापत्तिं हि तदादौ लोकत्रय गुरोर्वायोरवतारविभवं वक्ष्यामि मनात्कया..... इति । सृष्ट्यादष्टकं –सृष्टि, स्थितिः, लयः,नियमनं, ज्ञानं, अज्ञानं, बन्धः, मोक्षश्चेति [68]। सर्वं

[68] सृष्टिस्थित्यपेहानियतिदृशितमोबन्धमोक्षाश्च यस्मात्- इति भागवतोक्तेः

हरेःआधीनं इति ज्ञेयम् । अष्टकर्तृत्वं हरेः लक्षणम् । स एव परब्रह्म, पुरुषः, भगवानित्यादिनाम्ना व्यवह्रियते । स सर्वत्र व्याप्तः [69] । सर्वान्तर्यामिश्च । तस्य प्रसादादेव मोक्षः । अतः सर्वाणि कर्माणि तत्प्रीतये[70] एव इति धिया कर्माणि कुर्युः ।


भगवतः दर्शनं अनेन बाह्येन्द्रियेण नैव साध्यं । अतः नित्यशास्त्रश्रवण -अध्ययन-, ध्यानादिभिः गुरोरुपदेशाच्च लभ्यः इति ज्ञेयम् । प्रियगुरुर्नाम नियतगुरुरिति भावः । नियतगुरूणा समागमेन स्वरूपज्ञानं बिम्बापरोक्षञ्च भवतीति ग्राह्यम् ।

---

[69] ईशावास्यमिदं सर्वं....-ईशावास्योपनिषदि


[70] कुर्वते कर्म यत्पीतये सज्जनाः......- द्वादशस्तोत्रं

परिशिष्टः-१



चक्रबन्धः (प्रादुर्भावकाण्डः ७;७०) [पृष्ठम्ः २६]


परिशिष्टः-२



रूढं समीरसमयं खलुसन्मनस्सु
सद्यः स सुष्टु सुरसुष्टुतिगोचरं वै ।
वैरं स्थिरं च कुमते विदुधद्धिरागी
योगी स्वगीर्भिरखिलान् सत उद्दधार ।।

स.वि. सर्ग ५ श्लो. ५७


परिशिष्टः-३




श्रीव्यासमस्तकुहकं गुणसन्निकायं
लक्ष्म्यालयं श्रुतिततिश्रुतमध्ववासम् ।
संवादवानथ निधाय तदुत्तमाङ्गे
योगेशगेयपद एनमथाभ्यषिञ्चत् ॥

स.वि. सर्ग ५ श्लोक ५६

परिशिष्टः-४



परिशिष्टः-५




परिशिष्टः-६

श्रीवेङ्कटाध्वरिप्रणीता

चक्रबन्धः



परिशिष्टः-७



उपयुक्तग्रन्थसूची

अमरकोशः, चौखम्बा संस्कृत सिरीज आफीस्, वारणासी, २००७

काव्यालङ्कारसूत्रवृत्तिः, वामनाचार्यविरचिता, गोपेन्द्रत्रिपुरहरविरचितकामधेनुव्याख्या , तथा विद्याधरी हिन्दीव्याख्यासहिता, चौखाम्बा कृणदास अकादमी, वारणासी, २०१०

गुरुवंशकथा, संपा- ए. बि, श्यामाचार्यः, द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठान, बेङ्ग्लूरु, २००५

गुरुस्मृतिः, संपा- हनुमन्त केशवाचार्य कट्टि, बेङ्ग्लूरु, २००७

चक्रवालप्रबन्धः ,श्रीसुमतीन्द्रतीर्थविरचितः, सं-रामचन्द्रशर्मा, जगद्गुरु—श्रीमन्मध्वाचार्य-मूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिनां मठः, मन्त्रालयः , २००४

जयघोषणा, श्रीसुमतीन्द्रतीर्थविरचिता, सं- पुराणिकसुब्रमण्याचार्यः, जगद्गुरु—श्रीमन्मध्वाचार्य-मूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिनां मठः, मन्त्रालयः , २००४

जयतीर्थविजयः, छलारीसङ्कर्षणाचार्यविरचितः, सं-व्यासनकेरेप्रभञ्जनाचार्यः, द्वैत-वेदान्ताध्ययनसंशोधनप्रतिष्ठान, बेङ्ग्लूरु, १९९४

द्वैतसाहित्ये विजयमहाकाव्येषु भक्तिरसविमर्शः, तिरुपतिराष्ट्रीयसंस्कृतसंस्थानस्य विद्यावारिधिः इत्युपाधये शोधप्रबन्धः, मार्गदर्शकः-प्रो. कोम्पेल्ल रामसूर्यनारायणः, अनुसन्धात्री-वि, कल्पना

धातुरूपावलिः, (निर्णयसागररीत्या) , चौखाम्बा विद्याभवन्, वारणासी, २००५

नरसिंहचम्पूः, केशवभट्टविरचिता, अनु- धनञ्जनाचार्यः, जगद्गुरु—श्रीमन्मध्वाचार्य-मूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिनां मठः, मन्त्रालयः,२००४

पूर्णबोधचम्पूः, मानवीकृष्णमूर्ताचार्यप्रनीता, सं- राजासुधीन्द्राचार्यः, जगद्गुरु—श्रीमन्मध्वाचार्य-मूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिनां मठः, मन्त्रालयः, २००४

मणिमञ्जरी,श्रीनारायणपण्डिताचार्यविरचिता, अनु, प्र- के. सत्यनारायणाचार्यः, राजाजिनगरः, बेङ्गलूरु, १९८०

मधुराञ्जलिः, गलगलीरामाचार्यविरचित-कृतीनां सङ्ग्रहः , परिमळाचार्य -रामाचार्य गलगली, हुब्बळ्ळि, १९९६

रामगुणावलिः, श्रीसुमतीन्द्रतीर्थविरचिता, सं- वादिराजाचार्यः, प्रदीपसिंहाचार्यः, जगद्गुरु—श्रीमन्मध्वाचार्य-मूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिनां मठः, मन्त्रालयः, २००४

लघुरामायणम्, हुलगीश्रिनिवासाचार्यविरचितम्, अनु-वादिरजाचार्य अग्निहोत्री, गुलबर्गा, १९८०

वैजयन्तीकोशः, श्रीयादवप्रकाशाचार्यविरचितः, सं-पं. हरगोविन्दशास्त्री, चौखाम्बा भारती अकादमी, वारणासी, २००८

शिक्षारामायणम्, श्रीनिवासाचार्यपाङ्गरीविरचितम्, सर्वज्ञगीताचार्य-सम्मत-वेदार्थ-प्रकाशक व्यासाश्रमसंस्था, टिळकवाडि, बेळगावि, १९७६

शिक्षारामायणस्य भावप्रकाशिकाव्याख्या, श्रीकृष्णाचार्यविरचिता, सर्वज्ञगीताचार्य-सम्मत-वेदार्थ-प्रकाशक व्यासाश्रमसंस्था, टिळकवाडि, बेळगावि, १९७६

शुभोदयम्, नारायणपण्दिताचार्यविरचितम्, श्रीसोदावादिराजमठः, उडुपी, १९५७

श्रीनिवासचम्पूः, वेङ्कटाध्वरिप्रणीता, स्- लक्ष्मीश्वरकृष्णाचार्यः, करणं वेङ्कटेशः, जगद्गुरु—श्रीमन्मध्वाचार्य-मूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिनां मठः, मन्त्रालयः, २००४

श्रीकृष्णचारित्र्यमञ्जरी, श्रीराघवेन्द्रतीर्थविरचिता, सं, अनु- राजा .एस्,, गुरुराजाचार्यः, श्रीपरिमळसंशोधन मत्तु प्रकाशनमन्दिर, नञ्जनगूडु, १९७१

श्रीरामचारित्र्यमञ्जरी, श्रीराघवेन्द्रतीर्थविरचिता, सं, अनु- राजा .एस्,, गुरुराजाचार्यः, श्रीपरिमळसंशोधन मत्तु प्रकाशनमन्दिर, नञ्जनगूडु, १९७१

सुमध्वविजयः, श्रीनारायणपण्डिताचार्यविरचितः, सं,अनु-व्यासनकेरेप्रभञ्जनाचार्यविरचितः, ऐतरेय प्रकाशन, व्यासनकेरे, बेङ्गलूरु, २०१३

ಪರಾಮರ್ಶನ ಕನ್ನಡ ಗ್ರಂಥಗಳು

ಅಮರಕೋಶ, ಅನು- ವಿದ್ವಾನ್. ಎನ್. ರಂಗನಾಥಶರ್ಮಾ, ಕಾವ್ಯಾಲಯ, ಪ್ರಕಾಶಕರು, ಜಯನಗರ, ಮೈಸೂರು,೨೦೧೩

ಆನಂದವರ್ಧನನ ಕಾವ್ಯ ಮೀಮಾಂಸೆ ಮತ್ತು ಕನ್ನಡ ಧ್ವನ್ಯಾಲೋಕ, ಡಾ. ಕೆ, ಕೃಷ್ಣಮೂರ್ತಿ, ಅಭಿನವ, ವಿಜಯನಗರ, ಬೆಂಗಳೂರು, ೨೦೦೮

ಕನ್ನಡಕಾವ್ಯಾಲಂಕಾರಸೂತ್ರವೃತ್ತಿ, ಅನು- ಡಾ, ಕೆ .ಕೃಷ್ಣಮೂರ್ತಿ,ಡಾ. ಕೆ. ಕೃಷ್ಣಮೂರ್ತಿ ಸಂಸ್ಕೃತ ಸಂಶೊಧನ ಪ್ರತಿಷ್ಠಾನ, ಬೆಂಗಳೂರು, ೨೦೧೦

ಚಂದ್ರಾಲೋಕ ಮತ್ತು ವೃತ್ತ ರತ್ನಾಕರ, ಅನು- ಪ್ರೊ.ಬಿ. ರಾಜಶೇಖರಯ್ಯ, ಪ್ರೊ. ಮಲ್ಲಣ್ಣ, ಶ್ರೀಮಲ್ಲಿಕಾರ್ಜುನ ಗ್ರಂಥ ಪ್ರಕಾಶನ, ಮೈಸೂರು, ೨೦೦೧

ದ್ವೈತ ವೇದಾಂತ ವಾಙ್ಮಯ ಮತ್ತು ಇತಿಹಾಸ, ಡಾ. ಬಿ. ಎನ್. ಕೆ. ಶರ್ಮಾ, ಅನು- ಡಾ, ಎಮ್.ಕೆ.ಭಾರತೀರಮಣಾಚಾರ್ಯ, ದ್ವೈತವೇದಾಂತಸಂಶೋಧನಪ್ರತಿಷ್ಠಾನ, ಬೆಂಗಳೂರು,

ಭಾರತೀಯ ಕಾವ್ಯ ಮೀಮಾಂಸೆ, ಪ್ರೊ, ತೀ.ನಂ. ಶ್ರೀಕಂಠಯ್ಯ, ಪ್ರಸಾರಾಂಗ, ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾಲಯ, ಮೈಸೂರು, ೨೦೧೪

ಮಾಧ್ವ ವಾಙ್ಮಯ ತಪಸ್ವಿಗಳು, **ಪಂಡರೀನಾಥಾಚಾರ್ಯ** ಗಲಗಲಿ,

ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯದ ಇತಿಹಾಸ ,ಆಚಾರ್ಯ ಬಲದೇವ ಉಪಾಧ್ಯಾಯ, ಅನು- ಎಸ್.ರಾಮಚಂದ್ರಶಾಸ್ತ್ರಿ, ಪ್ರಸಾರಾಂಗ , ಬೆಂಗಳೂರು ವಿಶ್ವವಿದ್ಯಾಲಯ,೨೦೦೩

Reference Books

The Students' Sanskrit- English Dictionary, Vaman Shivaram Apte, Motilal Banarasidas Publishers Private Limited, Delhi, 2005

Citations

www.google.com

Padmanabha.blogspot.com

Shodhaganga.inflibnet.ac.in

https:\\www.gktoday.in
https:\\ www. Scribd.com

http:// en. M. Wikipedia.org
http://www.google.co.in

७.उपसंहारः

सप्तश्लोकयुतानि वा सप्तसर्गयुतानि वा लघुकाव्यानीति ग्राह्यानि । इति लघुकाव्यलक्षणं संक्षेपतया उक्तं वर्तते । किन्तु लघुकाव्येष्वपि कवेः आगाधप्रतिभा निगूढा भवति । लघुकाव्यान्यपि शब्दार्थालङ्कारयुतानि रसद्योतकानि सिद्धान्तबोधकानि , इतिहासदर्शकानि सहृदयानन्दकारीणि च । एतेषां काव्यानां उद्देश्यानुसारं विभागं कृत्वा अध्ययनं विहितम् । प्रायः माध्वलघु-काव्येषु साम्यांशाः विद्यन्ते । तेषु विद्यमानानां अंशानां समीक्षात्मकमध्ययनञ्च विहितम् । तदिदानीं निरूप्यते-

रामायणाधारित-माध्व-लघुपद्यकाव्यानां लक्षणानि निरूपितानि ।

प्रायः रामायणाधारित-माध्व-लघुपद्यकाव्यानि श्रीमदाचार्य- विरचित- महाभारततात्पर्य-निर्णयमनुसृत्यैव विरचितानि । प्रासादगुणोपेतानि काव्यानि । शैल्या सुमध्वविजयमहाकाव्यमनुसरन्ति । अतः वैदर्भीशैली इति वक्तुं शक्यते । प्रत्येकसर्गे प्रत्येकशब्दालङ्काराः दृष्टाः । रामस्य सर्वोत्तमत्त्वं रामचरितेन अस्माभिः किं स्वीकर्तव्यमिति विषये कवयः स्पष्टतया बोधयन्ति । काव्येषु मङ्गलाचरणश्लोकः दृश्यते । सर्वेषु लघुकाव्येषु हरिरेव मङ्गले स्तुतः । पुनः वायुनमनं गुरुनमनञ्च केषुचित्काव्येषु दृश्यते । स्वाहङ्कारखण्डनरूपः श्लोकोऽपि दृश्यते । समुद्रवर्णनं, युद्धवर्णनं, प्रकृतिवर्णनञ्च, सूर्योदयवर्णनं, विवाहमहोत्सववर्णनं, च दृश्यते । ताटकासंहारः, सीतापरिणयः, परासुरामसमागमः, कबन्धोद्धारः, विराधसंहारः, शबर्यनुग्रहः, सीतापहरणं, सीताकृतिविचारः, सुन्दरकाण्डः, हनूमत्सेवा, रावणहननं इत्यादिविषयाः तात्पर्यनिर्णयोक्तरीत्या प्रतिपादिताः ।

भारत-भागवत-पुराणाधारित-लघुकाव्यानां लक्षणानि

पुराणाधारितकाव्येषु सृष्टिक्रमः, भगवतः अवतारलीलाः, विशेषतः कृष्णस्य बाललीलाः तत्र ज्ञेयाः सूक्ष्मांशाः, इत्यादयः दृश्यन्ते ।

ऐतिहासिकलघुकाव्यानां लक्षणानि

ऐतिहासिक काव्येषु कवेः ऐतिहासिकप्रज्ञा श्लाघनीया । स्वराज्यरत्नाकरे स्वातन्त्र्यसङ्ग्राम-कालीन स्थितिः स्पष्टतया निरूपिता । शिवाजेः पत्रे मोघलानां आक्रमणेन भारतीयम् कथां दुर्दशां प्राप्तवती इति सुष्टु चित्रिता । जयघोषणायां चक्रवालप्रबन्धे च दाक्षिणात्यराजानां संस्कृतप्रेमविषये तथा पराक्रमविषये नैके तथ्याः ज्ञायन्ते । तेषां राज्ञां विषये इतिहासे उल्लेखाः न लभ्यन्ते । किन्तु काव्यद्वारा नैकेषु ऐतिहासिकविषयेषु ज्ञानं प्राप्यते ।

यतिपुङ्गवानां जीवनाधारितलघुकाव्यानां लक्षणानि

यतिपुङ्गवानां चरिताधारितानि लघुकाव्येषु सुमध्वविजयमहाकाव्यस्य शैली अनुसृता । प्रायः प्रथमसर्गे रामायण, भारतकथा तथा यतिजननादिककथा निरूपिता वर्तते । । प्रायः एकसर्गः(पञ्चमः) नानावृत्तमयः । प्रत्येकस्मिन् सर्गे प्रत्येकवृत्ते निबद्धाः श्लोकाः दृश्यन्ते । शब्दार्थालङ्काराः विपुलाः । सामान्यतः सूर्योदय, चन्द्रोदय, नदीवर्णनम्, विवाहोत्सववर्णनं, उपनयनमहोत्सववर्णनं, च दृश्यन्ते । यतीनां दिनचर्या वर्णिता दृश्यते । दिग्विजयवर्णनं विषदीकृतम् । क्षेत्राणां नामनि तत्रत्यानां विशेषाणां परिचयः ऐतिहासिकांशाश्च सुष्टु उल्लिखिताः । परवादिनिरासः युद्धरूपेण वर्णितो दृश्यते । तत्र तत्र सिद्धान्तानामपि चर्चा दृश्यते । महाकाव्यस्य नैकलक्षणानि लघुकाव्येष्वपि दृश्यन्ते ।

चम्पूकाव्यानां लक्षणानि

चम्पूकाव्यानि आलङ्कारिकदृशा उत्तमानि । अत्रापि प्रमेयाणां चर्चा कृता । विरलतया उपयुज्यमानेषु वृत्तेषु निबद्धाः श्लोकाः दृश्यन्ते । सम्भोग-विप्रलम्भादिश्रुङ्गाराः, सूर्योदयादिप्रकृतिवर्णनं, नगरवर्णनं, उद्यानवर्णनं, समुद्रवर्णनं, उत्सवादिवर्णनम् इत्यादिकं बहुमनोज्ञरीत्या चित्रितं दृश्यन्ते ।

माध्वलघुपद्यकाव्यानि महाकाव्यस्य कानिचित् लक्षणानि अनुसृत्य रचितानि । कथानिरूपणं अत्र प्रामुख्यं भजते । किन्तु आलङ्कारिकदृशाऽपि उत्कृष्टानि । ऐतिहासिकदृशाऽपि महत्वं भजन्ते एतानि काव्यानि। संस्कृतसाहित्यसरस्वती लघुकाव्याभरणैः भूषिता अस्मान् अनुगृह्णात्विति प्रार्थयामहे ।

~~~~~~~~~~~ ***इति शम्*** ~~~~~~~~~~~
~~~~~~~~~~~